


प्रदोष / नित्य पूजा विधिः सम्स्कृतं

www.pradosham.com



Kadayanallur Sri Bhoomi NeeLaa Sametha Neelamaninaatha Swamy



Krishnapuram Sri Visalakshi Sametha Sri Vishweswara Swami



Krishnapuram Sri Balasubramanya Swamy

# PRADOSHAM PRESENTS

## श्री गुरुभ्यो नमः

## प्रदोष/नित्य शिव पञ्चायतन पूजा विधिः

# Pradosha/Nithya Shiva PanchAyathana Pooja Vidhi

***Concise compilation of various Veda Mantras and Pooja procedures for Pradosha Pooja as well as daily Pooja.***

**Sanskrit Edition**

**www.pradosham.com**

**प्रदोष/नित्य शिव पञ्चायतन पूजा विधिः** Sanskrit - Total : 241 Pages

**Shiva Panchayathana Pooja / Pradosha Pooja Vidhi**

**Dedicated to All known and unknown Shiva Bakthas**

**FREE EDITION - FOR DEVOTEES' CIRCULATION ONLY - NOT FOR SALE**

*Special Thanks to Shri Swaminathan of Abu Dhabi for helping us in print edition*

**First Edition : 21.8.2006 -- Pocket size/A4 Size Print edition.**
**First Updation : 12.07.2007**
**Second Edition : 21.11.2009**
**Third Edition : 17.06.2015 – pdf edition**
**Fourth edition : 14.04.2017 – pdf & print with amendment/addition**
**Correction carried : 31.08.2018 & 23.12.2018**

**© All Rights Reserved by www.pradosham.com**
**Enquiries : reachegopal@gmail.com - info@pradosham.com**
**Compiled and Presented by Eshwar Gopal**

www.pradosham.com

- **Om Namah Shivaya** -

## FOREWORD

Dear Bhaktas,

With the Grace of Ever-blissful Meenakshi Sundareshwarar and Nataraja, we were able to compile Veda Mantras into a concise form and shaped in such a way that it can be used both for Pradosha Pooja and Nithya Pooja – with slight alteration. We have titled "Pradosha/Nithya Shiva PanchAyathana Pooja Vidhi". We have included few more additional Mantras in this revised edition such as Sri Lalitha Sahasranaamam,, Sri Vishnusahasranaamam, Thotakashtakam and carried out corrections in Sri Rudra Kramam based on Grantham. This comes in Sanskrit edition. Corrected editions in other South Indian languages will follow suit.

Please consult enlightened Seers to choose the correct path. If you find any errors, please do feel free to notify us. Complex addition of Swara mark was resolved by our member Shri Sridhara, who is the compiler of Kannada Edition. He made our job comfortable. A special Thanks to his contribution.

A chariot is pulled by many devotees irrespective of caste and creed, sending veiled message by God to the world that only joint efforts yield results. We Pray to God Shiva to bestow more such noble souls in our efforts to compile future books. My appreciation would be incomplete without Thanking my Guruji (late) Shri Jayaraman, Shri Shankar Ramakrishnan, Suresh, Kannan, Shri Vaidyanathan (Vadyar) and Pradosham Kumar whose impressive contributions added value to book compilation.

This edition comes to you absolutely Free with no commercial motive attached and you are free to use electronically by just adding a note of our website name.

We dedicate this book to Bhagawan Shri. Ramana Maharshi's Paadham.

EVER IN THE SERVICE OF GOD,
*Om Nama: Shivaya*

Eshwar Gopal
info@pradosham.com
14th April 2017

www.pradosham.com

नित्य पूजा विधिः - शिवपञ्चायतन पूजा ....12
1. गणपत्यथर्वशीर्षोपनिषत् ....13
2. गणपति पूजा विधिः ....16
3. प्रधान पूजा सङ्कल्पम् ....18
4. घण्ट पूजा विधिः ....20
5. कलश पूजा विधिः ....20
6. शङ्खपूजा विधिः ....20
7. आत्मपूजा विधिः ....21
8. पीठ पूजा विधिः ....21
9. द्वारपाल पूजा विधिः ....21
10. कुम्भ आवाहनं ....22
11. पुण्याहवाचनम् ....24
12. पवमान सूक्तम् ....25
13. महान्यासं ....27
I. केशादि पादान्त न्यासं ....27
II. दशाङ्गन्यासः (PERFORM NYASAM IN 10 PARTS OF THE BODY) ....31
III. पञ्चाङ्गन्यासः ....31
IV. हम्सगायत्री ....32
V. दिक्सम्पुटन्यासः ....33
VI. षोडशाङ्गरौद्रीकरणम् ....35
VII. गुह्यादि मस्तकान्तम् षडङ्गन्यासः ....36
VIII. आत्मरक्षा ....37
IX. शिवसङ्कलपः ....37
X. हृदयाय नमः । (पुरुषसूक्त पारायणम्) ....41

www.pradosham.com

XI. अप्रतिरथम् (कवचम्)....43

XII. प्रतिपूरुषमित्त्यनुवाकः (नेत्रम्)....44

XIII. त्वमग्नेऽनुवाकः (शतरुद्रीयम्)....45

XIV. पञ्चाङ्कजपं....46

XV. अष्टाङ्ग प्रणामं (नमस्कारः)....46

14. लघुन्यासः....48

15. ध्यान श्लोकं....49

16. ध्यान-आवाहन विधिः....50

17. सद्यो जाताय पञ्चकलशेषु पूजा....51

18. प्राणप्रतिष्ठा....52

19. उपचारमन्त्रं....53

20. निर्माल्य मन्त्रं....60

21. शिवमानस पूजा....60

22. श्री नन्दिकेश अनुज्ञैः पूजा विधिः....61

23. श्री रुद्रप्रश्नः....61

24. श्री चमकप्रश्नः....68

25. विरजाहोम मन्त्राः....72

26. स्नानम् – पूजा नैवेद्य, कर्पूर आरत्ति....72

26 (1) देवता तर्पणम्....73

26 (2) ध्यानम्....74

27. कुम्भाभिषेकम्....75

28. नारायणसूक्तम्....76

29. विष्णुसूक्तम्....76

30. अघमर्षणसूक्तम्....77

31. दुर्गासूक्तम्....78

www.pradosham.com

**32. श्रीसूक्तम्.......................................................................................79**

**33. भूसूक्तम्.......................................................................................81**

**34. नीळासूक्तम्.......................................................................................81**

**35. दूर्वासूक्तम्.......................................................................................82**

**36. मृत्तिकासूक्तम्.......................................................................................82**

**37. मेधासूक्तम्.......................................................................................82**

**38. सरस्वती सूक्तम् .......................................................................................83**

**39. श्री रुद्रसूक्तम् .......................................................................................84**

**40. मृत्यु सूक्तम्.......................................................................................84**

**41. ब्रह्मसूक्तम्.......................................................................................85**

**42. आयुष्यसूक्तम् .......................................................................................86**

**43. भाग्यसूक्तम् .......................................................................................86**

**44. नवग्रह सूक्तम् .......................................................................................87**

**44. (1) नवग्रह सूक्त विवरणः.......................................................................................89**

**45. नारायणोपनिषत् .......................................................................................90**

**46. गायत्रीमन्त्राः .......................................................................................91**

**47. नवग्रह गायत्री .......................................................................................91**

**48. शान्ति पञ्चकं.......................................................................................92**

**49. ऐकमत्यसूक्तम् (संवादसूक्तम्) .......................................................................................93**

**50. गणपति पूजा विधिः.......................................................................................94**

**51. श्री नन्दिकेश्वर अष्टोत्तरम्.......................................................................................94**

**52. शिव अष्टोत्तरशत नामावलिः.......................................................................................95**

**53. अथ शिव चण्डेश्वर शत नामानि.......................................................................................96**

**54. कदम्ब त्रिशती.......................................................................................98**


www.pradosham.com

55. शिवोपासन मन्त्राः ..........110
56. दिव्य स्तोत्रम्..........112
56.(1) श्री कैलासपति प्रार्थना ..........112
56.(2) गोवन्दनम्..........112
56.(3) बिल्वाष्टकं ..........112
56.(4) लिङ्गाष्टकम्..........113
56.(5) शिवपञ्चाक्षरस्तोत्रम् ..........113
56.(6) दारिद्र्यदहन शिवस्तोत्रम्..........113
56.(7) अर्धनारीश्वरस्तोत्रम्..........114
56.(8) द्वादशज्योतिलिङ्गस्मरणम्..........114
56. (9) नवग्रहदेवता प्रार्थना..........115
56. (10) महालक्ष्म्यष्टकम्..........115
56. (11) अन्नपूर्णास्तोत्रम्..........115
57. धूप मन्त्रं..........116
58. एक हारति दीपं..........116
59. नैवेद्य समर्पणं..........116
60. दीप आराधनै – अलङ्कार दीपं ..........117
61. कर्पूर नीराजनं..........117
62. मन्त्रपुष्पम्..........120
63. भृदावलि (शृङ्गेरि) ..........121
64. स्वस्ति वाक्यम् (काञ्ची)..........122
65. प्रदक्षिण नमस्कारं च प्रार्थना..........122
66. गुरु परम्परा प्रार्थना ..........123
67. तोटकाष्टकम्..........124
68. वेदपारायणम्..........124

www.pradosham.com

**69. स्वस्ति वचनं (आशीर्वादः)** ........ **126**

**69. सङ्गीतं** ........ **132**

**70. नन्दिकेश्वर पूजा** ........ **132**

**71. तीर्थप्रसादनिषेवणम्** ........ **133**

**72. ॠग्वेद मन्त्रं – आशीर्वाद मन्त्रं** ........ **133**

**73. यजुर्वेद मन्त्रं – आशीर्वाद मन्त्रं** ........ **133**

**74. पूतत्व कृच्छ्रम्** ........ **134**

**75. श्री गणपति क्रम पाठः** ........ **134**

**76. श्री रुद्र क्रम पाठः** ........ **135**

**77. श्री चमक क्रम पाठः** ........ **146**

**78. तैत्तिरीयोपनिषत्** ........ **147**

**79. द्वितीया ब्रह्मानन्दवल्ली** ........ **152**

**80. तृतीया भृगुवल्ली** ........ **155**

**81. नक्षत्रसूक्तं (अष्टवाक्यम्)** ........ **158**

**82. श्री ललिता सहस्रनाम स्त्रोत्र नामावलिः** ........ **167**

**83. श्री ललिता सहस्रनामम्** ........ **192**

**84. श्रीविष्णुसहस्रनामस्त्रोत्रम्** ........ **211**

**85. श्री हनुमन्नमस्क्रिया** ........ **232**

**1. अभिषेक क्रमम्** ........ **233**

**2. पञ्चगव्यम्** ........ **234**

**3. नैवेद्यम् - NAYVEDYAM** ........ **237**

**4. फलाणि – FRUITS** ........ **238**

**5. पुष्पाणि** ........ **238**

**6. तिथि** ........ **239**

7. वारः च मासाः - **DAY & MONTH** ........................................ 239

8. ऋतुः - **SEASONS** ........................................ 239

9. नक्षत्राणि – **NAME OF (27) STARS** ........................................ 240

10. नक्षत्राणि – रासि चक्रं – **NAME OF (27) STARS** ........................................ 241

<><><>

www.pradosham.com

## ॐ श्री गुरुभ्यो नमः

# नित्य पूजा विधिः - शिवपञ्चायतन पूजा

शुभं करोति कल्याणं आरोग्यं धनसम्पदः । शत्रु बुद्धि विनाशाय दीपज्योतिर्नमोऽस्तु ते॥
दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिर्जनार्दनः । दीपो हरतु मे पापं सन्ध्या दीपो नमोऽस्तु ते॥

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिःसीद सादनम् ॥

प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनाम वित्रयवतु । महासरस्वत्यै नमः।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः । गुरुःसाक्षात् परब्रह्म तस्मै श्री गुरवे नमः ।
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् । निधये सर्वविद्यानां श्री दक्षिणा मूर्तये नमः ॥
अस्मिन् गुरुचरणारविन्दाभ्यां नमः ॥

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्या सम्प्रदाय कर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यो नमो महद्भ्यो नमो गुरुभ्यः । श्री गुरुभ्यो नमः। हरिः ॐ ॥

ये अर्वाङ्गतवा पुराणे वेदं विद्वागं समभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हगंसमिति यावतीर्वै देवतास्ताःसर्वा वेदविदि ब्राह्मणे वसन्ति तस्मात् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति ॥

देवीं वाचमजनयन्त देवाः । तांविश्वरूपाः पशवो वदन्ति । सानो मन्द्रेषुमूर्जन्दुहाना। धेनुर्वागस्मानुप सुष्टुतैतु॥

## आसन विधि :

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।
आब्रह्मलोकादा शेषात् आलोकालोकपर्वतात् । ये वसन्ति द्विजा देवाः तेभ्यो नित्यं नमो नमः।
अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः । ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥
उग्रभूतापिशाचाद्याः ये च वै भूमिधारकाः । एतेषामविरोधेन ब्रह्मकर्म समारभे ॥
अपक्रामन्तु भूतानि पिशाचाःसर्वतोमुखम् । सर्वेषामविरोधेन पूजाकर्म समारभे॥

www.pradosham.com

अस्यश्री आसन महामन्त्रस्य, पृथिव्या मेरुपृष्ठ ऋषिः, अतलं छन्दः, कूर्मो देवता, आसने विनियोगः। पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

## 1. गणपत्यथर्वशीर्षोपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम्।(१)
ऋतं वच्मि । सत्यं वच्मि ॥२॥

अवत्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम्। अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥३॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाऽद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ॥४॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥५॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥६॥

www.pradosham.com

गणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम्। गकारः पूवरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम् । नादः सन्धानम् । सग्ंहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः । निचृदगायत्रीच्छन्दः । गणपतिर्देवता । ॐ गं गणपतये नमः ॥७॥

**एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात्** ॥८॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् । रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥९॥

नमो व्रातपतये । नमो गणपतये । नमःप्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥१०॥

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्नबाध्यते । स सर्वत्र सुखमेधते। स पञ्चमहापापात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥ ११॥

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चर्तुर्थ्यामनश्नन् जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥१२॥

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति। यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति। यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्य समिद्भिर्यजति स सर्वं लभते स सर्वं लभते ॥१३॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद । इत्युपनिषत् ॥ १४ ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## अनुज्ञा

ॐ ध्रुवन्ते राजावरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥

पर्वत इवाविचाचलिः । इन्द्र इवेह द्ध्रुवस्तिष्ठ । इह राष्ट्रमुधारय । अभितिष्ठ पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ । सुमुहूर्तोऽस्तु। सुप्रतिष्ठितमस्तु ॥ ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयन्नोस्तु। अनूराधान् हविषा वर्द्धयन्तः। शतं जीवेम शरदः सवीराः॥ दीर्घायुष्य-मस्तु। हरिः ॐ ॥

नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशीनेभ्यः। यजाम देवान् यदि शक्नवाम मा ज्यायसः शंस मावृक्षि देवाः । ॐ नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै ॥

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥

उत्तरोत्तराभिवृद्धिरस्तु ॥ दर्भेष्वासीनः । अपउपस्पृश्य । दर्भान् धारयमाणः ॥ (Wear *Pavithram*)

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

www.pradosham.com

प्राणायामं । ॐ भूः - ॐ भुवः - ॐगुं सुवः - ॐ महः - ॐ जनः - ॐ तपः - ॐ गं सत्यम्

ॐ तत्सवितुर्वरेण्यं। भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्।

ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवःसुवरोम् ॥

## 2. गणपति पूजा विधिः

सङ्कल्पं : ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव श्री लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि। करिष्यमाणस्य कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वर पूजां करिष्ये ॥ (एवं द्विवीयी) । अपउपस्पृश्य ॥

(Recite twice from Karishya Manasya and wash your hands)

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिःसीद सादनम् ॥ श्रीमन् महागणपतये नमः॥ ॐ भूर्भुवस्सुवरोम् अस्मिन् हरिद्राबिम्बे सुमुखं सपरिवारं विघ्नेश्वरं महागणपतिं ध्यायामि। आवाहयामि ।

ॐ महागणपतये नमः रत्नसिंहासनं समर्पयामि । ॐ महागणपतये नमः पादयोः पाद्यं समर्पयामि ।
ॐ महागणपतये नमः हस्तयोः अर्घ्यं समर्पयामि । ॐ महागणपतये नमः आचमनीयं समर्पयामि ।
ॐ महागणपतये नमः स्नपयामि ।

आपोहिष्ठा मयोभुवः। तान ऊर्जे दधातन॥ महेरणाय चक्षसे। यो वः शिवतमो रसः।
तस्य भाजयते हनः। उशतीरिव मातरः। तस्मा अरङ्गमामवः। यस्यक्षयाय जिन्वथ।
आपोजनयथा च न :॥ ॐ भूर्भुवःसुवः॥ स्नानानन्तरं आचमनीयं समर्पयामि। (offer water)

ॐ महागणपतये नमः वस्त्रार्थं अक्षतान् समर्पयामि। (shower yellow rice)
ॐ महागणपतये नमः उपवीतार्थं अक्षतान् समर्पयामि। (shower yellow rice)
ॐ महागणपतये नमः दिव्यपरिमळ गन्धान् धारयामि। (daub chandan)
ॐ महागणपतये नमः गन्धस्योपरि हरिद्रा कुङ्कुमं समर्पयामि। (daub kumkum)
ॐ महागणपतये नमः अलन्कारणार्थं अक्षतान् समर्पयामि। (shower yellow rice)
ॐ महागणपतये नमः आभरणार्थे अक्षतान् समर्पयामि। (shower yellow rice)
ॐ महागणपतये नमः पुष्पमालां समर्पयामि। (garlanding the deity)
ॐ महागणपतये नमः पुष्पैः पूजयामि ॥ (recite following mantras & shower flowers)

www.pradosham.com

ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः । ॐ गजकर्णकाय नमः ।
ॐ लम्बोदराय नमः । ॐ विकटाय नमः । ॐ विघ्नराजाय नमः । ॐ विनायकाय नमः ।
ॐ धूमकेतवे नमः । ॐ गणाध्यक्षाय नमः। ॐ फालचन्द्राय नमः। ॐ गजाननाय नमः ।
ॐ वक्रतुण्डाय नमः। ॐ शूर्पकर्णाय नमः । ॐ हेरम्बाय नमः । ॐ स्कन्दपूर्वजाय नमः ।
ॐ सिद्धिविनायकाय नमः। ॐ महागणपतये नमः । नानाविध परिमळपत्रपुष्पाणि समर्पयामि ||

ॐ महागणपतये नमः । धूपं आघ्रापयामि || (show dhoopam)
ॐ महागणपतये नमः । दीपं सन्दर्शयामि || (show dheepam)
ॐ महागणपतये नमः । धूपदीपानन्तरं आचमनीयं समर्पयामि || (pour water)
ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । **देवसवितप्रसुवा** ।।

**इति प्रोक्षय** ।

(प्रातः - morning) सत्यं त्वर्तेन परिषिञ्चामि। (सायं - evening) ऋतं त्वा सत्येन परिषिञ्चामि।
अमृतोपस्तरणमसि - इति किञ्चिज्जलं विसृज्य । ( sprinkle water )
ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ब्रह्मणि म आत्मा अमृतत्वाय।
ॐ महागणपतये नमः निवेदनं समर्पयामि || मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि ।
हस्तप्रक्षालनं समर्पयामि। पादप्रक्षालनं समर्पयामि। पुनराचमनीयं समर्पयामि ।
ॐ भूर्भुवःसुवः । पूगीफलसमायुक्तं नागवल्ली दलैर्युतम्। कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ||

ॐ श्री महागणपतये नमः कर्पूर ताम्बूलं समर्पयमि ।

**नीराजन मन्त्रः**

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् || ॐ महागणपतये नमः
कर्पूरनीराजनं सन्दर्शयामि। नीराजनानंतरं आचमनीयं समर्पयामि। रक्षां धारयामि।
ॐ श्री महागणपतये नमः वेदोक्त मन्त्रपुष्पं समर्पयामि । स्वर्णपुष्पं समर्पयामि ।
पारिजात पुष्पं समर्पयामि। छत्रं धारयामि। नृत्तं दर्शयामि। वाद्यं घोषयामि।
गीतं श्रावयामि। आन्दोळिकां आरोपयामि। अश्वं आरोपयामि। गजं आरोपयामि।
रथं आरोपयामि। समस्त राजोपचार-मन्त्रोपचार-वेदोपचारान् समर्पयामि ||

www.pradosham.com

**अथ प्रार्थना**

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ।
धूमकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः । वक्रतुण्डः शूर्पकर्णो हेरम्ब स्कन्दपूर्वजः ॥
द्वादशैतानि नामानि यःपठेत् श्रुणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥
महागणपतये नमः अनेक कोटी प्रदक्षिण नमस्कारान् समर्पयामि ।

## 3. प्रधान पूजा सङ्कल्पम्

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
ॐ भूः - ॐ भुवः - ॐ सुवः - ॐ महः - ॐ जनः - ॐ तपः - ॐगं् सत्यम्
ॐ तत्सवितुर्वरेण्यं। भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्। ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवःसुवरोम्।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमेपादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणेपार्श्वे सहाब्धे अस्मिन् वर्दमाने (भरतखण्डस्य मेरोः पश्चिमदिग्भागे उत्तरे पार्श्वे अराभ्य महा समुद्रतीरे केतुमाल्य वर्षे दुबै/अबुदाभि महानगर्यां) प्रभवादीनां षष्ठ्याः संवत्सरानां मध्ये ----------- (Year) नाम संवत्सरे ----------- (उत्तरायणे/दक्षिणायने)-----------ऋतौ ---------मासे(month) -----------पक्षे (कृष्ण/शुक्ल) -------------शुभतिथौ (lunar date) वासरः वासरस्तु ------------- ----- वासरयुक्तायां (day) --------नक्षत्रयुक्तायां (star) शुभयोग शुभकरण एवङ्गुण विशेषेण विशिष्टायां अस्यां ------शुभतिथौ (lunar date), ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वरप्रीत्यर्थं -------गोत्रोद्भवस्य (gothram) ------- नक्षत्रे (star) ----- राशौ जातस्य (zodiac sign) ----- शर्मणः (your name) मम (अस्य यजमानस्य) -----नक्षत्रे (star) -----राशौ (zodiac sign) जातायाः -----नाम्न्याः (wife's name) मम धर्मपत्न्याश्च (अस्य यजमानस्य धर्मपत्न्याश्च) अस्माकं सहकुटुम्बानां बन्धुजनवर्गस्य सर्वेषां भक्तजनानां, महाजनानां कृत्तिका नक्षत्रादि अपभरणि अन्तेषु अष्टाविंशति नक्षत्रेषु, मेषादि मीन पर्यन्तेषु द्वादशराशिषु जातानां शुभ नामधेयानां वेदोक्त पूर्ण आयुषः अभिवृध्यर्थं आरोग्य दृडगात्रता सिध्यर्थं, स्त्रीणां युवतीनां कण्यकानां सौन्दर्य सौशील्यादि शोभन गुण

www.prdosham.com

अभिवृध्यर्थं *(For Marriage)* उद्वाहार्थं विद्यमानानां कुमाराणां कण्यकानां सत्कुलात् स्व-वर्णे एव अनुरूप कण्या प्राप्तिमूलम् अनुरूप वरप्राप्ति मूलं उद्वाह मङ्गळ प्राप्त्यर्थं, *(To study well)* विद्यार्थिनां विद्या मेधा प्रज्ञा अभिवृध्यर्थं सर्वविद्या पारङ्गतत्व सिध्यर्थं *(To get employment)* उद्योग विषये उपरि उपरि उन्नतस्थान प्राप्तिद्वारा विशेष कीर्ति लाभ क्षेम अभिवृध्यर्थं उद्योगविषये सर्व अविघ्नता आनुकूल्य सिध्यर्थं क्षेम-स्थैर्य-वीर्य-विजय-आयुरारोग्य-ऐश्वर्याणां अभिवृध्यर्थं धर्म-अर्थ-काम-मोक्ष चतुर्विधफल पुरुषार्थ सिध्यर्थं श्री महागणपत्यादि समस्त देवता प्रसादसिध्यर्थं इष्टदेवता, कुलदेवता, ग्रामदेवता, गृहदेवता, परम्परदेवता प्रसादसिध्यर्थं श्री साम्बपरमेश्वरप्रसाद सिध्यर्थं प्रसादेन सर्वारिष्टशान्त्यर्थं सर्वानुकूलता सिध्यर्थं सर्वमनोरथा अवाप्त्यर्थं ऐहिक आमुष्मिक श्रेयोभिः अभिवृध्यर्थं श्री साम्बपरमेश्वर पादारविन्दयोः अचञ्चल निष्कपट भक्तिसिध्यर्थं - महा प्रदोष महोत्सवकाले / नित्य पञ्चायतन / शुभ मुहूर्त विशेष पूजां, महान्यास / लघुन्यास पुरःसर (अन्योन्य सहायेन) एकवार/एकादशवार, रुद्रजपयुक्त रुद्राभिषेकेन रुद्र अर्चनाञ्च अभिषेकविधिं करिष्ये । तदङ्गत्वेन घण्टा पूजां, कलश पूजां, शङ्ख पूजां, आत्म पूजां, पीठ पूजां, द्वारपालक पूजां, वरुण पूजां च करिष्ये। पूर्वाङ्गमुखेन मण्डपादि शुध्यर्थं गृह शुध्यर्थं स्थल शुध्यर्थं सर्वोपकरण शुध्यर्थं स्वस्ति पुण्याहवाचनं करिष्ये ॥ ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं महा प्रदोष महोत्सवकाले / नित्य पञ्चायतन / शुभ मुहूर्त विशेष पूजां, महान्यास / लघुन्यास पुरःसर (अन्योन्य सहायेन) एकवार/एकादशवार, रुद्रजपयुक्त रुद्राभिषेकेन रुद्र अर्चनाञ्च अभिषेकविधिं करिष्ये। अपउपस्पृश्य ॥

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिःसीद सादनम् ॥

अस्माद् हरिद्राबिम्बाद् सुमुखं सपरिवारं विघ्नेश्वरं महागणपतिं यथासुखं यथास्थानं प्रतिष्ठापयामि।
क्षोभनार्थे क्षेमाय पुनरागमनाय च ॥

क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणागं शतभिषग्वसिष्ठः।

तौ देवेभ्यः कृणुतो दीर्घमायुः ॥ महागणपति प्रसाद सिद्धिरस्तु ॥

(You can humbly accept the Prasad, invoke Prayers and restore the God in His original place)

www.pradosham.com

## 4. घण्ट पूजा विधि:

घण्टाय नमः । दिव्यपरिमळ गन्धान्धारयामि । (घण्टानादं कृत्वा) आगमार्थं तु देवानां गमनार्थं तु रक्षसां। कुर्यात् घण्टारवं तत्र देवताह्वानलाञ्छनम् ‖ (Ring the bell while reciting mantra)
अपसर्पन्तु ते भूता ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥

## 5. कलश पूजा विधि:

कलशं गन्ध-अक्षत-पत्र-पुष्पैः अभ्यर्च्य, कलशं स्पृष्ट्वा।
(Fill pancha-pathram with water, daub chandan/kumkum on the four sides of the vessel)
ॐ कलशाय नमः दिव्यपरिमळ गन्धान्धारयामि । (put flower, akshatha inside)
ॐ गङ्गायै नमः । ॐ यमुनायै नमः । ॐ गोदावर्यै नमः । ॐ सरस्वत्यै नमः ।
ॐ नर्मदायै नमः । ॐ सिन्धवे नमः । ॐ कावेर्यै नमः। सप्त कोटि महातीर्थानि आवाहयामि ‖
(keep your right palm facing down on the top of the panchapathram and recite the following mantras )
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाःस्मृताः।
कुक्षौ तु सागराःसर्वे सप्तद्वीपा वसुन्धरा॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताःसर्वे कलशाम्बुसमाश्रिताः। आयान्तु शिव पूजार्थं दुरितक्षयकारकाः ।
गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ‖
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
(कलश जलेन सर्वोपकरणानि सर्वपूजाद्रव्याणि च प्रोक्ष्य आत्मानञ्च प्रोक्ष्यात्)॥
(sprinkle water from Kalasham over pooja/abhisheka items and self)

## 6. शङ्ख पूजा विधि:

कलश जलेन शङ्खं प्रक्षाल्य; पुनः कलश जलेन शङ्खं गायत्र्या प्रपूरय ।
ॐ पाञ्चजन्याय नमः दिव्यपरिमळगन्धां धारयामि ।
ॐ शङ्खमूले ब्रह्मणे नमः । ॐ शङ्खमध्ये विष्णवे नमः । ॐ शङ्खाग्रे रुद्राय नमः ।
ॐ आदित्यमण्डलाय नमः । ॐ सोममण्डलाय नमः । ॐ चन्द्रशेखराय नमः ।
शङ्खं चन्द्रागृक दैवत्यं मध्ये वरुणसंयुतम् । पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वति ‖
त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया। शङ्खे तिष्ठन्ति विप्रेन्द्राः तस्माच्छङ्खं प्रपूजयेत्॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। पूजितः सर्वदेवैश्च पाञ्चजन्यम् नमोऽस्तु ते ‖
गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा । तव नादेन पाताळे पाञ्चजन्य नमोऽस्तु ते ‖

www.pradosham.com

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ (Recite 5 times silently)

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवःसमिंधते ।

विश्वस्यां विशि प्रविविविशिवाग्ं समीमहे स नो मुञ्चत्वग्ंहसः ।

शङ्ख जलेन कलशं पूरयित्वा ॥ (Pour water from Conch to Kalasham)

शिष्ट जलेन ॐ भूर्भुवःसुवो भूर्भुवःसुवो भूर्भूवस्सुवः इति सर्वोपकरणानि प्रोक्ष्य आत्मानं च प्रोक्ष्य । तच्छेषं विसृज्य । (sprinkle water over puja dravyams, on self and pour the balance water on the earth)

कलश जलेन पुनः शङ्खं गायत्र्या पूरयित्वा॥

(pour water from Kalasham to conch, reciting Gaayathri mantram three times).

## 7. आत्मपूजा विधिः

ॐ आत्मने नमः । दिव्यपरिमळगन्धान् धारयामि ।

ॐ आत्मने नमः । ॐ अन्तरात्मने नमः । ॐ जीवात्मने नमः । ॐ योगात्मने नमः।

ॐ परमात्मने नमः । ॐ ज्ञानात्मने नमः । समस्तोपचारान् समर्पयामि ।

देहो देवालयः प्रोक्तो जीवो देवः सनातनः । त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत्॥

## 8. पीठ पूजा विधिः

ॐ आधारशक्त्यै नमः । ॐ मूलप्रकृत्यै नमः । ॐ आदिकूर्माय नमः

ॐ आदिवराहाय नमः । ॐ अनन्ताय नमः । ॐ पृथिव्यै नमः

ॐ रत्नमण्डपाय नमः । ॐ रत्नवेदिकायै नमः । ॐ स्वर्णस्तम्भाय नमः

ॐ श्वेतच्छत्राय नमः । ॐ कल्पकवृक्षाय नमः । ॐ क्षीरसमुद्राय नमः

ॐ सितचामराभ्यां नमः । ॐ योगपीठासनाय नमः । समस्तोपचारान् समर्पयामि ॥

## 9. द्वारपाल पूजा विधिः

ॐ पूर्वद्वारे द्वारश्रियै नमः । ॐ धात्रे नमः । ॐ विधात्रे नमः ।

ॐ दक्षिणद्वारे द्वारश्रियै नमः । ॐ गुहाय नमः । ॐ गणपतये नम : ।

ॐ पश्चिमद्वारे द्वारश्रियै नमः । ॐ नन्दीश्वराय नमः । ॐ क्षेत्रपालाय नमः ।

ॐ उत्तरद्वारे द्वारश्रियै नमः । ॐ चण्डीश्वराय नमः । ॐ भृङ्गीश्वराय नमः ।

ॐ ऊर्ध्वद्वारे द्वारश्रियै नमः । ॐ आकाशाय नमः । ॐ अन्तरिक्षाय नमः ।

ॐ अधोद्वारे द्वारश्रियै नमः । ॐ भूम्यै नमः । ॐ पातालाय नमः ॥

॥ द्वारपाल पूजां समर्पयामि॥

www.pradosham.com

## 10. कुम्भ आवाहनं

ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः । सबुध्निया उपमा अस्य विष्ठाःसतस्श्च योनिमसतश्च विवः । नाके सुपर्णमुपयत्पतन्तं हृदा वेनन्तो अभ्यचक्षतत्वा । हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् । आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य सङ्गथे । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पागं सुरे । इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरो रथीतमगं रथीनां वाजानागं सत्पतिं पतिम् ।

ॐ आपो वा इदगं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्न-मापोऽमृत-माप-स्सम्राडापो विराडाप-स्स्वराडाप-श्छन्दाग्-ष्यापो ज्योतीग्-ष्यापो यजूग्-ष्याप-स्सत्यमाप-स्सर्वादेवता आपो भूर्भुवः सुवराप ओम् ॥ ( Invoking Deivamsam in the Kalasham with Mantras – Shower flowers)

ॐ अपः प्रणयति । श्रद्धा वा आपः । श्रद्धामेवारभ्यप्रणीयप्रचरति । अपःप्रणयति। यज्ञो वा आपः । यज्ञमेवारभ्य प्रणीय प्रचरति । अपः प्रणयति। वज्रो वा आपः । वज्रमेव भ्रातृव्येभ्यः प्रहृत्यप्रणीय प्रचरति । अपः प्रणयति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै । अपः प्रणयति । आपो वै देवानां प्रियं धाम । देवानामेव प्रियं धाम प्रणीय प्रचरति । अपः प्रणयति । आपो वै सर्वादेवताः। देवता एवारभ्य प्रणीय प्रचरति । अपः प्रणयति। आपो वै शान्ताः। शान्ताभि रेवास्यशुचगंशमयति। देवो वः सवितोत्पुनात्वछिद्रेण पवित्रेणवसोः सूर्यस्य रश्मिभिः ॥

(Adding Koorcham) ॐ कूर्चाग्रैः राक्षसान् घोरान् छिन्दि कर्मविघातिनः । त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि ॥

(Adding Mango leaves) ॐ वृक्षराजसमुद्भूताः शाखायाः पल्लवत्वचः । युष्मान् कुम्भेष्वर्पयामि सर्वपापापनुत्तये । Adding coconut facing towards the sky नालिकेरसमुद्भूत त्रिनेत्र हरसत्तम । शिखया दुरितं सर्वं पापं पीडां च मे नुद। Adding Gems & Gold coins स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्रमीमहे ॥ (कुम्भेषु वरुणावाहनम् - Varuna Aaavahanam in Kumbham)

तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशग्ं समा न आयुः प्रमोषीः ॥ ओं भुर्भुवःसुवरोम् । अस्मिन् कुम्भे सोमास्कन्द स्वरूपेण वरुणमावाहयामि । वरुणस्य इदमासनम् । वरुणाय नमः । रत्नसिंहासनं समर्पयामि । पादयोः पाद्यं समर्पयामि । अर्घ्यं समर्पयामि । आचमनीयं समर्पयामि । शुद्धोदक स्नानं समर्पयामि । स्नानानन्तरम् आचमनीयं समर्पयामि । वस्त्र, यज्ञोपवीत, आभरणार्थे अक्षतान् समर्पयामि । दिव्य परिमळगन्धां धारयामि। गन्धस्योपरि हरिद्रा कुङ्कुमं समर्पयामि। पुष्पमालां समर्पयामि । पुष्पैः पूजयामि ॥

ॐ गङ्गायै नमः । ॐ यमुनायै नमः । ॐ गोदावर्यै नमः । ॐ सरस्वत्यै नमः ।
ॐ नर्मदायै नमः । ॐ सिन्धवे नमः । ॐ कावेर्यै नमः । ॐ तीर्थराजाय नमः ।
ॐ प्रचेतसे नमः । ॐ स्वरूपिणे नमः। ॐ अपाम्पतये नमः । ॐ मकरवाहनाय नमः ।
ॐ जलाधिपतये नमः । ॐ पाशहस्ताय नमः । ॐ वरुणाय नमः ।

नानाविध परिमळ पत्रपुष्पाणि समर्पयामि ॥ धूपं, दीपं, नैवेद्यं (गुळोपहारं निवेदयामि)। कर्पूरताम्बूलं निवेदयामि ॥

**<u>नीरांजनमन्त्राः</u>**

ॐ हिरण्यपात्रं मधोः पूर्णं दधाति । मदव्योसानीति । एकधा ब्रह्मण उपहरति । एकधैव यजमान आयुस्तेजो दधाति ॥ वरुणाय नमः । कर्पूरनीराजनं समर्पायमि। समस्तोपचारान् समर्पयामि ॥

# 11. पुण्याहवाचनम्

अस्मिन् पुण्याहवाचन जपकर्मणि सर्वेभ्यो ब्राह्मणेभ्यो नमः

| आचार्यवचनम् | ऋत्विक् प्रतिवचनम् |
|---|---|
| ॐ भवद्भिः अनुज्ञातःपुण्याहं वाचयिष्ये । | ॐ वाच्यतां। |
| कर्मणः पुण्याहं भवन्तो ब्रुवन्तु। | पुण्याहं कर्मणोस्तु। |
| ---- प्रदोषपूजाकर्मणे स्वस्ति भवन्तो बृवन्तु। | प्रदोषपूजाकर्मणे स्वस्ति। |
| प्रदोषपूजा कर्मणः ऋद्धिम् भवन्तो ब्रुवन्तु। | कर्म ऋद्ध्यतां। |

| आचार्यवचनम् | ऋत्विक् प्रतिवचनम् |
|---|---|
| आत्मशुद्धि मण्डपादि, सर्वोपकरण शुद्धिकर्मणे स्वस्तिभवन्तो बृवन्तु । | कर्मणेस्वस्ति। |
| ऋद्धिः समृद्धिरस्तु। | अस्तु। |
| पुण्याहं समृद्धिः। | अस्तु। |
| प्रजापतिःप्रीयतां। | प्रीयतां भगवान् प्रजापतिः। |
| शिवंकर्मास्तु। | अस्तु। |
| शान्तिरस्तु। | अस्तु। |
| पुष्टिरस्तु। | अस्तु। |
| तुष्टिरस्तु। | अस्तु। |
| अविघ्नमस्तु। | अस्तु। |
| आयुष्यमस्तु। | अस्तु। |
| आरोग्यमस्तु। | अस्तु। |
| धनधान्यसमृद्धिरस्तु। | अस्तु। |
| गोब्रह्मणेभ्यःशुभं भवतु। | भवतु। |
| ईशान्यां बहिर्देशे अरिष्टनिरसनमस्तु। | अस्तु। |
| आग्नेयां यत्पापं तत् प्रतिहतमस्तु। | अस्तु। |
| सर्वशोभनमस्तु। | अस्तु। |
| सर्वाःसम्पदःसन्तु। | अस्तु। |

ॐ शान्तिः शान्तिः शान्तिः

www.pradosham.com

दधिक्राव्ण्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनोमुखाकरत् प्रणआयुगुंषितारिषत्। आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथ। आपोजनयथाचनः।

## 12. पवमान सूक्तम्

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपःशग्स्योना भवन्तु। यासागं राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्। मधुश्चुतःशुचयो याः पावकास्ता न आपःशग्स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपःशग् स्योना भवन्तु। शिवेन मा चुक्षुषा पश्यतापःशिवया तनुवोप स्पृशतत्वचं मे। सर्वागं अग्नीगं रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥ पवमानःसुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूगं रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदन्तः सधमाद्येषु। वयग् स्याम पतयो रयीणाम्। वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयो भूः। द्यावापृथिवी पयसा पयोभिः। ऋतावरी यज्ञिये मा पुनीताम्।

बृहद्भिःसवितस्तृभिः। वर्षिष्ठै-र्देवमन्मभिः। अग्ने दक्षैःपुनाहि मा। येन देवा अपुनत। येनापो दिव्यंकशः। तेन दिव्येन ब्रह्मणा। इदं ब्रह्म पुनीमहे। यः पावमानीरद्ध्येति। ऋषिभिःसंभृतगं रसम्। सर्वगं स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति। ऋषिभिःसंभृतगं रसम्। तस्मै सरस्वती

www.pradosham.com

दुहे। क्षीरगं सर्पिर्मधूदकम् ॥ पावमानीःस्वस्त्ययनीः । सुदुघाहि पयस्वतीः। ऋषिभिः संभृतो रसः। ब्राह्मणेष्वमृतगं हितम् । पावमानीर्दिशन्तुनः । इमं लोकमथो अमुम् । कामान्समर्धयन्तु नः। देवीर्देवैःसमाभृताः । पावमानीःस्वस्त्ययनीः । सुदुघाहि घृतश्चुतः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतगं हितम्। येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण। पावमान्यः पुनन्तु मा। प्राजापत्यं पवित्रम्। शतोद्यामगं हिरण्मयम्। तेन ब्रह्म विदो वयम्। पूतं ब्रह्म पुनीमहे। इन्द्रःसुनीती सहमा पुनातु। सोमस्स्वस्त्या वरुणस्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु। भूर्भुवःसुवः॥

तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीः स्वस्तिरस्तु नः। स्वास्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## वास्तु सूक्तम्

वास्तोष्पते प्रतिजानी ह्यस्मान् स्वावेशो अनमीवो भवान: । यत्वे महे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शं चतुष्पदे । वास्तोष्पते शग्मया सगंसदाते सक्षीम-हिरण्वया गतुमत्या । आव: क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिस्सदान: । वास्तोष्पते प्रतरणो न एधि गोभिरश्वे भिरिन्दो । अजरासस्ते सख्येस्याम पितेव पुत्रान् प्रतिनो जुषस्व । अमीवहा वास्तोष्पते विश्वा रूपाण्या विशन्न् । सखा सुशेव एधिन: । शिवगं शिवम् ॥ **(वरुण यथास्थानं)**

## प्रोक्षण मन्त्र:

देवस्यत्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां। अश्विणोर्भैषज्येन। तेजसे ब्रह्मवर्च सायाभिषिञ्चामि ।

देवस्यत्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां। सरस्वत्यै भैषज्येन। वीर्यायान् नाद्यायाऽभिषिञ्चामि। देवस्यत्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां। इन्द्रस्येन्द्रियेण ।

www.pradosham.com

श्रियैयशसे बलायाभिषिञ्चामि । अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णुगं सरस्वतिगं सवितारं च वाजिनं । सोमगं राजानं वरुणमग्नि मन्वारभामहे । आदित्यान् विष्णुगुम् सूर्यं ब्रह्माणञ्च बृहस्पतिम् ॥

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यागं सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येना भिषिञ्चामीन्द्रस्यत्वा साम्राज्येनाऽभिषिञ्चामि बृहस्पतेस्त्वा साम्राज्येनाऽभिषिञ्चामि।

द्रुपदादिवेन् मुमुचानः। स्विस्स्नात्वी मलादिव । पूतं पवित्रैणे वाज्यं। आपःशुन्धन्तु मैनसः। भूर्भुवस्सुवो भूर्भुवसुवो भूर्भुवस्सुवः॥

## प्राश्न मन्त्रः

आप इद्वा उभेषजीः । आपो अमीव चातनीः। आपस्सर्वस्य भेषजी । तास्ते कृण्वन्तु भेषजं । अकाल मृत्यु हरणम् सर्व व्याधि निवारणं । सर्व (समस्त) पापक्षयहरं (देवता नाम।) वरुण पाथोदकं शुभं ।

## स्त्रीणां प्राशने

आमयावी चिन्वीत । आपो वै भेषजं । भेषजमेवास्मै करोति । सर्वमायुरेति।

ॐ शान्तिः शान्तिः शान्तिः ॥

# 13. महान्यासं

## i. केशादि पादान्त न्यासं

*BhodhAyana Maharshi has presented the version of MahanyAsam which is recited prior to Ekadasha Rudra Japam and this procedure is called 'NyAsa Jadila Kriyakramam'. This is recited in Temples, Residences in an elaborate way.*

*Covering all parts of the body from head to feet, Sri Rudra mantram is recited to invoke and transform ourselves as a part of Sri Rudra roopa. Guided with this mantra vakyams, erect a shield around us (dhigbhandam), derive sharp observation through eyes and by using the same mantras as weapons, be prepared to win over enmity. Thus making sure to prevent all hindrances, should we be ready to begin Sri Rudra Japam for smooth performance of Sri Rudra Abhishekam. While performing NyAsam by touching respective body-parts, recalling each dedicated Devatha is of utmost importance.*

www.prapatti.com

अथात पञ्चाङ्गरुद्राणां न्यासपूर्वकं जप (होम) अर्चनाभिषेक विधिं व्याख्यास्यामः ||

| | |
|---|---|
| ॐकारं मन्त्रसंयुक्तं नित्यं ध्यायन्ति योगिनः। | कामदं मोक्षदं तस्मै नकाराय नमो नमः ॥ |
| महादेवं महात्मानं महापातकनाशनं। | महापापहरं वन्दे मकाराय नमो नमः ॥ |
| शिवं शान्तं जगन्नाथं लोकानुग्रकारणं। | शिवमेकं परं वन्दे शिकाराय नमो नमः ॥ |
| वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम्। | वामे शक्तिधरं वन्दे वकाराय नमो नमः ॥ |
| यत्र यत्र स्थितं देवं सर्वव्यापिनमीश्वरम्। | यल्लिङ्गं पूजयेन्नित्यं यकाराय नमो नमः ॥ |

या ते रुद्र शिवातनूरघोरापापकाशिनी । तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि || शिखायै नमः || (tuft - rearside of head) || **1.1**

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि || शिरसे नमः || (head) || **1.2**

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि || ललाटाय नमः || (forehead) ||**1.3**

हग्ंस-श्शुचिष-द्वसु-रन्तरिक्षस-द्धोता वेदिषदतिथि-र्दुरोणसत्। नृष-द्वरस-दृतस-द्व्योमस-दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् || भ्रुवोर्मध्याय नमः || (space bet. eyebrows) **1.4**

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् || नेत्राभ्यां नमः || (eyes) **1.5**

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च । कर्णाभ्यां नमः || (two ears) **1.6**

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते || नासिकायै नमः || (nose) **1.7**

अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे । निशीर्यशल्यानां मुखा शिवो नः सुमना भव || मुखाय नम : || (face) **1.8**

www.pradosham.com

नीलग्रीवाश्शिति कण्ठाश्शर्वा अधः क्षमाचराः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि || कण्ठाय नमः || (neck) **1.9**

नीलग्रीवाश्शितिकण्ठा दिवगं रुद्रा उपश्रिताः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि || उपकण्ठाय नमः || (Rear side of neck) **1.10**

नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने || बाहुभ्यां नमः || (shoulders) **1.11**

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज || उपबाहुभ्यां नम : || (between wrist and shoulders) **1.12**

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि। हस्ताभ्यां नमः || (palm) **1.13**

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्वमाम्। भवोद्भवाय नमः || अङ्गुष्ठाभ्यां नमः || (thumb) **1.14**

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः || तर्जनीभ्यां नमः || (index finger) **1.15**

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्र रुपेभ्यः || मध्यमाभ्यां नमः || (middle finger) **1.16**

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ||अनामिकाभ्यां नमः ||(Ring Finger) **1.17**

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् || कनिष्ठिकाभ्यां नमः || (small finger) **1.18**

नमो वः किरिकेभ्यो देवानागं हृदयेभ्यः || हृदयाय नमः || (heart) **1.19**

नमो गणेभ्यो गणपतिभ्यश्च वो नमः । पृष्ठाय नमः || (back side) **1.20**

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः । कक्षाभ्यां नम : || (arm pit) **1.21**

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः || पार्श्वाभ्यां नमः || (side of ribs ) **1.22**

विज्यं धनुःकपर्दिनो विशल्यो बाणवाग्ं उत । अनेशन्नस्येषव आभुरस्य निषङ्गथिः। जठराय नम : || (inner stomach) **1.23**

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम || नाभ्यै नमः || (navel) **1.24**

मीढुष्टम शिवतम शिवोनः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि || कट्यै नमः || (hip) **1.25**

ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि । गुह्याय नमः || (private parts) **1.26**

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि । अण्डाभ्यां नमः || (testicles) **1.27**

स शिरा जातवेदाः । अक्षरं परमं पदम् । वेदानाग्ं शिर उत्तमं जातवेदसे शिरसि माता आयुष्मन्तं करोतु माम् || अपानाय नमः || (anus) **1.28**

मानो महान्तमुत मानो अर्भकं मा न उक्षन्तमुतमा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः || ऊरुभ्यां नमः || (thighs) **1.29**

एष ते रुद्रभागस्तञ्जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः || जानुभ्यां नमः । (knees) **1.30**

सग्ंसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता । बृहस्पते परिधीया रथेन रक्षोहामित्राग्ं अपबाधमानः || जङ्घाभ्यां नमः || (ankle) **1.31**

www.pradosham.com

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ||
गुल्फाभ्यां नमः || (calf muscle ) **1.32**

ये पथां पथिरक्षय ऐलबृदा यव्युधः । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ||
पादाभ्यं नमः || (feet ) **1.33**

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीग्ंश्चसर्वाञ्जम्भयन् सर्वाश्च यातुधान्यः ||
कवचाय नमः || (keep your hands crossed to touch opposite shoulders) **1.34**

नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च || उपकवचाय नम :||
(Keep hands crossed on the rear shoulder) **1.35**

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानोऽहन्तेभ्यो करन्नमः ||
तृतीयनेत्राय नम । (keep middle finger on the centre of head and other two on two eyes) **1.36**

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप || अस्त्राय नमः ||
(clap left hand palm with right hand index & middle finger) **1.37**

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे। तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ||
दिग्बन्धाय नमः || (Tap with middle finger and thumb from right to left circling your head) **1.38**

### ii. दशाङ्गन्यासः (Perform Nyasam in 10 parts of the body)

ॐ नमो भगवते रुद्राय । ॐ - मूर्ध्ने नमः । नं - नासिकायै नमः । मों - ललाटाय नमः।
भं - मुखाय नमः । गं - कण्ठाय नमः। वं - हृदयाय नमः । तें - दक्षिणहस्ताय नमः ।
रुं - वामहस्ताय नमः । द्रां - नाभ्यै नमः । यं - पादाभ्यां नमः ||

### iii. पञ्चाङ्गन्यासः

*According to scholars, reciting Mantras repeatedly, 'mantra sannithyam' and 'devatha sannithyam' is derived. Repetition of such practice is called "Nyasa Jadilam". Weaving the plait with complicated knots, all mantras should be interwoven and in the process, GOD's power should be invoked in us - this is called "Nyasa Jadilam".)*

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः । भवे भवे नातिभवे भवस्वमाम् । भवोद्भवाय नमः ॥ पादाभ्यां नमः ॥ (*feet*) **3.1**

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

॥ ऊरुमध्याभ्यां नमः ॥ (*middle thigh*) **3.2**

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्र रुपेभ्यः ॥ हृदयाय नमः॥ (*heart*) **3.3**

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ मुखाय नमः॥ (*face*) **3.4**

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ मूर्ध्ने नमः ॥ (*forehead*) **3.5**

## iv. हम्सगायत्री

अस्य श्री हंसगायत्री स्तोत्र महामन्त्रस्य । अव्यक्त परब्रह्म ऋषिः । अव्यक्त गायत्री छन्दः परमहंसो देवता ॥ हं सां बीजं - हं सीं शक्तिः - हं सूं - कीलकम् ॥ परमहंस-प्रसाद सिध्यर्थे जपे विनियोगः ॥

हंसां - अङ्गुष्ठाभ्यां नमः। हंसीं - तर्जनीभ्यां नमः।
हंसूं - मध्यमाभ्यां नमः। हंसैं - अनामिकाभ्यां नमः।
हंसौं - कनिष्ठिकाभ्यां नमः। हंसः - करतल-करपृष्ठाभ्यां नमः।
हंसां - हृदयाय नमः । हंसीं - शिरसे स्वाहा।
हंसूं - शिखायै वषट्। हंसैं - कवचाय हुं।
हंसौं - नेत्रत्रयाय वौषट् । हंसः - अस्त्राय फट् । भूर्भुवःसुवरोम् इति दिग्बन्धः । ध्यानम् ॥

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम् ।

पश्यामि ते सर्व जनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥ (4.1)

देहो देवालयः प्रोक्तो जीवो देवःसनातनः। त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत्॥ **(4.2)**

**हंसो हंस परमहंसः हंस सोऽहं सोऽहं हंसः** ॥ (recite gayathri 5 times silently)

**(हंसगायत्री) हंसहंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ॥ (4.3)**

हंस हंसेति यो ब्रूयात् हंसो नाम सदाशिवः। एवं न्यासविधिं कृत्वा ततः सम्पुटमारभेत्॥ **(4.4)**

## v. दिक्सम्पुटन्यासः

*Performing Nyasam in all 10 directions (eight directions+space+earth) and invoking prayers to Devthas, sitting place should be protected (like sambudam).*

ॐ भूर्भुवःसुवरों। ॐ लं - त्रातारमिन्द्रमवितारमिन्द्रग्ं हवे हवे सुहवग्ं शूरमिन्द्रम् । हुवे नु शक्रं पुरुहूतमिन्द्रग्ं स्वस्तिनो मघवा धात्विन्द्रः ॥

ॐ लं - पूर्वदिग्भागे इन्द्राय वज्रहस्ताय देवाधिपतये ऐरावतवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । ॐ लं इन्द्राय नमः । पूर्वदिग्भागे ललाटस्थाने इन्द्रः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ **(5.1)**

ॐ भूर्भुवःसुवरों। ॐ रं - त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाग्ंसि प्रमुमुग्ध्यस्मत् ॥ ॐ रं - आग्नेयदिग्भागे अग्नये शक्तिहस्ताय तेजोऽधिपतयेऽजवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । रं अग्नये नमः । आग्नेयदिग्भागे नेत्रस्थाने अग्निः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ **(5.2)**

ॐ भूर्भुवःसुवरों । ॐ हं - सुगन्नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा । यस्मिन्नेनमभ्यषिञ्चन्त देवाः। तदस्य चित्रग्ं हविषा यजाम॥

ॐ हं - दक्षिणदिग्भागे यमाय दण्डहस्ताय धर्माधिपतये महिषवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः। ॐ हं यमाय नमः। दक्षिणदिग्भागे कर्णस्थाने यमः सुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.3)**

ॐ भूर्भुवःसुवरों। ॐ षं - असुन्वन्तमयजमानमिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि । अन्यमस्मदिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु ॥

ॐ षं नैर्ऋतदिग्भागे निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नरवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । ॐ षं निर्ऋतये नमः। नैर्ऋतदिग्भागे मुखस्थाने निर्ऋतिः सुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.4)**

ॐ भूर्भुवःसुवरों। ॐ वं - तत्त्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहबोध्युरुशग्ं स मा न आयुः प्रमोषीः ।

ॐ वं - पश्चिमदिग्भागे वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । ॐ वं वरुणाय नमः पश्चिमदिग्भागे बाहुस्थाने वरुणः सुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.5)**

ॐ भूर्भुवःसुवरों। ॐ यं - आनो नियुद्भिश्शतिनीभिरध्वरम् । सहस्रिणीभि रुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व । यूयं पातस्वस्तिभिस्सदा नः ॥

ॐ यं - वायव्य दिग्भागे वायवे साङ्कुशध्वजहस्ताय प्राणाधिपतये मृगवाहनाय सांगाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः । ॐ यं वायवे नमः । वायव्य दिग्भागे नासिकास्थाने वायुःसुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.6)**

ॐ भूर्भुवःसुवरों । ॐ सं - वयग्सोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि ॥

ॐ सं - उत्तरदिग्भागे सोमाय अमृतकलशहस्ताय नक्षत्राधिपतये अश्ववाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः। ॐ सं सोमाय नमः। उत्तरदिग्भागे हृदयस्थाने सोमः सुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.7)**

ॐ भूर्भुवःसुवरों। ॐ शं - तमीशानं जगतस्तस्थुषस्पतिम् । धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायु रदब्धस्स्वस्तये ।

ॐ शं - ईशानदिग्भागे ईशानाय त्रिशूलहस्ताय भूताधिपतये वृषभवाहनाय सांगाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः।ॐ शं ईशानाय नमः ईशानदिग्भागे नाभिस्थाने ईशानः सुप्रीतो सुप्रसन्नो वरदो भवतु॥ **(5.8)**

ॐ भूर्भुवःसुवरों । ॐ खं - अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भर हूतौ सजोषाः ।

यश्शंसतेस्तुवते धायि पज्रइन्द्रज्येष्ठा अस्मा अवन्तु देवाः ।

ॐ खं - ऊर्ध्वदिग्भागे ब्रह्मणे पद्महस्ताय प्रजाधिपतये हंसवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । ॐ खं ब्रह्मणे नमः। ऊर्ध्वदिग्भागे मूर्धस्थाने ब्रह्मा सुप्रीतो सुप्रसन्नो वरदो भवतु ||(**5.9**)

ॐ भूर्भुवस्सुवरों । ॐ ह्रीं - स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः।

ॐ ह्रीं - अधोदिग्भागे विष्णवे चक्रहस्ताय लोकाधिपतये गरुडवाहनाय साङ्गाय सायुधाय सशक्तये स परिवाराय सर्वालंकारभूषिताय उमामहेश्वरपार्षदाय नमः । ॐ ह्रीं विष्णवे नमः । अधोदिग्भागे पादस्थाने विष्णुःसुप्रीतो सुप्रसन्नो वरदो भवतु || **(5.10)**

## vi. षोडशाङ्गरौद्रीकरणम्

*[Keeping away the defeat from other Jeevan, this portion offers prayers from top skin to inside bones, which removes all sins, all 16 chapters in the body is performed with Rowdreekaranam. Powerful Sri Rudra Jyothi's guidance is sought here to fade away the evils/problems.]*

विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.1)**

वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.2)**

श्वात्रोऽसि प्रचेताः रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.3)**

तुथोऽसि विश्ववेदा रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.4)**

उशिगसिकवी रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.5)**

अङ्घारिरसि बंभारी रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.6)**

अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.7)**

शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.8)**

संभ्राडसि कृशानू रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || **(6.9)**

परिषद्योऽसि पवमानो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.10)

प्रतक्कासि नभस्वान् रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.11)

असंमृष्टोऽसि हव्यसूदो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.12)

ऋतधामासि सुवर्ज्योती रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.13)

ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.14)

अजोऽस्येकपाद् रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.15)

अहिरसि बुध्नियो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा माहिग्ंसी : || (6.16)

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते । सर्वभूतेष्वपराजितो भवति । ततो भूतप्रेत पिशाच-ब्रह्मराक्षस-यक्षयमदूतशाकिनी-डाकिनी-सर्पश्वापद वृश्चिक तस्करा-ज्वरा द्युपद्रव जोपघाताः। सर्वे ज्वलन्तं पश्यन्तु मां रक्षन्तु || यजमानं सहकुटुम्बं रक्षन्तु || सर्वान् महान् रक्षन्तु ||

## vii. गुह्यादि मस्तकान्तम् षडङ्गन्यास:

*[Performing six types of Nyasam with selected Veda Mantras.]*

मनो ज्योतिर्जुषता माज्यं विछिन्नं यज्ञग्ंसमिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वेदेवा इह मादयन्ताम् || गुह्याय नमः || (*private parts*) (7.1)

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायती मुषासम् । यह्वा इव प्रवयामुज्जिहानाः प्रभानवःसिस्त्रते नाकमच्छ || नाभ्यै नमः || (*navel*) (7.2)

अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाग्ंरेताग्ंसि जिन्वति || हृदयाय नमः || *(heart)* (7.3)

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् । कविग्ं सम्राज मतिथिं जनानामासन्ना पात्रं जनयन्त देवाः || कण्ठाय नमः || *(neck)* (7.4)

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् । उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वा मनुमदन्तु देवाः || मुखाय नमः *(face)* (7.5)

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि । शम्प्रजाभ्यो यजमानाय लोकम् ॥
ऊर्जं पुष्टिं ददद्भ्यावव‍ृत्स्व ॥ शिरसे नमः ॥ *(forehead)* (**7.6**)

## viii. आत्मरक्षा

*(The Following mantras are recited to reach near Parabrahmam by performing Nyasam)*

ब्रह्मात्मन्वदसृजत । तदकामयत । समात्मना पद्येयेति । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशमग्ं हूतः प्रत्यशृणोत्। स दशहूतोऽभवत्। दशहूतो हवै नामैषः। तं वा एतं दशहूतग्ं सन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः ॥ **(8.1)**

आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै सप्तमग्ंहूतः प्रत्यशृणोत्। स सप्तहूतोऽभवत्। सप्तहूतोहवै नामैषः। तं वा एतग्ं सप्तहूतग्ं सन्तम्। सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः ॥ **(8.2)**

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै षष्ठग्ं हूतः प्रत्यशृणोत्। स षड्ढूतोऽभवत्। षड्ढूतो हवै नामैषः। तं वा एतग्ं षड्ढूतग्ं सन्तम्। षड्ढोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः ॥ **(8.3)**

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै पञ्चमग्ं हूतः प्रत्यशृणोत्। स पञ्चहूतोऽभवत्। पञ्चहूतो हवै नामैषः। तं वा एतं पञ्चहूतग्ं सन्तम्। पञ्चहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः ॥ **(8.4)**

आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै चतुर्थग्ं हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो हवै नामैषः। तं वा एतं चतुर्हूतग्ं सन्तम्। चतुर्होतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥ **(8.5)**

तमब्रवीत्। त्वं वै मे नेदिष्ठग्ं हूतः प्रत्यश्रौषीः। त्वयै नानाख्यातार इति। तस्मान्नुहैनाग्श्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्राणाग्ं हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद ॥ आत्मने नमः ॥ **(8.6)**

## ix. शिवसङ्कलपः

*[Beginning of Mahanyasam - we started with "Athatha Panjanga RudrAnAm nyAsa pUrva....". This mantra refers to to the following five elements of Shivasangkalpam (Heart), Purusha Sooktha Parayanam (Forehead), Uththara NarAyana ParAyanam (Tuft) Apratiratham (shield), tvamagne (weapon) - all these are Veda mantras and considered important]*

www.pradosham.com

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु || **(9.1)**

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति । यत्सम्मितं मनः संचरन्ति तन्मे मनः शिवसङ्कल्पमस्तु || **(9.2)**

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यत्क्षमन्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु || **(9.3)**

यत्प्रज्ञान मुत चेतो धृतिश्च यज्ज्योति रन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु || **(9.4)**

सुषारथिरश्वानि वयं मनुष्यान्मे नियुते पशुभिर्वाजिनीवान् । हृत्प्रविष्टं यदचरं यविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु || **(9.5)**

यस्मिन्नृचसामायजूगंषि यस्मिन्प्रतिष्ठा रशनाभाविभाराः। यस्मिगंश्चित्तगं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु || **(9.6)**

यदत्र षष्ठं त्रिशतगं सुवीर्यं यज्ञस्य गुह्यं नवनावमाय्यम् । दश पञ्च त्रिगंशतं यत्परं तन्मे मनः शिवसङ्कल्पमस्तु || **(9.7)**

यज्ञाग्रतो दूरमुदैतु सर्वं तत्सुप्तस्य तथैवेति । दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनःशिवसङ्कल्पमस्तु || **(9.8)**

येनेदं विश्वं जगतो बभूव ये देवाविमहतो जातवेदाः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमास्तन्मे मनः शिवसङ्कल्पमस्तु || **(9.9)**

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च । येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु || **(9.10)**

www.pradosham.com

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः । ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.11)**

अचिन्त्यं चा प्रमेयं च व्यक्ताव्यक्त परं च यत् । सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.12)**

एका च दश च शतं च सहस्रं चायुतं च । नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.13)**

ये पञ्च पञ्चादश शतग्ं सहस्रमयुतन्यर्बुदं च । ये अग्निचित्तेष्टकास्ताग्ं शरीरं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.14)**

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । यस्य योनिं परिपश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.15)**

यस्यैतं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणुतमिन्दुम् । स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.16)**

परात्परतरं ब्रह्म तत्परात्परतो हरिः । यत्परात्परतोऽधीशं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.17)**

परात्परतरं चैव तत्पराच्चैव यत्परम्। यत्परात्परतो ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.18)**

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी। ऋग्यजुःसामाथर्वैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.19)**

यो वै देवं महादेवं प्रयतः प्रणतः शुचिः । यःसर्वे सर्ववेदैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.20)**

प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम् । ओङ्कारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु॥ **(9.21)**

योऽसौ सर्वेषु वेदेषु पठ्यते ह्ययमीश्वरः । अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.22)**

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च । प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.23)**

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.24)**

कैलासशिखरे रम्ये शङ्करस्य शिवालये । देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.25)**

कैलास शिखरा वासं हिमवद्रिरिसंस्थितम् । नीलकण्ठं त्रिणेत्रं च तन्मे मनः शिवसङ्कल्पमस्तु ॥**(9.26)**

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् । सम्बाहुभ्यान्नमति सम्पतत्रैर्द्यावापृथिवी जनयन् देव एकस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.27)**

चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः । इतिहासपुराणानि तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.28)**

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नोऽवधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्र रीरिषस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.29)**

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.30)**

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.31)**

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमग्ं हृदे । सर्वोह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.32)**

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठाःसतश्च योनिमसतश्च विवस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.33)**

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.34)**

य आत्मदा बलदा यस्य विश्वं उपासते प्रशिषं यस्य देवाः । यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.35)**

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ **(9.36)**

www.pradosham.com

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीग्ं सर्व भूतानां तामिहोपह्वये श्रियम् तन्मे मनः शिवसङ्कल्पमस्तु || **(9.37)**

नमकं चमकं चैव पुरुषसूक्तं च यद्विदुः । महादेवं च तत्तुल्यं तन्मे मनः शिवसंकल्पमस्तु || **(9.38)**

य इदग्ं शिवसङ्कल्पग्ंसदा ध्यायन्ति ब्राह्मणाः। ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु ||
**(9.39)**

## X. हृदयाय नमः। (पुरुषसूक्त पारायणम्)

*(Purusha Suktam comprises of 3 portions. It is recited in step-by-step sequence in temples. First portion is called "purushasuktam", the second being "Uththaranarayanam" and the third "MahanarAyanam" [narayanasuktam]. UththaranarAyanam is recited only in South India. For Mahanysam - only two portion is used and MahanarAyanam is not in practice.)*

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायाग्श्च पूरुषः ||१||

पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः ||२||

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मःशरद्धविः । सप्तास्यासन्परिधयः । त्रिःसप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः ||३||

तेन देवा अयजन्त। साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे। छन्दाग्ंसिजज्ञिरे तस्मात्। यजुस्तस्मादजायत || ४ ||

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः ॥ ५ ॥

ऊरू तदस्य यद्वैश्यः। पद्भ्याग्ं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकाग्ं अकल्पयन् ॥६ ॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥७ ॥

**(ॐ नमो नारायणाय।) ॐ नमो भगवते रुद्राय। ॥ पुरुषसूक्तग् शिरसे स्वाहा ॥**

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते ॥८ ॥

तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे ॥९ ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण ॥ १० ॥

**ॐ नमो भगवते रुद्राय । उत्तरनारायणग् शिखायै वषट् ॥**

www.pradosham.com

## xi. अप्रतिरथम् (कवचम्)

आशुश्शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनोऽनिमिष एक वीरश्शतग्ं सेना अजयत्साकमिन्द्रः । संक्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयततत्सहध्वं युधो नर इषुहस्तेन वृष्णा । स इषुहस्तैः स निषङ्गिभिर्वशी सग्स्त्रष्टा सयुध इन्द्रो गणेन । सग्ंसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता । बृहस्पते परिदीया रथेन रक्षोहामित्राग्ं अप बाधमानः । प्रभञ्जन्त्सेनाःप्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् । गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रम्मृणन्तमोजसा । इमग्ं सजाता अनुवीरयध्वमिन्द्रग्ं सखायोऽनुसग्ंरभध्वम् । बलविज्ञायःस्थविरः प्रवीरःसहस्वान् वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् । अभिगोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्युरिन्द्रः ।

दुश्च्यवनः पृतनाषाडयुध्योऽस्माकग्ं सेना अवतु प्रयुत्सु । इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे । इन्द्रस्य वृष्णो वरुणस्यराज्ञ आदित्यानां मरुताग्ं शर्द्ध उग्रम् । महामनसां भुवनच्यवानां घोषो देवानां जयता मुदस्थात् । अस्माकमिन्द्रःसमृतेषुध्वजेष्वस्माकं या इषवस्ता जयन्तु ।

अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु । उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां महाग्ंसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः । उपप्रेत जयता नरःस्थिरावःसन्तु बाहवः । इन्द्रो वः शर्म यच्छत्वनाधृष्या यथासथ । अवसृष्टा परापतशरव्ये ब्रह्म सग्ंशिता । गच्छामित्रान् प्रविश मैषां कञ्चनोच्छिषः । मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजामृतेनाभिवस्ताम्।

www.pradosham.com

उरोर्वरीयो वरिवस्ते अस्तु  जयन्तं त्वामनु मदन्तु देवाः । यत्र बाणास्सम्पतन्ति कुमारा विशिखा इव । इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥

**ॐ नमो भगवते रुद्राय ॥ आशुश्शिशानोऽप्रतिरथं कवचाय हुम्॥**

## xii. प्रतिपूरुषमित्त्यनुवाक: (नेत्रम्)

प्रतिपूरुष मेककपालान्निर्वपत्येकमतिरिक्तं यावन्तोगृह्या:समस्तेभ्यः कमकरं पशूनागं् शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वीतीयाय तस्थ आखुस्ते रुद्र पुशुस्तं जुषस्वैष ते रुद्रभागः सह स्वस्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजगं् सुभेषजं यथासति। सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् । यथा नः श्रेयसः करद्यथा नो वस्य सः करद्यथानः पशुमतः करद्यथा नो व्यवसाययात् । त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् । एषते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवतत धन्वा पिनाकहस्तः कृत्तिवासाः ॥

प्रतिपूरुषमेककपालान्निर्वपति । जाता एवः प्रजा रुद्रान्निरवदयते । एकमतिरिक्तम् । जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते । एककपाला भवन्ति । एकधैव रुद्रं निरवदयते । नाभिघारयति । यदभिघारयेत् । अन्तरवचारिणगं् रुद्रं कुर्यात् । एकोल्मुकेन यन्ति । (१) तद्धि रुद्रस्य भागधेयम्। इमां दिशंयन्ति। एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते। रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात् । यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति । यदि न द्विष्यात् । आखुस्ते पशुरिति ब्रूयात् ।

(२) न ग्राम्यान् पशून् हिनस्ति । नारण्यान् । चतुष्पथे जुहोति । एष वा अग्नीनां पड्बीशो नाम। अग्निवत्येव जुहोति । मध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु। अन्तमेनैव होतव्यम्। अन्तत एव रुद्रं निरवदयते । (३) एष ते रुद्र भागः सहस्वस्रा-

म्बिकयेत्याह । शरद्वा अस्याम्बिका स्वसा । तया वा एष हिनस्ति । यगं् हिनस्ति । तयैवैनगं् सह शमयति । भेषजङ्गवइत्याह । यावन्त एव ग्राम्या:पशव: । तेभ्यो भेषजङ्करोति । अवाम्ब रुद्रमदिमहीत्याह ।

आशिषमेवैतामाशास्ते । (४) त्र्यम्बकं यजामह इत्याह । मृत्योर्मुक्षीय मामृतादिति वा वै तदाह । उत्किरन्ति । भगस्य लीप्सन्ते। मूते कृत्वाऽसजन्ति । यथा जनं यतेऽवसङ्करोति । तादृगेवतत् । एष ते रुद्र भाग इत्याह निरवत्त्यै । अप्रतीक्षमायन्ति । अप: परिषिञ्चति। रुद्रस्यान्तर्हित्यै । प्रवा एतेऽस्माल्लोकाच्च्यवन्ते । ये त्र्यम्बकैश्चरन्ति । आदित्यं चरुं पुनरेत्य निर्वपति । इयं वा अदिति:। अस्यामेव प्रतितिष्ठन्ति ॥

विभ्राड् भृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतो यो अभिरक्षतित्मना प्रजा: पुपोष पुरुधा विराजति ॥

**ॐ नमो भगवते रुद्राय । प्रतिपूरुषं प्रतिपूरुषं विभ्राडिति नेत्रत्रयाय वौषट्** ॥

## xiii. त्वमग्नेऽनुवाक: (शतरुद्रीयम्)

*(The entire Sri Rudram is called "Shatharudreeyam" - beginning from "Tvamagne", it is generally recited along with Mahanyasam and these portions have been taken from Vedas.)*

त्वमग्ने रुद्रो असुरो महो दिव:। त्वगं् शर्द्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शङ्गय:। त्वं पूषा विधत: पासि नुत्मना। देवा देवेषु श्रयद्ध्वम्। प्रथमा द्वितीयेषु श्रयद्ध्वम्। द्वितीयास्तृतीयेषु श्रयद्ध्वम्। तृतीयाश्चतुर्थेषु श्रयद्ध्वम् । चतुर्था: पञ्चमेषु श्रयद्ध्वम्। पञ्चमा: षष्ठेषु श्रयद्ध्वम्। (१) षष्ठा: सप्तमेषु श्रयद्ध्वम्। सप्तमा अष्टमेषु श्रयद्ध्वम्। अष्टमा नवमेषु श्रयद्ध्वम् । नवमा दशमेषु श्रयद्ध्वम्। दशमा एकादशेषु श्रयद्ध्वम्। एकादशा द्वादशेषु श्रयद्ध्वम् । द्वादशास्त्रयोदशेषु श्रयद्ध्वम्। त्रयोदशाश्चतुर्दशेषु श्रयद्ध्वम् । चतुर्दशा: पञ्चदशेषु श्रयद्ध्वम् । पञ्चदशा: षोडशेषु श्रयद्ध्वम् (२) षोडशा: सप्तदशेषु

श्रयद्ध्वम् । सप्तदशा अष्टादशेषु श्रयद्ध्वम् । अष्टादशा एकोन्नविग्ंशेषु श्रयद्ध्वम् । एकान्नविग्ंशा विग्ंशेषु श्रयद्ध्वम् । विग्ंशा एकविग्ंशेषु श्रयद्ध्वम्। एकविग्ंशा द्वाविग्ंशेषु श्रयद्ध्वम् । द्वाविग्ंशास्त्रयो विग्ंशेषु श्रयद्ध्वम् । त्र्योविग्ंशाश्चतुर्विग्ं शेषु श्रयद्ध्वम् । चतुर्विग्ंशाः पञ्चविग्ंशेषु श्रयद्ध्वम्। पञ्चविग्ंशाष्षड्विग्ंशेषु श्रयद्ध्वम्। (३) षडविग्ंशाः सप्तविग्ंशेषु श्रयद्ध्वम्। सप्तविग्ंशा अष्टाविग्ंशेषु श्रयद्ध्वम्। अष्टाविग्ंशा एकान्नत्रिग्ंशेषु श्रयद्ध्वम्। एकोन्नत्रिग्ंशास्त्रिग्ंशेषु श्रयद्ध्वम्। त्रिग्ंशा एकत्रिग्ंशेषु श्रयद्ध्वम्। एकत्रिग्ंशा द्वात्रिग्ंशेषु श्रयद्ध्वम्। द्वात्रिग्ंशास्त्रयस्त्रिग्ंशेषु श्रयद्ध्वम्। देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिग्ंशाः । उत्तरे भवत। उत्तर वर्त्मान उत्तर सत्वानः । यत्काम इदं जुहोमि । तन्मे समृद्ध्यतां । वयग्स्याम पतयो रयीणाम्। भूर्भुवस्वःस्वाहा ||

**ॐ नमो भगवते रुद्राय । त्वमग्ने त्वमग्ने शतरुद्रीयमित्यस्त्राय फट् ||**

## xiv. पञ्चाङ्कजपं

सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्वमाम्।भवोद्भवाय नमः||(१)

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः || (२)

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्र रूपेभ्यः || (३)

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् || (४)

ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्|| (५)

## xv. अष्टाङ्ग प्रणामं (नमस्कारः)

*(Each part of the body namely heart, head, view through eyes, speech, hands, ears - all 8 portions should be invoked with Shiva roopa and prayed 8 times. Prostrate when "UmamaheshvarabhyAm" is recited.)*

१) हिरण्यगर्भःसमवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ **उरसा नमः** ॥ उमामहेश्वराभ्यां नमः ॥

२) यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ **शिरसा नमः** ॥ उमामहेश्वराभ्यां नमः ॥

३) ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः । सबुध्निया उपमा अस्य विष्ठाः सतस्श्च योनिमसतश्च विवः ॥ **दृष्ट्या नमः** । उमामहेश्वराभ्यां नमः ॥

४) मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः ॥ **मनसा नमः**। उमामहेश्वराभ्यां नमः ॥

५) उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् । स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून् ॥ **वचसा नमः** ॥ उमामहेश्वराभ्यां नमः ॥

६) अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥ **पद्भ्यां नमः** ॥ उमामहेश्वराभ्यां नमः ॥

७) या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहा ॥ **कराभ्यां नमः** ॥ उमामहेश्वराभ्यां नमः ॥

८) इमं यमप्रस्तरमाहि सीदाङ्गिरोभिः पितृभिः संविदानः । आत्वा मन्त्राः कविशस्तावहन्त्वेना राजन् हविषा मादयस्व ॥ **कर्णाभ्यां नमः** ॥ उमामहेश्वराभ्यां नमः ॥

**उरसा शिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टांग उच्यते ॥**

www.pradosham.com

## 14. लघुन्यास:

*[Laghunyasam asserts here and forewarns you to meditate God Shiva and think as if you are His Swaroopam.]* **ॐ अथात्मानगं शिवात्मानगं श्रीरुद्ररुपं ध्यायेत्॥**

*[Pray God Shiva, sit in front of Him and be prepared to begin Sri Rudra, DhyAna, Archana, Abhishekam]*

शुद्धस्फटिकसंकाशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥
नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च वरेण्यमभय प्रदम् ॥
कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् । ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम् ॥
वृषस्कन्ध-समारुढं उमादेहार्ध-धारिणम् । अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम्॥
दिग्देवतासमायुक्तं सुरासुरनमसकृतम् । नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्॥
सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥

**अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्याम: । आदित एव तीर्थे स्नात्वा उदेत्य शुचि: प्रयतो ब्रह्मचारी शुक्लवासादेवाभिमुख: स्थित्वा आत्मनि देवता स्थापयेत् ।।**

*[When performing Nyasam by touching the related organ, respective meditating Devthas are invoked]*

प्रजनने ब्रह्मा तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयोर्हरस्तिष्ठतु। बाह्वोरिन्द्रस्तिष्ठतु । जठरेऽग्निस्तिष्ठतु । हृदये शिवस्थिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्ठेताम्। कर्णयोरश्विनौ तिष्ठेताम् । ललाटे-रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवस्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशङ्करौ तिष्ठेताम् सर्वतो वायुस्तिष्ठतु ।

**ततो बहिःसर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु ।**
मां रक्षन्तु ॥ सर्वान् महाजनान् रक्षन्तु ॥ यजमानं सह कुडुम्बं रक्षन्तु ॥

अग्निर्मे वाचि श्रितः । वाग्घृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । वायुर्मे प्राणे श्रितः। प्राणो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । सूर्यो मे चक्षुषि श्रितः । चक्षुर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । चन्द्रमा मे मनसि श्रितः । मनो हृदये । हृदयं मयि। अहममृते । अमृतं ब्रह्मणि । दिशो मे श्रोत्रे श्रिताः । श्रोत्रगं हृदये । हृदयं मयि । अहममृते। अमृतं ब्रह्मणि । आपो मे रेतसि श्रिताः । रेतो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पृथिवी मे शरीरे श्रिता। शरीरगं् हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि ।ओषधिवनस्पतयो मे लोमसु श्रिताः । लोमानि हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इन्द्रो मे बले श्रितः ।

www.pradosham.com

बलगं हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पर्जन्यो मे मूर्ध्नि श्रितः । मूर्धा हृदये। हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ईशानो मे मन्यौ श्रितः । मन्युर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूतमागात्। *[ring bell]*

वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

**एवं यथालिङ्गमङ्गानी संमृज्या देवमात्मानं च प्रत्या राधयेत्** ॥

आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः।आराधयामि भक्त्या त्वाम् अनुगृहाण महेश्वर॥

**हरहर नमः पार्वती पतये - हरहर महादेव** ॥ *[stop ringing bell]*

## 15. ध्यान श्लोकं

ध्यायेन्निरामयं वस्तु सर्गस्थिति-लयादिकम् । निर्गुणं निष्कलं नित्यं मनोवाचामगोचरम् ॥
गङ्गाधरं शशिधरं जटामकुटशोभितम् । श्वेतभूति-त्रिपुण्ड्रेण विराजित ललाटकम् ॥
लोचनत्रय-संपन्नं स्वर्णकुण्डल-शोभितम् । स्मेराननं चतुर्बाहुं मुक्ताहारोपशोभितम् ॥
अक्षमालां सुधाकुंभं चिन्मयीं मुद्रिकामपि । पुस्तकं च भुजै-र्दिव्यै-र्दधानं पार्वतीपतिम् ॥
श्वेताम्बरधरं श्वेतं रत्नसिंहासन-स्थितम् । सर्वाभीष्ट-प्रदातारं वटमूल-निवासिनम् ॥
(वामाङ्के संस्थितां गौरीं बालार्कायुत सन्निभाम् ॥)
जपाकुसुम-साहस्र-समान-श्रिय-मीश्वरीम् । सुवर्ण-रत्नखचित-मकुटेन विराजिताम् ॥
ललाटपट्टसंराजत्-संलग्न - तिलकाञ्चिताम् । राजीवायत-नेत्रान्तां नीलोत्पलदलेक्षणाम् ॥
सन्तप्त-हेमखचित-ताटङ्काभरणान्विताम् । ताम्बूल-चर्वण-रत-रक्तजिह्वा-विराजिताम् ॥
पताकाभरणोपेतां मुक्ताहारोपशोभिताम् । स्वर्णकङ्कण-संयुक्तैश्चातुर्भि-र्बाहुभि-र्युताम् ॥
सुवर्णरत्नखचित-काञ्चीदाम-विराजिताम् । कदलीललितस्तम्भ-र्सन्निभोरु-युगान्विताम् ॥
श्रिया विराजितपदां भक्तत्राण-परायणाम् । अन्योन्याश्लिष्टहृद्बाहु -गौरीशङ्कर-संज्ञकम् ॥
सनातनं परं ब्रह्म परमात्मान-मव्ययम् । आवाहयामि जगता-मीश्वरं परमेश्वरम् ॥
मङ्गलायतनं देवं युवानं अति सुन्दरम् । ध्यायेत्कल्पतरोर्मूले सुखासीनं सहोमया ॥
आगच्छ आगच्छ भगवन् देवेश परमेश्वर । सच्चिदानन्द भूतेश पार्वतीश नमोस्तु ते ॥
*[ring bell]*

आत्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः । वाताजितै-र्बलवद्भि-र्मनोजवै-रायाहि शीघ्रं मम हव्याय शर्वोम् ॥ ईशानमावाहयामीत्यावाह्य ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् । गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

## 16. ध्यान-आवाहन विधि:

१. ॐ गणानां त्वा गणपतिग्ं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिःसीद सादनम् ॥ ॐ भूर्भुवःसुवरोम्। अस्मिन् बिम्बे महागणपतिं ध्यायामि आवाहयामि ॥

२. ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमही । तन्नो नन्दिः प्रचोदयात् ॥ ॐ भूर्भुवःसुवरोम्। अस्मिन् बिम्बे नन्दीकेश्वरं ध्यायामि आवाहयामि ॥

३. ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ॐ भूर्भुवःसुवरोम्। अस्मिन् लिङ्गे सोमास्कन्द स्वरूपेण परमेश्वरं ध्यायामि। आवाहयामि ॥

४. आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेऽऽनादेवो याति भुवना विपश्यन् । ॐ भास्कराय विद्महे महद्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । ॐ भूर्भुवः सुवरोम् । अस्मिन् स्फटिकबिम्बे छायासंज्ञासमेत श्रीसूर्यनारायणं ध्यायामि। आवाहयामि ॥

५. सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम्। नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । ॐ भूर्भुवःसुवरोम् । अस्मिन् साळग्रामचक्रे श्रीभूमी नीळा समेत श्रीमहाविष्णुं ध्यायामि। आवाहयामि ॥

६. जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुंदुरिताऽत्यग्निः । प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनाम वित्र्यवतु । महासरस्वत्यै

नमः। हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीम् लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीं। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहं। ॐ भूर्भुवःसुवरोम्। अस्मिन् बिम्बे दुर्गा-सरस्वती-लक्ष्मीं ध्यायामि। आवाहयामि ||

७. निघृष्वैरसमायुतैः। कालैर्हरित्वमापन्नैः। इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः। वायुश्श्वेतसिकद्रुकः। संवत्सरो विषूवर्णैः । नित्यास्तेऽनुचरास्तव । सुब्रह्मण्योगं सुब्रह्मण्योगं सुब्रह्मण्योम् । ॐ भूर्भुवःसुवरोम् । अस्मिन् बिम्बे वळ्ळी-देवसेना समेत सुब्रह्मण्यस्वामिन् ध्यायामि। आवाहयामि ||

८. धाताविधातापरमोतसंदृक्-प्रजापतिःपरमेष्ठीविराजा । स्तोमाश्छंदांग् सिनिविदोम आहुरेतस्मैराष्ट्रमभिसन्नमाम । अभ्यावर्तद्वमुपमेतसाकमयग् शास्ताधिपतिर्वो अस्तु। अस्य विज्ञानमनुसग्ंरभध्वमिमं पश्चादनुजीवाथसर्वे। ॐ भूर्भुवःसुवरोम्। अस्मिन् बिम्बे **पूर्णापुष्कलाम्बा समेत** हरिहरपुत्र स्वामिन् ध्यायामि। आवाहयामि ||

९. अन्नपूर्णे सदापूर्णे शङ्कर प्राणवल्लभे । ज्ञान वैराग्य सिध्यर्थं भिक्षां देहि च पार्वती। माता मे पार्वती देवी पिता देवो महेश्वरः । बान्धवाः शिव भक्ताश्च स्वदेशो भुवनत्रयं ||
ॐ भूर्भुवःसुवरोम्। अस्मिन् बिम्बे अन्नपूर्णेश्वरिं ध्यायामि। आवाहयामि || *[stop ringing bell]*

## 17. सद्यो जाताय पञ्चकलशेषु पूजा

१. सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्वमाम्। भवोद्भवाय नमः|| ॐ भूर्भुवःसुवरोम्। अस्मिन् पश्चिमकलशे सद्योजातं ध्यायामि। आवाहयामि ||

२. वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ||
ॐ भूर्भुवःसुवरोम् । अस्मिन् उत्तरकलशे वामदेवं ध्यायामि । आवाहयामि ||

३. अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ||
ॐ भूर्भुवःसुवरोम् । अस्मिन् दक्षिणकलशे अघोरं ध्यायामि । आवाहयामि ।

www.pradosham.com

४. तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ॐ भूर्भुवःसुवरोम् । अस्मिन् पूर्वकलशे तत्पुरुषं ध्यायामि । आवाहयामि ॥

५. ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

ॐ भूर्भुवःसुवरोम्। अस्मिन् मध्यमकलशे ईशानं ध्यायमि । आवाहयामि।

## 18. प्राणप्रतिष्ठा

आदित्यात्मक रुद्रस्य, प्राणप्रतिष्ठामहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांसि। सकलजगत्सृष्टिस्थिति संहार कारिणी प्राणशक्तिः परादेवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । आदित्यात्मकरुद्रस्य प्राणप्रतिष्ठार्थे जपे विनियोगः ॥

आं - अंगुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां नमः । क्रों मध्यमाभ्यां नमः । आं अनामिकाभ्यां नमः । ह्रीं कनिष्ठकाभ्यां नमः । क्रों करतलकरपृष्ठाभ्यां नमः ॥

आं हृदयाय नमः । ह्रीं शिरसे स्वाहा । क्रों शिखायै वषट् । आं कवचाय हुं । ह्रीं नेत्रत्रयाय वौषट् । क्रों अस्त्राय फट् । भूर्भूवस्सुवरोमिति दिग्बन्धः ॥

**॥ ध्यानम् ॥**

रक्ताम्भोधिस्थ पोतोल्लसदरुण सरोजाधिरूढाकराब्जैः पाशं कोदण्डमिक्षूद्भवमळिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं त्रिणयन लसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरीप्राणशक्तिः परा नः॥

लं पृथिव्यात्मिकायै गन्धं समर्पयामि । हं आकाशात्मिकायै पुष्पैः पूजयामि । यं वाय्वात्मिकायै धूपमाघ्रापयामि । रं अग्न्यात्मिकायै दीपं दर्शयामि । वं अमृतात्मिकायै अमृतं महानैवेद्यं निवेदयामि । सं सर्वात्मिकायै सर्वोपचार पूजां समर्पयामि ॥

आं ह्रीं क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । आदित्यात्मक रुद्रस्य प्राण इह प्राणाः ॥

आं ह्री क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । आदित्यात्मक रुद्रस्य जीव इह स्थितः ॥

आं ह्रीं क्रों, क्रों ह्रीं आं यरलवशषसहोम् । क्षं हंसः सोऽहं, सोऽहं हंसः । आदित्यात्मक रुद्रस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्र-जिह्वा-घ्राण-प्रानापान-व्यानोदान-समाना इहैवागत्य इहैवास्मिन् लिङ्गे सुखं चिरं तिष्ठन्तु स्वाहा ॥ (ॐ ह्रीं नमःशिवाय।)

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नस्स्वस्ति ॥

आवाहितो भव। स्थापितो भव। सन्निहितो भव। सन्निरुद्धो भव।
अवकुण्ठितो भव। सुप्रीतो भव। सुप्रसन्नो भव। वरदो भव।
सर्वाभीष्टप्रदो भव। स्वागतमस्तु । प्रसीद प्रसीद ॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥

आदित्यात्मकरुद्रस्य प्राणान् प्रतिष्ठापयामि ॥ (पंचोपचार पूजा ॥ यत्किंचिन्निवेदनम्॥) **अत्रागच्छ** ॥

## 19. उपचारमन्त्रं

१) ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम्।

ॐ **नमस्ते रुद्र मन्यव उतोत इषवे नमः | नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः** ॥ ॐ ह्रीं नमःशिवाय । सद्योजातं प्रपद्यामि। ॐ भूर्भुवःसुवरोम् । अस्मिन् लिङ्गे महादेवं ध्यायामि, आवाहयामि।

शिवं ध्यायामि आवाहयामि। रुद्रं ध्यायामि आवाहयामि। शङ्करं ध्यायमि आवाहयामि। नीललोहितं ध्यायामि आवाहयामि। ईशानं ध्यायामि आवाहयामि। विजयं ध्यायामि आवाहयामि। भीमं ध्यायामि आवाहयामि। देवदेवं ध्यायामि आवाहयामि। भवोद्भवं ध्यायामि आवाहयामि। आदित्यात्मक श्री रुद्रं ध्यायामि आवाहयामि।

२) पुरुष एवेदगं सवम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। **या त इषुः शिवतमा शिवम् बभूव ते धनुः | शिवा शरव्या या तव तया नो रुद्र मृडय** ॥

ॐ ह्रीं नमःशिवाय । सद्यो जाताय वै नमो नमः । रत्न सिंहासनं समर्पयामि।

३) एतावानस्य महिमा। अतो ज्यायाग्श्च पूरुषः। पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। **या ते रुद्र शिवा तनूरघोराऽपापकाशिनी | तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि** ॥

ॐ ह्रीं नमःशिवाय । भवे भवे नातिभवे भवस्वमां । पादयोः पाद्यं समर्पयामि ।

४) त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि। **यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे |शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत्** ॥

ॐ ह्रीं नमःशिवाय । भवोद्भवाय नमः । अर्घ्यं समर्पयामि ।

www.pradosham.com

५) तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः ।

**शिवेन वचसा त्वा गिरिशाच्छावदामसि | यथा नः सर्वमिज्जगदयक्ष्मगं् सुमना असत्॥**

ॐ ह्रीं नमःशिवाय । वामदेवाय नमः। आचमनीयं समर्पयामि ।

६) यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः ।

**अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् | अहीगं्श्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः॥**

ॐ ह्रीं नमःशिवाय । ज्येष्ठाय नमः । मधुपर्कं समर्प्यामि ।

७) सप्तास्यासन्परिधयः । त्रिःसप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ।

**असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः | ये चेमागं् रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागं् हेड ईमहे॥** ॐ ह्रीं नमःशिवाय । श्रेष्ठाय नमः ॥ स्नानं समर्पयामि । स्नानानन्तरं आचमनीयं समर्पयामि॥

८) तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः । तेन देवा अयजन्त। साध्या ऋषयश्च ये। **असौ योऽवसर्पति नीलग्रीवो विलोहितः | उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ॥ उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः |** ॐ ह्रीं नमःशिवाय । रुद्राय नमः । वस्त्रोत्तरीयं समर्पयामि ।

९) तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये ।

**नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे॥ अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः |**

ॐ ह्रीं नमःशिवाय । कालाय नमः। यज्ञोपवीताभरणार्थे अक्षतान् समर्पयामि॥

१०) तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दाग्ंसिजज्ञिरे तस्मात्। यजुस्तस्मादजायत॥ **प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्॥ याश्च ते हस्त इषवः परा ता भगवो वप |**

ॐ ह्रीं नमःशिवाय । कलविकरणाय नमः। दिव्य परिमळगन्धान् धारयामि। गन्धस्योपरि हरिद्रा कुङ्कुमं समर्पयामि।

११) तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः।

**अवतत्य धनुस्त्वगं् सहस्राक्ष शतेषुधे॥ निशीर्य शल्यानां मुखा शिवो नः सुमना भव |**

ॐ ह्रीं नमःशिवाय । बलविकरणाय नमः। पुष्पमालां समर्पयामि। पुष्पैः पूजयामि।

www.pradosham.com

## गणपति पूजा - (दूर्वा युग्मं to be used)

ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः। ॐ कपिलाय नमः। ॐ गजकर्णकाय नमः।
ॐ लम्बोदराय नमः। ॐ विकटाय नमः। ॐ विघ्नराजाय नमः। ॐ विनायकाय नमः।
ॐ धूमकेतवे नमः । ॐ गणाध्यक्षाय नमः। ॐ फालचन्द्राय नमः। ॐ गजाननाय नमः।
ॐ वक्रतुण्डाय नमः। ॐ शूर्पकर्णाय नमः। ॐ हेरम्बाय नमः। ॐ स्कन्दपूर्वजाय नमः।
ॐ सिद्धिविनायकाय नमः। ॐ महागणपतये नमः नानाविध परिमळपत्रपुष्पाणि समर्पयामि॥

## श्री नन्दिकेश्वर षोडशोपचार पूजा - (*दूर्वा युग्मं to be used*)

ॐ नन्दिकेशाय नमः। ॐ ब्रह्मरुपिणे नमः। ॐ वृषभाय नमः।
ॐ शिवप्रियाय नमः। ॐ नठनाय नमः। ॐ चितचामरधारिणे नमः।
ॐ मत्त शृङ्गिने नमः। ॐ नवतृण प्रियाय नमः। ॐ करुणाकराय नमः।
ॐ सोम सूर्याग्निलोचनाय नमः। ॐ श्वेतचामर भूषणाय नमः। ॐ तिलतण्डुलभक्षणाय नमः।
ॐ शिलादन सुनन्दनाय नमः। ॐ वीर घण्टाधराय नमः ॥

## शिव पूजा - (*बिल्व दळं to be used*)

ॐ भवाय देवाय नमः। ॐ शर्वाय देवाय नमः। ॐ ईशानाय देवाय नमः ।
ॐ पशुपतये देवाय नमः। ॐ रुद्राय देवाय नमः। ॐ उग्राय देवाय नमः ।
ॐ भीमाय देवाय नमः। ॐ महते देवाय नमः ।

## अम्बिका पूजा - (*अरळि पुष्पं or any red color flower to be used*)

ॐ भवस्य देवस्य पत्न्यै नमः । ॐ शर्वस्य देवस्य पत्न्यै नमः । ॐ ईशानस्य देवस्य पत्न्यै नमः ।
ॐ पशुपतेर्देवस्य पत्न्यै नमः । ॐ रुद्रस्य देवस्य पत्न्यै नमः । ॐ उग्रस्य देवस्य पत्न्यै नमः ।
ॐ भीमस्य देवस्य पत्न्यै नमः । ॐ महतो देवस्य पत्न्यै नमः ।

## साम्बपरमेश्वर पूजा - (*mixed flower be used*)

| | | |
|---|---|---|
| ॐ भवान्यै नमः | भवाय नमः | पादौ पूजयामि |
| ॐ जगन्मात्रे नमः | जगत्पित्रे नमः | जङ्घे पूजयामि । |
| ॐ मृडान्यै नम : | मृडाय नमः | जानुनी पूजयामि । |
| ॐ रुद्राण्यै नम : | रुद्राय नमः | ऊरु पूजयामि । |
| ॐ काळ्यै नमः | कलान्तकाय नमः | कटिं पूजयामि । |
| ॐ नगेन्द्रकन्यकायै नमः | नागेन्द्रभरणाय नमः | नाभिं पूजयामि । |

www.pradosham.com

| | | |
|---|---|---|
| ॐ स्तवप्रियायै नमः | स्तव्याय नमः | स्तनौ पूजयामि । |
| ॐ भवन्यै नमः | भवनाशनाय नमः | भुजद्वयं पूजयामि । |
| ॐ कम्बुग्रीवायै नमः | कालकण्ठाय नमः | कण्ठं पूजयामि । |
| ॐ मायायै नमः | महेश्वराय नमः | मुखमण्डलं पूजयामि । |
| ॐ ललितायै नमः | लास्यप्रियाय नमः | ललाटान्तं पूजयामि । |
| ॐ शिवायै नमः | शिवाय नमः | शिरः पूजयामि । |
| ॐ प्रणतार्तिहरायै नमः | प्रणतार्तिहराय नमः | पुनः पादौ पूजयामि। |
| ॐ सर्वेश्वर्यै नमः | सर्वेश्वराय नमः | सर्वाण्यङ्गानि पूजयामि । |

## लिङ्ग पूजा - (Left to right sequence)

| | | |
|---|---|---|
| ॐ शिवलिङ्गाय नमः | ॐ अद्भुतलिङ्गाय नमः | ॐ अनुगतलिङ्गाय नमः |
| ॐ अव्यक्तलिङ्गाय नमः | ॐ अर्थलिङ्गाय नमः | ॐ अच्युतलिङ्गाय नमः |
| ॐ अनागतलिङ्गाय नमः | ॐ अनन्तलिङ्गाय नमः | ॐ अखिलेशलिङ्गाय नमः |
| ॐ अन्धकनाशलिङ्गाय नमः | ॐ अनन्तकसम्हारलिङ्गाय नमः | ॐ अगणितगुणलिङ्गाय नमः |
| ॐ अथर्वलिङ्गाय नमः | ॐ अष्ठदिगीश्वरपूजितलिङ्गाय नमः | ॐ अनादिलिङ्गाय नमः |
| ॐ अघोरलिङ्गाय नमः | ॐ अप्लिङ्गाय नमः | ॐ अमृतलिङ्गाय नमः |
| ॐ आदिलिङ्गाय नमः | ॐ आनन्दलिङ्गाय नमः | ॐ आश्रितरक्षकलिङ्गाय नमः |
| ॐ आर्जितपापविनाशलिङ्गाय नमः | ॐ आगमलिङ्गाय नमः | ॐ आत्मलिङ्गाय नमः |
| ॐ आकाशलिङ्गाय नमः | ॐ इन्दुकलाधरलिङ्गाय नमः | ॐ इन्द्रशापविमोचनलिङ्गाय नमः |
| ॐ ईशलिङ्गाय नमः | ॐ ईशानलिङ्गाय नमः | ॐ उरगविभूषणलिङ्गाय नमः |
| ॐ ऊर्ध्वलिङ्गाय नमः | ॐ ऋग्वेदश्रुतिलिङ्गाय नमः | ॐ ॠवन्द्यलिङ्गाय नमः |
| ॐ लृतभवपाशप्रभञ्जनलिङ्गाय नमः | ॐ एकलिङ्गाय नमः | ॐ ऐश्वर्यलिङ्गाय नमः |
| ॐ ॐकाराधिपलिङ्गाय नमः | ॐ औरसलाळितलिङ्गाय नमः | ॐ अम्बुजासनस्तुतलिङ्गाय नमः |
| ॐ अःक्षीणतेजोलिङ्गाय नमः | ॐ कनकलिङ्गाय नमः | ॐ करुणालयलिङ्गाय नमः |
| ॐ काशिलिङ्गाय नमः | ॐ कान्तिमतिप्रियलिङ्गाय नमः | ॐ केदारलिङ्गाय नमः |
| ॐ खण्डपरशुमृगडङ्गधनुर्धरलिङ्गाय नमः | ॐ गङ्गाधरलिङ्गाय नमः | ॐ गणलिङ्गाय नमः |
| ॐ गिरीशलिङ्गाय नमः | ॐ गुणहितलिङ्गाय नमः | ॐ घनलिङ्गाय नमः |
| ॐ घण्ठानादप्रियलिङ्गाय नमः | ॐ ङप्रियलिङ्गाय नमः | ॐ चन्दनलेपनलिङ्गाय नमः |
| ॐ चिदम्बरलिङ्गाय नमः | ॐ चिन्मयलिङ्गाय नमः | ॐ छत्रीकृतयशोलिङ्गाय नमः |
| ॐ छिन्नपापकृतलिङ्गाय नमः | ॐ जललिङ्गाय नमः | ॐ झरिताशेषपातकलिङ्गाय नमः |
| ॐ ज्ञानलिङ्गाय नमः | ॐ ज्ञानाज्ञातविनाशलिङ्गाय नमः | ॐ टङ्कितखिललोकलिङ्गाय नमः |
| ॐ ठस्वरूपलिङ्गाय नमः | ॐ डमरुकप्रियलिङ्गाय नमः | ॐ ढक्कानादप्रीतलिङ्गाय नमः |
| ॐ णदलिङ्गाय नमः | ॐ णगम्यलिङ्गाय नमः | ॐ तत्वरूपलिङ्गाय नमः |
| ॐ तापनिवारणलिङ्गाय नमः | ॐ तेजोमयलिङ्गाय नमः | ॐ त्रयंबकलिङ्गाय नमः |
| ॐ थरूपलिङ्गाय नमः | ॐ दमस्वरूपलिङ्गाय नमः | ॐ दानवनाशकलिङ्गाय नमः |

| | | |
|---|---|---|
| ॐ धनदार्चितलिङ्गाय नमः | ॐ धनञ्जयवरलिङ्गाय नमः | ॐ नन्दिवाहनलिङ्गाय नमः |
| ॐ नाथलिङ्गाय नमः | ॐ नागेशलिङ्गाय नमः | ॐ नियमार्चितलिङ्गाय नमः |
| ॐ निर्मललिङ्गाय नमः | ॐ परेशलिङ्गाय नमः | ॐ पाताळलिङ्गाय नमः |
| ॐ पूर्णलिङ्गाय नमः | ॐ प्रथिविलिङ्गाय नमः | ॐ फालविलोचनलिङ्गाय नमः |
| ॐ बन्धविमोचनलिङ्गाय नमः | ॐ बाणलिङ्गाय नमः | ॐ भस्मविलेपनलिङ्गाय नमः |
| ॐ भीमशङ्करलिङ्गाय नमः | ॐ भुवनव्यापकलिङ्गाय नमः | ॐ भैरवलिङ्गाय नमः |
| ॐ मङ्गळप्रदलिङ्गाय नमः | ॐ महाबललिङ्गाय नमः | ॐ महाकाळलिङ्गाय नमः |
| ॐ मूर्तिलिङ्गाय नमः | ॐ यज्ञाङ्गलिङ्गाय नमः | ॐ यतिसेवितलिङ्गाय नमः |
| ॐ रमणीयलिङ्गाय नमः | ॐ रामेशलिङ्गाय नमः | ॐ रहस्यलिङ्गाय नमः |
| ॐ रुद्रलिङ्गाय नमः | ॐ लङ्केशलिङ्गाय नमः | ॐ लावण्यलिङ्गाय नमः |
| ॐ वह्निलिङ्गाय नमः | ॐ वायुभूतकाळहस्तीशलिङ्गाय नमः | ॐ विभिषणलिङ्गाय नमः |
| ॐ वेदलिङ्गाय नमः | ॐ शङ्करलिङ्गाय नमः | ॐ श्रीशैललिङ्गाय नमः |
| ॐ षाट्गुण्यातीतलिङ्गाय नमः | ॐ संसारार्णवतारणलिङ्गाय नमः | ॐ सर्वपापनाशकलिङ्गाय नमः |
| ॐ साक्षिलिङ्गाय नमः | ॐ सोमेशलिङ्गाय नमः | ॐ हररूपलिङ्गाय नमः |
| ॐ इकुबीशलिङ्गाय नमः | ॐ क्षमाक्षेत्रलिङ्गाय नमः | |

## श्री सूर्य षोडशोपचारपूजा (*अरळि पुष्पं*/*red color flower to be used*)

| | | | |
|---|---|---|---|
| ॐ मित्राय नमः। | ॐ रवये नमः। | ॐ सूर्याय नमः। | ॐ भानवे नमः। |
| ॐ खगाय नमः। | ॐ पूष्णे नमः। | ॐ हिरण्यगर्भाय नमः। | ॐ मरीचये नमः। |
| ॐ आदित्याय नम। | ॐ सवित्रे नमः। | ॐ अर्काय नमः। | ॐ भास्कराय नमः। |

ॐ श्री छायासंज्ञासमेत श्री सूर्यनारायणस्वामिने नमः ॥

## श्री विष्णु षोडशोपचारपूजा - (*तुलसी दलं to be used*)

| | | |
|---|---|---|
| ॐ अच्युताय नमः। | ॐ अनन्ताय नमः। | ॐ गोविन्दाय नमः। |
| ॐ केशवाय नमः । | ॐ नारायणाय नमः। | ॐ माधवाय नमः। |
| ॐ गोविन्दाय नमः। | ॐ विष्णवे नम :। | ॐ मधुसूदनाय नमः। |
| ॐ त्रिविक्रमाय नमः। | ॐ वामनाय नमः। | ॐ श्रीधराय नमः । |
| ॐ हृषीकेशाय नमः। | ॐ पद्मनाभाय नमः। | ॐ दामोदराय नमः । |
| ॐ सङ्कर्षणाय :। | ॐ वासुदेवाय नमः। | ॐ प्रद्युम्नाय नमः । |
| ॐ अनिरुद्धाय नमः। | ॐ पुरुषोत्तमाय नमः। | ॐ अधोक्षजाय नमः। |
| ॐ नारसिंहाय नमः। | ॐ अच्युताय नमः। | ॐ जनार्दनाय नमः । |
| ॐ उपेन्द्राय नमः। | ॐ हरये नमः। | ॐ श्रीकृष्णाय नमः॥ |

श्री भूमिनीळासमेत श्री महाविष्णवे नमः॥

सीता लक्ष्मण भरतशत्रुघ्न (अभयहस्त) हनूमत्समेत श्रीरामचन्द्र स्वामिने नमः॥

www.pradosham.com

## श्री दुर्गा षोडशोपचारपूजा - *(Any red flower to be used)*

ॐ दुर्गायै नमः। ॐ भद्रकाळ्यै नमः। ॐ विजयायै नमः। ॐ वैष्णव्यै नमः ।
ॐ कुमुदायै नमः। ॐ चण्डिकायै नमः। ॐ कृष्णायै नमः। ॐ माधव्यै नमः ।
ॐ कन्यकायै नमः। ॐ मायायै नमः। ॐ नारायण्यै नमः। ॐ ईशान्यै नमः ।
ॐ शारदायै नमः। ॐ अम्बिकायै नमः। ॐ श्री दुर्गादेव्यै नमः ||

## श्री लक्ष्मी षोडशोपचारपूजा - *(Any red flower to be used)*

ॐ धनलक्ष्म्यै नमः। ॐ धान्यलक्ष्म्यै नमः। ॐ गजलक्ष्म्यै नमः।
ॐ गृहलक्ष्म्यै नमः। ॐ सन्तानलक्ष्म्यै नमः। ॐ वीर्यलक्ष्म्यै नमः।
ॐ विजयलक्ष्म्यै नमः। ॐ सौभाग्यलक्ष्म्यै नमः। ॐ महालक्ष्म्यै नमः।

## श्री सरस्वती षोडशोपचारपूजा - *(Any white flower can be used)*

ॐ सरस्वत्यै नमः। ॐ पुस्तकभृतायै नमः। ॐ ज्ञानमुद्रायै नमः।
ॐ वाग्देव्यै नमः। ॐ ब्रह्मज्ञानैकसाधनायै नमः। ॐ विद्यारूपायै नमः।
ॐ चित्रमाल्यविभूषितायै नमः। ॐ वारिजासनायै नमः। ॐ चतुर्वर्गफलप्रदायैनमः।

## श्री सुब्रह्मण्य षोडशोपचार पूजा

ॐ स्कन्दाय नमः। ॐ गुहाय नमः। ॐ षण्मुखाय नमः।
ॐ कार्तिकेयाय नमः । ॐ मयूरवाहनाय नमः। ॐ शिवकुमाराय नमः।
ॐ काङ्केयाय नमः । ॐ कुक्कुटध्वजाय नमः। ॐ शक्तिधराय नमः।
ॐ तारकासुरसंहारिणे नमः ॐ देवसेनाधिपतये नमः। ॐ वल्लीरमणाय नमः।
ॐ श्री सुब्रह्मण्याय नमः ।

## शास्ता - हरिहरपुत्र पूजा

ॐ भवस्य देवस्य सुताय नमः । ॐ शर्वस्य देवस्य सुताय नमः । ॐ ईशानस्य देवस्य सुताय नमः ।
ॐ पशुपतेः देवस्य सुताय नमः। ॐ रुद्रस्य देवस्य सुताय नमः । ॐ उग्रस्य देवस्य सुताय नमः ।
ॐ भीमस्य देवस्य सुताय नमः। ॐ महतो देवस्य सुताय नमः ।

## आञ्जनेय पूजा विधिः

ॐ श्री आञ्जनेयाय नमः । ॐ वायुपुत्राय नमः । ॐ ब्रह्मचारिणे नमः । ॐ सर्वारिष्टनिवारकाय नमः।
ॐ शुभकराय नमः । ॐ पिङ्गलाक्षाय नमः । ॐ अक्षापहाय नमः । ॐ सीतान्वेषणतत्पराय नमः ।

www.pradosham.com

ॐ कपिवराय नमः । ॐ कोटीन्दुसूर्यप्रभाय नमः । ॐ लङ्काकाद्वीप भयङ्कराय नमः । ॐ सकलताय नमः।ॐ सुग्रीवसम्मानिताय नमः । ॐ देवेन्द्रादि समस्तदेव विनुताय नमः । ॐ काकुत्स्थदूताय नमः। ॐ हनुमते नमः । ॐ श्री आञ्जनेयाय नमः ॥

१२. यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते।

**विज्यं धनुः कपर्दिनो विशल्यो बाणवागं उत॥ अनेशन्नस्येषव आभुरस्य निषङ्गथिः।**

ॐ ह्रीं नमःशिवाय । बलाय नमः ॥ धूपं आघ्रापयामि ॥

१३. ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः। पद्भ्यागं शूद्रो अजायत।

**या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः॥ तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज।**

ॐ ह्रीं नमःशिवाय । बलप्रमथनाय नमः । दीपं दर्शयामि॥ धूपदीपानन्तरम् आचमनीयं समर्पयामि ॥

१४. ॐ भूर्भुवःसुवः............. ब्रह्मणे स्वाहा ।

चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत।

**नमस्ते अस्त्वायुधायानातताय धृष्णवे॥ उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने।**

ॐ ह्रीं नमःशिवाय । सर्वभूतदमनाय नमः ॥ कदळी फलं महानैवेद्यं निवेदयामि ॥ मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि ॥ हस्तप्रक्षालणं समर्पयामि। पादप्रक्षालणं समर्पयामि । पुनराचमनीयं समर्पयामि।

१५. नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्ध्यां भूमिर्दिशः श्रोत्रात्। तथा लोकागं अकल्पयन् ॥ **परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः॥ अथो य इषुधिस्तवारे अस्मन्निधेहि तम्।**

ॐ ह्रीं नमःशिवाय । मनोन्मनाय नमः । कर्पूरताम्बूलं निवेदयामि ॥

१६. वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः।

नामानि कृत्वाऽभिवदन् यदास्ते।

**नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥**

ॐ ह्रीं नमःशिवाय । कर्पूरनीराजनं दर्शयामि। रक्ष रक्षान्धारयामि।

www.pradosham.com

१७. धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्त्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। ॐ ह्रीं नमःशिवाय । वेदोक्त मन्त्रपुष्पं समर्पयामि।

१८. यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐ ह्रीं नमःशिवाय । प्रदक्षिण नमस्कारान् समर्पायामि ॥

ॐ भवं देवं तर्पयामि । ॐ शर्वं देवं तर्पयामि । ॐ ईशानं देवं तर्पयामि। ॐ पशुपतिं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि। ॐ उग्रं देवं तर्पयामि। ॐ भीमं देवं तर्पयामि । ॐ महान्तं देवं तर्पयामि ॥

ॐ भवस्य देवस्य पत्नीं तर्पयामि । ॐ शर्वस्य देवस्य पत्नीं तर्पयामि । ॐ ईशानस्य देवस्य पत्नीं तर्पयामि । ॐ पशुपते देवस्य पत्नीं तर्पयामि । ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि । ॐ उग्रस्य देवस्य पत्नीं तर्पयामि । ॐ भीमस्य देवस्य पत्नीं तर्पयामि । ॐ महतो देवस्य पत्नीं तर्पयामि ॥

## 20. निर्माल्य मन्त्रं

आशास्तेऽयं यौ यजमानोऽसौ आयुराशास्ते। सुप्रजास्त्वमाशास्ते।
सजातवनस्यामाशास्ते। उत्तरान् देवयज्यामाशास्ते। भूयो हविष्करणमाशास्ते।
दिव्यं धामाशास्ते। विश्वं प्रियमाशास्ते। यदनेन हविषाशास्ते।
तदश्यात्तदृध्यात्। तदस्मै देवारासन्ताम्। तदग्नि र्देवो देवेभ्यो वनते।
वयमग्नेर्मानुषाः । इष्टं च वीतं च।

उभे च नो द्यावापृथिवी अग्ंहसस्पाताम्। इहगतिर्वामस्येदं च। नमो देवेभ्यः।
उत्तरतः चण्डीश्वराय नमः। निर्माल्यं विसृज्य॥

## 21. शिवमानस पूजा

आराधयामि मणिसन्निभ आत्मलिङ्गं मायापुरीहृदयपङ्कज सन्निविष्टिम्।
श्रद्धानदीविमलचित्त जलाभिषेकैः नित्यं समाधिकुसुमै रपुनर्भवाय ॥

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितम् गृह्यताम्॥१॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥

करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसंवापराधम्।
विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥५॥

## 22. श्री नन्दिकेश अनुज्ञैः पूजा विधिः

नन्दीश्वर महाभाग शिवध्यानपरायण । उमाशङकरसेवार्थम् अनुज्ञां दातुमर्हसि ।
नन्दिकेश नमस्तुभ्यं शान्तानन्द प्रधायकः । महादेवे च सेवार्थम् अनुज्ञां दातुमर्हसि ।
वन्दे वृषभदेवाय चितवर्ण स्वरूपिणे । तीक्ष्णश्रृङ्गाय तुङ्गाय वेदपादाय नन्दिने ॥

***(Oh reverred Nandikesha, who is always intent on meditating on Lord Shiva,
Kindly permit me to serve [worship] Lord Shiva, and Goddess Parvathi).***

वेदान्त वेद्याखिल विश्वमूर्ते विभो विरूपाक्ष विशेषशून्य । विश्वेश्वराशेष गणेश वन्द्याः कवाटमुद्धाटय कालकाल ॥ हस्तताडनं कृत्वा ॥ ***(Clap your hands two times in front of the Lord)***

## 23. श्री रुद्रप्रश्नः

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य, अघोर ऋषिः। अनुष्टुप्छन्दः, सङ्कर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषःस एष रुद्रो देवता । नमः शिवायेति बीजम् । शिवतरायेति शक्तिः । महादेवायेति कीलकम्। श्रीसाम्बसदाशिव-प्रसादसिध्यर्थे जपे विनियोगः ॥

ओं अग्निहोत्रात्मने अङ्कुष्ठाभ्यां नमः। दर्शपूर्णमासात्मने तर्जनीभ्यां नमः ।
चातुर्मास्यात्मने मध्यमाभ्यां नमः । निरुढपशुबन्धात्मने अनामिकाभ्यां नमः।
ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः। सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः ॥
अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्णमासात्मने शिरसे स्वाहा ।
चातुर्मास्यात्मने शिखायै वषट् । निरुढपशुबन्धात्मने कवचाय हुं ।
ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

## ध्यानम्

आपाताळनभःस्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुर-ज्ज्योतिःस्फाटिक-लिङ्ग-मौळि-विलसत्पूर्णेन्दु-वान्तामृतैः|

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन् ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम् ॥

**(पीठं यस्य धरित्री जलधर कलशं लिङ्गमाकश मूर्तिम् नक्षत्रं पुष्पमाल्यं ग्रह गण कुसुमं चन्द्रवह्न्यर्क नेत्रं। कुक्षिः सप्त समुद्रं भुजगिरि शिखरं सप्त पातालपातं वेदं वक्त्रं षडङ्गं दश दिशि वदनं दिव्य लिङ्गं नमामि॥)**

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः। त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदा रुद्राःश्रीरुद्रसूक्त-प्रकटित-विभवा नःप्रयच्छन्तु सौख्यम् ॥

शुद्धस्फटिकसङ्काशं शुद्धविद्याप्रदायकम् । शुद्ध पूर्णं चिदानन्दं सदाशिवमहं भजे ॥

ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिःसीद सादनम् ॥

## ॥ शान्तिपाठः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ (३)

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# ॥ श्री रुद्रप्रश्नः ॥

**ॐ नमो भगवते रुद्राय ॥**

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवम् बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥
यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे ।शिवां गिरित्र तां कुरु मा हिग्ंसीः पुरुषं जगत्॥

शिवेन वचसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदयक्ष्मग्ं सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीग्ंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाग्ं हेड
ईमहे ॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ॥
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः । नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये अस्य
सत्वानोऽहं तेभ्योऽकरन् नमः । प्रमुञ्च धन्वनस्त्व- मुभयोरार्त्नियोर्ज्याम् ॥ याश्च ते हस्त इषवः परा ता
भगवो वप । अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे ॥ निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत ॥ अनेशन्नस्येषव आभुरस्य निषङ्गथिः ।
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥ तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ।
नमस्ते अस्त्वायुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने ।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः॥ अथो य इषुधिस्तवारे अस्मन्निधेहि तम्।

**नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥१ ॥**

www.pradosham.com

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो
नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो
नमो हरिकेशायोपवीतिने पुष्टाणां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो
नमो रुद्रायाततविने क्षेत्राणां पतये नमो नमस्सूतायाहन्त्याय वनानां पतये नमो
नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणं पतये नमो
नमो भुवंतये वारिवस्कृधायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम् पतये नमो
नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥२॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो
निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो
नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिने गिरिचराय कुलुञ्चानां पतये नमो
नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्य प्रतिदधानेभ्यश्च वो नमो
नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो
नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो
नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो
नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥४॥

नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृग्ंहतीभ्यश्च वो नमो
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो
नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो

www.pradosham.com

नमो नमः कुलालेभ्यःकमारेभ्यश्च वो नमो नमःपुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ||४ ||

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृद्ध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्त्रोतस्याय च द्वीप्याय च || ५ ||

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च || ६ ||

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च || ७ ||

www.pradosham.com

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च **नमः शिवाय च** शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च॥ ८॥

नम इरिण्याय च प्रपथ्याय च नमः किग्ंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाग्ंसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः॥ ९॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत्॥ या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥ इमा१ँ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्।। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥ मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम्। मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते॥ आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः॥ स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। मृडा

www.pradosham.com

जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः॥ परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः| अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥ मीढुष्टम शिवतम शिवो नः सुमना भव | परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ विकिरिद विलोहित नमस्ते अस्तु भगवः | यास्ते सहस्रग्ं हेतयोन्यमस्मन्निवपन्तु ताः ॥ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः| तासामीशानो भगवः पराचीना मुखा कृधि ॥१० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् | तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ॥ नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः ॥ ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥ ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥ ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥ य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे ॥ तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि ॥ नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥ ११ ॥

**त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥** यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥ तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य | यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥ अयं मे हस्तो भ गवानयं मे भगवत्तरः | अयं मे विश्वभेषजोऽयग्ं शिवाभिमर्शनः ॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे | तान् यज्ञस्य मायया सर्वानव यजामहे | मृत्यवे स्वाहा मृत्यवे स्वाहा॥ ओं नमो भगवते

रुद्राय विष्णवे मृत्युर्मे पाहि ॥ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः | तेनान्नेनाप्यायस्व ॥ नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

**ॐ शान्तिः शान्तिः शान्तिः ॥**

www.pradosham.com

## 24. श्री चमकप्रश्न:

ॐ अग्नाविष्णू सजोषसेमावर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे ॥ (१)

**एष वै विभुर्नाम यज्ञः| सर्वग्ं ह वै तत्र विभुर्भवति** | **यत्रैतेन यज्ञेन यजन्ते** | **(१)** अनेन प्रथम वार रुद्र जपेन **तैल** अभिषेकेन भगवान् सर्वात्मकः **धीदेव्याक्य** रुद्राणी समेत **महादेव** रुद्र सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (१) ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्चमेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्य च्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ (२)

**एष वै प्रभुर्नाम यज्ञः| सर्वग्ं ह वै तत्र प्रभुर्भवति | यत्रैतेन यज्ञेन यजन्ते** | अनेन द्वितीय वार रुद्र जपेन **पञ्चगव्य** अभिषेकेन भगवान् सर्वात्मकः **वृत्तिदेव्याक्य** रुद्राणी समेत **शिवरुद्र** सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (२) ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ (३)

www.pradosham.com

**एष वा ऊर्जस्वान्नाम यज्ञः। सर्वग्ं ह वै तत्रोर्जस्वद्भवति । यत्रैतेन यज्ञेन यजन्ते ।** अनेन तृतीय वार रुद्र जपेन **पञ्चामृत** अभिषेकेन भगवान् सर्वात्मकः **उषणादेव्याक्य** रुद्राणी समेत **महारुद्र** सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (३)॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ (४)

**एष वै पयस्वान्नाम यज्ञः। सर्वग्ं ह वै तत्र पयस्वद्भवति । यत्रैतेन यज्ञेन यजन्ते ।** अनेन तुरीय वार रुद्र जपेन **घृत** अभिषेकेन भगवान् सर्वात्मकः **उमादेव्याक्य** रुद्राणी समेत **शङ्कर** रुद्र सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (४)॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ (५)

**एष वै विधृतो नाम यज्ञः। सर्वग्ं ह वै तत्र विधृतं भवति । यत्रैतेन यज्ञेन यजन्ते ।** अनेन पञ्चम वार रुद्र जपेन **क्षीर** अभिषेकेन भगवान् सर्वात्मकः **नियुत् देव्याक्य** रुद्राणी समेत **नीललोहित** रुद्र सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (५)॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे ब्रुहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे॥ (६)

**एष वै व्यावृत्तो नाम यज्ञः| सर्वग्ं ह वै तत्र व्यावृत्तं भवति | यत्रैतेन यज्ञेन यजन्ते** । अनेन षष्टम वार रुद्र जपेन **दधि** अभिषेकेन भगवान् सर्वात्मकः **सर्पि देव्याक्य** रुद्राणी समेत **ईशानरुद्र** सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (६) ॥

अग्ंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाग्ंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ (७)

**एष वै प्रतिष्ठितो नाम यज्ञः| सर्वग्ं ह वै तत्र प्रतिष्ठितं भवति | यत्रैतेन यज्ञेन यजन्ते** | अनेन सप्तम वार रुद्र जपेन **मधु** अभिषेकेन भगवान् सर्वात्मकः **इळा देव्याक्य** रुद्राणी समेत **विजय रुद्र** सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (६) ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धृष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ (८)

**एष वै तेजस्वी नाम यज्ञः| सर्वग्ं ह वै तत्र तेजस्वी भवति | यत्रैतेन यज्ञेन यजन्ते** | अनेन अष्टम वार रुद्र जपेन **इक्षुसार** अभिषेकेन भगवान् सर्वात्मकः **अम्बिका देव्याक्य** रुद्राणी समेत **भीम** रुद्र सुप्रीतः सुप्रसन्नो वरदो भवतु ॥ (८) ॥

अग्निश्च मे घर्मशच मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्॥ (९)

**एष वै ब्रह्मवर्चस्वी नाम यज्ञः| आह वै तत्र ब्राह्मणो ब्रह्मवर्चस्वी जायते | यत्रैतेन यज्ञेन यजन्ते|** अनेन नवमवार रद्र जपेन **जम्बीरफलसार** अभिषेकेन भगवान् सर्वात्मकः **इरावती देव्याक्य** रुद्राणी समेत **देवदेव** रुद्र सुप्रसन्नो वरदो भवतु ॥ (९) ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवीच मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ (१०)

**एष वै अतिव्याधी नाम यज्ञः| आह वै तत्र राजन्योऽतिव्याधी जायते | यत्रैतेन यज्ञेन यजन्ते |**
अनेन दशमवार रद्र जपेन **बालनालिकेर** अभिषेकेन भगवान् सर्वात्मकः **सुदा देव्याक्य** रुद्राणी समेत **भवोद्भव** रुद्र सुप्रसन्नो वरदो भवतु ॥ (१०) ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च मेऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्त्रिग्ंशच्च मे चत्वारिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मेऽष्टाचत्वारिग्ंशच्च् मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ (११)

**एष वै दीर्घो नाम यज्ञः| दीर्घायुषो ह वै तत्र मनुष्या भवन्ति | यत्रैतेन यज्ञेन यजन्ते |** (११)

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शग्ंसिषद्विश्वे देवाः सूक्तवाचः पृथिविमातर्मा मा हिग्ंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ंशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

**एष वै क्लृप्तो नाम यज्ञः| कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः| यत्रैतेन यज्ञेन यजन्ते |** (१२)
अनेन एकादश वार रद्र जपेन **चन्दन** अभिषेकेन भगवान् सर्वात्मकः **दीक्षा देव्याक्य** रुद्राणी समेत **आदित्यात्मक** श्री रुद्र सुप्रसन्नो वरदो भवतु ॥ (११) ॥

**ॐ शान्तिः शान्तिः शान्तिः** ॥

## 25. विरजाहोम मन्त्राः

प्राणापान-व्यानोदान-समाना मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । वाङ्मन-श्चक्षुश्-श्रोत्र-जिह्वाघ्राण-रेतोबुद्ध्याकूति-स्संकल्पा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मभूयासग्ग् स्वाहा । त्वक्चर्म-मांग्स-रुधिर-मेदो-मज्जा-स्नायवोऽस्थीनि मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । शिरःपाणि-पाद-पार्श्व-पृष्ठोरूदर-जङ्घ-शिश्नोपस्थ-पायवो मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग्-स्वाहा । उत्तिष्ठ पुरुष हरितपिङ्गल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा ॥

पृथिव्याप-स्तेजो-वायु-राकाशा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । शब्द-स्पर्श-रूप-रस-गन्धा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग्-स्वाहा । मनो-वाक्काय-कर्माणि मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । अव्यक्तभावै-रहंकारै-र्ज्योति-रहं विरजा-विपाप्मा भूयासग्ग् स्वाहा । आत्मा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । अन्तरात्मा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा । परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविट्यै स्वाहा । ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । क्षुत्पिपासामलं ज्येष्ठा-मलक्ष्मी-र्नाशयाम्यहम् । अभूति-मसमृद्धिं च सर्वा-न्निर्णुद मे पाप्मानग्ग् स्वाहा । अन्नमय-प्राणमय-मनोमय-विज्ञानमय-मानन्दमय-मात्मा मे शुध्यन्तां ज्योति-रहं विरजा विपाप्मा भूयासग्ग् स्वाहा ॥

## 26. स्नानम् – पूजा नैवेद्य, कर्पूर आरत्ति

श्रेष्ठाय नमः - स्नानं समर्पयामि । स्नानानं तरं आचमनीयं समर्पयामि ।
वस्त्र, यज्ञोपवीत, आभरणार्थे अक्षतां समर्पयामि । दिव्य परिमळ गन्धान् धारयामि ।
गंधस्योपरि हरिद्रा कुङ्कुमं समर्पयामि । पुष्पमालां समर्पयामि । पुष्पैः पूजयामि ।

ॐ भवाय देवाय नमः । ॐ शर्वाय देवाय नमः। ॐ ईशानाय देवाय नमः । ॐ पशुपते देवाय नमः ।
ॐ रुद्राय देवाय नमः । ॐ उग्राय देवाय नमः । ॐ भीमाय देवाय नमः । ॐ महतो देवाय नमः ।

www.prdoshamcom

ॐ भवस्य देवस्य पत्नै नमः । ॐ शर्वस्य देवस्य पत्नै नमः । ॐ ईशानस्य देवस्य पत्नै नमः । ॐ पशुपते देवस्य पत्नै नमः । ॐ रुद्रस्य देवस्य पत्नै नमः । ॐ उग्रस्य देवस्य पत्नै नमः । ॐ भीमस्य देवस्य पत्नै नमः । ॐ महतो देवस्य पत्नै नमः ॥

बलाय नमः । धूपं आघ्रापयामि । बल प्रमथनाय नमः । दीपं दर्शयामि । धूप दीपानंतरं आचमनीयं समर्पयामि ।

**नैवेद्यं** - ॐ भूर्भुवःसुवः । ॐ तत्सवितुर्वरेण्यं। भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।

**इति प्रोक्षय ।** (प्रातः-Morning) सत्यं त्वर्तेन परिषिञ्चामि। (सायं - Evening) ऋतं त्वा सत्येन परिषिञ्चामि।) - अमृतोपस्तरणमसि - इति किञ्चिज्जलं विसृज्य । ( sprinkle water )

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ब्रह्मणि म आत्मा अमृतत्वाय। ॐ आवाहिताभ्यः सर्वेभ्यो देवताभ्यो नमः। कदळी फलं निवेदयामि॥ मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि । हस्तप्रक्षालनं समर्पयामि। पादप्रक्षालनं समर्पयामि। पुनराचमनीयं समर्पयामि ।

ॐ भूर्भुवःसुवः । पूगीफलसमायुक्तं नागवल्ली दलैर्युतम्। कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ आवाहिताभ्यः सर्वेभ्यो देवताभ्यो नमः । कर्पूर ताम्बूलं समर्पयमि ॥

(१) नर्यप्रजां मे गोपाय। अमृतत्वाय जीवसे। जातां जनिष्यमाणां च। अमृते सत्ये प्रतिष्ठिताम्।

(२) अथर्व पितुं मे गोपाय । रसमन्नमिहायुषे। अदब्धा योऽशीततनो। अविषं नः पितुं कृणु।

(३) शग्स्य पशून्मे गोपाय। द्विपादो ये चतुष्पदः। अष्टाशफाश्च य इहाग्ने। ये चैकशफा आशुगाः।

(४) सप्रथसभां मे गोपाय । ये च सभ्यास्सभासदः । तानिन्द्रियावतःकुरु। सर्वमायुरुपासताम् । अ हे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रै विदा विदुः । ऋचस्सामानि यजूंषि। सा हि श्रीरमृता सताम् ॥

महागणपतये नमः सोमास्कंदाय नमः । शांतिदुर्गा परमेश्वर्यै नमः । आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः । समस्तोपचारार्थे कर्पूर नीराजनं दर्शयामि रक्षां धारयामि । अनेन रुद्रजपयुक्त रुद्राभिषेकेन भगवान् सर्वात्मकः । सर्वं श्री आदित्या दि श्री रुद्र सुप्रीतो वरदो भवतु ।

**ॐ हर । ॐ हर । ॐ हर ।**

## 26 (1) देवता तर्पणम्

ॐ भवं देवं तर्पयामि । ॐ शर्वं देवं तर्पयामि । ॐ ईशानं देवं तर्पयामि। ॐ पशुपतिं देवं तर्पयामि। ॐ रुद्रं देवं तर्पयामि । ॐ उग्रं देवं तर्पयामि। ॐ भीमं देवं तर्पयामि । ॐ महान्तं देवं तर्पयामि ॥

ॐ भवस्य देवस्य पत्नीं तर्पयामि । ॐ शर्वस्य देवस्य पत्नीं तर्पयामि । ॐ ईशानस्य देवस्य पत्नीं तर्पयामि । ॐ पशुपते देवस्य पत्नीं तर्पयामि । ॐ रुद्रस्य देवस्य पत्नीं तर्पयामि । ॐ उग्रस्य देवस्य पत्नीं तर्पयामि । भीमस्य देवस्य पत्नीं तर्पयामि । ॐ महतो देवस्य पत्नीं तर्पयामि ॥

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्णमासात्मने शिरसे स्वाहा । चातुर्मास्यात्मने शिखायै वषट् । निरुढपशुबन्धात्मने कवचाय हुं । ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्राय फट्।

भूर्भुवस्सुवरोमिति दिग्विमोगः ॥

## 26 (2) ध्यानम्

आपाताळनभःस्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुर-ज्ज्योतिःस्फाटिक-लिङ्ग-मौळि-विलसत्पूर्णेन्दु-वान्तामृतैः|

अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन् ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम् ॥

**(पीठं यस्य धरित्री जलधर कलशं लिङ्गमाकश मूर्तिम् नक्षत्रं पुष्पमाल्यं ग्रह गण कुसुमं चन्द्रवह्न्यर्क नेत्रं। कुक्षि: सप्त समुद्रं भुजगिरि शिखरं सप्त पातालपातं वेदं वक्त्रं षडङ्गं दश दिशि वदनं दिव्य लिङ्गं नमामि॥)**

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः। त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शाम्भवा मूर्तिभेदा रुद्राःश्रीरुद्रसूक्त-प्रकटित-विभवा नःप्रयच्छन्तु सौख्यम् ॥

**शुद्धस्फटिकसङ्काशं शुद्धविद्याप्रदायकम् । शुद्ध पूर्णं चिदानन्दं सदाशिवमहं भजे ॥**

## ॥ शान्तिपाठः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा चमे सुदिनं च मे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## 27. कुम्भाभिषेकम्

ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ‖ (*Recite 3 times*) परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ।

तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशग्ं समा न आयुः प्रमोषीः ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात्। गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ‖

ॐ भूर्भुवःसुवरोम्। अस्मात् कुम्भात् सोमास्कन्द स्वरूपस्य सखल तीर्थादिपतिम् वरुणं यथासुखं यथास्थानं प्रतिष्ठापयामि। शोभनार्थे क्षेमाय पुनरागमनाय च।

ॐ तद्ब्रह्मा। ॐ तद्वायुः। ॐ तदात्मा। ॐ तथ्सत्यम् । ॐ तथ्सर्वम् । ॐ तत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां विश्व मूर्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वग्ं रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः। त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भूवःसुवरोम्‖

ॐ निधनपतये नमः। निधनपतान्तिकाय नमः। ॐ ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नम ।
ॐ हिरण्याय नमः । हिरण्यलिङ्गाय नमः । ॐ सुवर्णाय नमः। सुवर्णलिङ्गाय नमः।
ॐ दिव्याय नमः । दिव्यलिङ्गाय नमः । ॐ भवाय नमः । भवलिङ्गाय नमः ।
ॐ शर्वाय नमः। शर्वलिङ्गाय नमः । ॐ शिवाय नमः । शिवलिङ्गाय नमः ।
ॐ ज्वलाय नमः। ज्वललिङ्गाय नमः । ॐ आत्माय नमः। आत्मलिङ्गाय नमः।
ॐ परमाय नमः । परमलिङ्गाय नमः ।

एतत्सोमस्य सूर्यस्य सर्वलिङ्गग् स्थापयति पाणिमन्त्रं पवित्रम्‖

## 28. नारायणसूक्तम्

ॐ ॥ सहस्रशीर्॒षं देवं विश्वाक्षं विश्वशम्भुवं । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणग्ं हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरग्ं शाश्वतग्ं शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायण परं ब्रह्म तत्वं नारायणः परः । नारायणपरो ध्याता ध्यानम् नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविग्ं समुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोश प्रतीकाशग्ं हृदयं चाप्यधोमुखम् । अधो निष्ट्या वितस्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततग्ं शिलाभिस्तुलम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरग्ं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् । तस्य मध्ये महनगग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः । तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं देहमापादतलमस्तकः । तस्य मद्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः । ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 29. विष्णुसूक्तम्

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाग्ंसि यो अस्कभायदुत्तरग्ं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्थ्सः । प्रतद्विष्णुस्स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति ॥

उभे ते विद्म रजसि पृथिव्या विष्णो देवत्वम् । परमस्य वित्से। विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिगं सुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषग्ह्यस्य स्थविरस्य नाम ॥

अतो देवा अवन्तुनो यतो विष्णुर्विचक्रमे । पृथिव्यास्सप्त धामभिः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पागं सुरे । त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । ततो धर्माणि धारयन् । विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यस्सखा ॥

तद्विष्णोः परमं पदगं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवागं सस्समिन्धते । विष्णोर्यत्परमं पदम् । पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽति रात्र उत्तम महर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 30. अघमर्षणसूक्तम्

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्न इन्द्रो वरुणो बृहसपतिः सविता च पुनन्तु पुनः पुनः। नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः॥

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् । अत्याशनादतीपानाद्यच्च उग्रात् प्रतिग्रहात्। तन्नो वरुणो राजापाणिनाह्यवमर्शतु। सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः। नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्मसलोकताम् । यश्चाप्सु वरुणस्स पुनात्वघमर्षणः। इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमगं

सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्यासुषोमया। ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्रिरजायत ततःसमुद्रो अर्णवः॥

समुद्रादर्णवा दधि संवथ्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्व-मकल्पयत्। दिवं च पृथिवीं चान्तरिक्ष-मथो सुवः । यत्पृथिव्यागं रजस्स्वमान्तरिक्षे विरोदसी। इमागंस्तदापो वरुणः पुनात्वघमर्षणः। पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृतां लोकानेषमृत्योर्हिरण्मयम् । द्यावापृथिव्योर्हिरण्मयगं सगंश्रितग् सुवः ॥ सनःसुवःसगंशिशाधि । आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा । अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोऽपामघमर्षणस्तस्मात् पापात्प्रमुच्यते । रजोभूमिस्त्वमागं रोदयस्व प्रवदन्ति धीराः । आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा । वृषा पवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 31. दुर्गासूक्तम्

।ॐ। जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसि तरसे नमः। अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरिताऽतिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतना जितगं सहमानमुग्रमग्निगं हुवेम परमाथ्सधस्थात्। स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः॥ प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि। स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं

च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसञ्चरेम। नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## 32. श्रीसूक्तम्

ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ कां सोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम् । मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनाग्ं रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ कर्दमेन प्रजाभूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले। आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् । श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत्। पद्मानने पद्म ऊरु पद्माक्षी पद्मसम्भवे। (तन्मे भजसि) त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥

अश्वदायी गोदायी धनदायी महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ पुत्रपौत्र धनं धान्यं हस्त्यश्वादिगवे रथम्। प्रजानां भवसि माता आयुष्मन्तं करोतु (मे)माम् ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नु ते ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्म द्विषो जहि ॥ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि। विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी। गम्भीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया। लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैः।

सरसिज निलये सरोजहस्ते धवलतरांशुक गन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥ महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मीः प्रचोदयात् ॥ श्री-वर्चस्व-मायुष्य-मारोग्यमाविधात् चोभामानं महीयते। धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि। तन्नो लक्ष्मी:प्रचोदयात् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 33. भूसूक्तम्

ॐ ॥ भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदिते ऽग्निमन्नाद-मन्नाद्यायादधे ॥ आऽयङ्गौः पृश्निरक्रमी दसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥ त्रिगं्शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ॥ अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः ॥ यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ यत्ते मन्युपरोप्तस्य पृथिवी-मनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥ मेदिनी देवी वसुन्धरा स्याद्वसुदा देवी वासवी । ब्रह्मवर्चसः पितृणाग् श्रोत्रं चक्षुर्मनः ॥

देवी हिरण्यगर्भिणी देवी प्रसूवरी ( प्रसोदरी ) । रसने ( सदने ) सत्यायने सीद ॥ समुद्रवती सावित्री हनो देवी मह्यङ्गी । महीधरणी महोव्यथिष्टा ( महोध्यतिष्ठा ) श्शृङ्गे श्रृङ्गे यज्ञे यज्ञे विभीषिणी ॥ इन्द्रपत्नी व्यापिनी सुरसरिदिह । वायुमती जलशयनी श्रियन्धा राजा सत्यन्धो परिमेदिनी ॥ श्वोपरिधत्तं परिगाय ।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियां । लक्ष्मी प्रियसखीं देवीं नमाम्यच्युत वल्लभां ॥ ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥ महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीची मेनागं् हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैतिश्रव इच्छमाना। पुण्यग्‌श्लोकं यजमानाय कृण्वती ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 34. नीळासूक्तम्

ॐ नीळां देवीगं् शरणमहं प्रपद्ये ॥ गृणाहि। घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु। ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशानासहसोया मनोता । बृहस्पतिर्मातरिश्वोत वायुः सन्धुवानावाता अभि नो गृणन्तु। विष्टम्भो दिवोधरुणः पृथिव्या अस्येश्याना जगतो विष्णुपत्नी ॥ विष्णु पत्नीश्च विद्महे श्री भूसख्यै च धीमहि। तन्नो नीळाः प्रचोदयात् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 35. दूर्वासूक्तम्

सहस्रपरमा देवी शतमूला शताङ्कुरा । सर्वग्ं हरतु मे पापं दूर्वा दुस्स्वप्ननाशनी ।
काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परुषःपरि ।

एवानो दूर्वे प्रतनु सहस्रेण शतेन च । या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा । शिरसा धारयिष्यामिरक्षस्व मां पदेपदे ॥

## 36. मृत्तिकासूक्तम्

भूमि-र्धेनुधरणी लोकधारिणी । उद्धृताऽसि वराहेण कृष्णेनशत-बाहुना । मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् । मृत्तिकेब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता । मृत्तिके देहि मे पुष्टिं त्वयिसर्वं प्रतिष्ठितम् ॥

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके । तया हतेन पापेन गच्छामि परमां गतिम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

## 37. मेधासूक्तम्

**ॐ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताथ्संबभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । ब्रह्मणः कोशोऽसि मेधया पिहितः । श्रुतं मे गोपाय ॥**

**ॐ शन्तिः शन्तिः शन्तिः ॥**

www.prapadosham.com

ॐ मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना | त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः | त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया | त्वया जुष्टश्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे ||

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती | मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा | अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः | दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताग्ं स्वाहा ||

आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या | ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् |

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु | ॐ हंस हंसाय विद्महे परमहंसाय धीमहि | तन्नो हंसः प्रचोदयात् |

ॐ शान्तिः शान्तिः शान्तिः ||

## 38. सरस्वती सूक्तम्

प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती | धीनामवित्र्यवतु || आ नो दिवो बृहतः पर्वतादा सरस्वती यजतागन्तु यज्ञम् | हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु || पावीरवी कन्या चित्रायुः सरस्वती वीर पत्नी धियं धात् | ग्नाभिर च्छिद्रग्ं शरणग्ं सजोषा दुराधर्षं गृणते शर्म यग्ंसत् || इमा जुह्वाना युष्मदा नमोभिः | प्रति स्वोमग्ं सरस्वती जुषस्व | तव शर्मन् प्रियतमे दधानाः | उपस्थेयाम शरणं न वृक्षम् || यस्ते स्तेनः शशयो यो मयोभूः | येन विश्वा पुष्यसि वार्याणि | यो रत्नधा वसुविद्य सुदत्रः | सरस्वती तमिह धातवेऽकः || सरस्वत्यभि नो नेषि वस्यः | मा पस्फरीः पयसा मा न आधक् | जुषस्व नः सख्या वेश्या च | मा त्वत्

क्षेत्राण्यरणानि गन्म ॥ इयग्ं शुष्मेभि र्बिसखा इवारुजत् । सानु गिरीणां तविषे भिरूर्मिभिः ॥ पारावदघ्नी मवसे सुवृक्तिभिः । सरस्वती माविवासेम धीतिभिः ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 39. श्री रुद्रसूक्तम्

परिणो रुद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायोः । अवस्थिरामघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय। स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। मृडा जरित्रे रुद्रस्तवानो अन्यन्ते अस्मन्निवपन्तुसेनाः। मीढुष्टम शिवतम शिवोनः सुमना भव। परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ अर्हन्बिभर्षि सायकानि धन्व। अर्हन्निष्कय्यंजतंविश्वरूपम् । अर्हन्निदन्दयसे विश्वमब्भुवम् । नवा ओजीयो रुद्र त्वदस्ति॥ त्वमग्ने रुद्रो असुरो महो दिवस्त्वग्ंशर्द्धो मारुतं पृक्ष ईशिषे । त्वंवातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासिनुत्मना । आवो राजानमध्वरस्य रुद्रग्ंहोतारग्ं सत्य यजग्ं रोदस्योः। अग्निं पुरातनयित्नो रचित्ताद्धिरण्यरूप मवसे कृणुध्वम्॥ (६)

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 40. मृत्यु सूक्तम्

अपैतु मृत्युरमृतं न आगन्वैवस्वतो ना अभयं कृणोतु। पर्णं वनस्पतेरिवाभिनश्शीयताग्ं रयिस्सच तान्नश्शचीपतिः ॥ परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाग्ं रीरिषो मोत वीरन् । वातं प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः। स नो मृत्योस्त्रायतां पात्वग्ं हसो ज्योग्जीवा जरामशीमहि ॥ अमुत्र भूया-दध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः । हरिग्ं हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनां । ब्रह्मसरूप मनुमेदमागादयनं मा विवधीर्विक्रमस्व ॥

www.pradosham.com

शल्कैरग्निमिन्धान उभौ लोकौ सनेमहं । उभयोर्लोकयोर् ऋध्वाऽति मृत्युं तराम्यहं ॥ मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः । प्रजाम् मां मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम ॥

**मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम् । मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते** ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयग्स्याम पतयो रयीणाम् ॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतुनस्स्वस्तिदा अभयङ्करः ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय माऽमृतात् । अपमृत्युमपक्षुधं । अपेतः शपथं जहि। अधानो अग्न आवः । रायस्पोषग् सहस्रिणं ॥ ये ते सहस्रमयुतं पाशाः । मृत्यो मर्त्याय हन्तवे। तान्यज्ञस्य मायया । सर्वानवयजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा। भूर्भुवस्वः। ओजो बलं । ब्रह्म क्षत्रं । यशो महत्। सत्यं तपो नाम । रूपममृतं। चक्षुश्श्रोत्रं ॥ मन आयुः। विश्वं यशो महः । समन्तपोहरोभाः । जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि । शम्प्रजाभ्यो यजमानाय लोकम् ॥ ऊर्जं पुष्टिं ददद्भ्यावव्रृत्स्व ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 41. ब्रह्मसूक्तम्

ब्रह्मजज्ञानं प्रथमं पुरस्तात् । विसीमतस्सुर्चो वेन आवः । सबुध्नि या उपमा अस्य विष्ठाः । सतश्चयोनिमसतश्च विवः ॥ (१) ॥ पिताविराजा मृषभोरयीणाम् । अन्तरिक्षंविश्वरूप आविवेश । तमर्कैरभ्यर्वन्ति वथ्सम् । ब्रह्मसन्तं ब्रह्मणावर्द्धयन्तः ॥ (२) ॥ ब्रह्मदेवानजनयत् । बह्म विश्वमिदञ्जगत्। ब्रह्मणः क्षत्रन्निर्मितम् । ब्रह्म ब्राह्मण आत्मना ॥ (३) ॥ अन्तरस्मिन्निमे लोकाः । अन्तर्विश्वमिदञ्जगत् । ब्रह्मैवभूतानाञ्ज्येष्ठम् । तेन कोऽर्हति स्पर्द्धितुम् ॥ (४) ॥ ब्रह्मन्देवास्त्रयस्त्रिग्ंशत् । ब्रह्मान्निन्द्रप्रजापती ।

ब्रह्मन् हविश्वाभूतानि । नावीवान्तस्समाहिता ॥ (५) ॥ चतस्र आशाः प्रचरन्त्वग्नयः। इमन्नो यज्ञन्नयतु प्रजानन्न्। घृतं पिन्वन्नजरगंसुवीरम् । ब्रह्म समिद्भवत्याहुतीनाम् ॥ (६) ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 42. आयुष्यसूक्तम्

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी । ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचिर्य आगात् ।

समृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः ॥ ब्रह्मज्योति-र्ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम्। सुवर्णरंभग्रह-मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ श्रियं लक्ष्मी-मौबला-मंबिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः। तां विद्यां ब्रह्मयोनिगं सरूपामिहायुषे तर्पयामो घृतेन॥ दाक्षायण्यः सर्वयोन्यः स योन्यः सहस्रशो विश्वरुपा विरूपाः। ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्ताम् ॥ दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान्। तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजागं रीरिषो मोत वीरान् ॥ एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनगं सांपराये स नो हविर्घृत-मिहायुषेत्तु देवः ॥ वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गन्धर्वाग्श्च पितॄग्श्च विश्वान्। भृगून् सर्पाग्श्चाङ्गिरसोऽथ सर्वान् घृतगं हुत्वा स्वायुष्या महयाम शश्वत् ॥ विष्णो त्वं नो अन्तमःशर्मयच्छ सहन्त्य। प्रतेधारा मधुश्चुत उथ्सं दुह्रते अक्षितम्॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 43. भाग्यसूक्तम्

ॐ प्रातरग्निं प्रातरिन्द्रगं हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना । प्रातर्भगंपूषणं ब्रह्मणस्पतिं प्रातःसोममुत रुद्रगं हुवेम ॥ प्रातर्जितं भगमुग्रगं हुवेम वयं पुत्रमदितेर्यो विधर्ता । आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः।

www.prapatham.com

भगप्रणो जनय गोभि - रश्वैर्भगप्रनृभि-र्नृवन्तस्स्याम ॥ उतेदानीं भगवन्तस्स्यामोत प्रपित्व उत मध्ये अह्नाम् । उतोदिता मघवन्थ्सूर्यस्य वयं देवानागं सुमतौ स्याम । भग एव भगवागं अस्तु देवास्तेन वयं भगवन्तःस्याम । तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥

समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वावाजिन आवहन्तु ॥ अश्वावती-र्गोमती-र्नउषासो वीरवतीःसद मुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनायूयं पात स्वस्तिभिस्सदा नः ॥ यो माग्ने भागिनगं सन्त मथाभागं चिकीऋषति। अभागमग्ने तं कुरु मामग्ने भागिनं कुरु॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 44. नवग्रह सूक्तम्

ॐ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् । अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्| अस्य यज्ञस्य सुक्रतुम्॥ येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्| निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **आदित्याय नमः**| आदित्य ग्रहदोषो निर्दोषो अस्तु ॥१॥

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्| अपागं रेतागंसि जिन्वति | स्योना पृथिवि भवाऽनृक्षरा निवेशनि। यच्छानश्शर्म सप्रथाः | क्षेत्रस्य पतिना वयगंहिते नेव जयामसि | गामश्वं पोषयिन्त्वा स नो मृडातीदृशे॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **अङ्गारकाय नमः**| अङ्गारक ग्रहदोषो निर्दोषो अस्तु ॥३॥

ॐ प्रवश्शुक्राय भानवे भरध्वगं हव्यं मतिं चाग्नये सुपूतम् | यो दैव्यानि मानुषा जनूगंष्यन्तर्विश्वानि विद्म ना जिगाति ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् | न ह्यस्या अपरंचन जरसा मरते पतिः ॥ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः| अस्माकमस्तु केवलः॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **शुक्राय नमः**| **शुक्र** ग्रहदोषो निर्दोषो अस्तु॥६॥

ॐ आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य संगथे ॥ अप्सुमे सोमो अब्रवीदन्तर्विश्वानिभेषजा । अग्निञ्च विश्वशंभुवमापश्च विश्वभेषजीः । गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **सोमाय** नमः । सोम ग्रहदोषो निर्दोषो अस्तु ॥ २ ॥

ॐ उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सगंसृजेथामयञ्च । पुनः कृण्वगंस्त्वा पितरं युवानमन्वातागंसीत्त्वयि तन्तुमेतम् ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपागं सुरे ॥ विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ।

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **बुधाय** नमः । बुध ग्रहदोषो निर्दोषो अस्तु ॥ ४ ॥

ॐ बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्चवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥ इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य । तव प्रणीती तव शूरशर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **बृहस्पतये** नमः । बृहस्पतिर्ग्रह दोषो निर्दोषो अस्तु ॥ ५ ॥

ॐ **शन्नो** देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमास्तन्नो अस्तु वयगंस्याम पतयो रयीणाम् । इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः । आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **शनैश्चराय** नमः । **शनैश्चर** ग्रहदोषो निर्दोषो अस्तु ॥ ७ ॥

ॐ कया नश्चित्र आभुवदूती सदावृधस्सखा । कया शचिष्ठया वृता । आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवः । यत्ते देवी निरृतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् । इदन्ते तद्विष्याम्यायुषो न मध्यादथाजीवः पितुमद्धि प्रमुक्तः ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते **राहवे** नमः । **राहु** ग्रह दोषो निर्दोषो अस्तु ॥ ८ ॥

www.pradosham.com

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे | समुषद्भिरजायथाः || ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् | श्येनोगृध्राणाग्स्वधितिर्वनानाग्ं सोमः पवित्रमत्येति रेभन् | सचित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् | चन्द्रं रयिं पुरुवीरम् बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ||

ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यः भगवते **केतुभ्यो** नमः | **केतु** ग्रहदोषो निर्दोषो अस्तु ||९||

**|| ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ||**

**|| ॐ शान्तिः शान्तिः शान्तिः ||**

## 44. (1) नवगृह सूक्त विवरण:

| सन्ख्या | गृहम् | अदिदेवता | पृत्यदिदेवता | दान्यम् | वर्णम् | रत्नम् |
|---|---|---|---|---|---|---|
| 1. | आदित्यन् | अग्नि | पशुपति | गोधूम | रक्तम् | माणिक्य |
| 2. | अङ्गारकन् | पृथिवी | क्षेतृबालक: | आदकम् | रक्तम् | विदृम: |
| 3. | शुकृन् | इन्द्राणी | इन्दृन् | बर्बर | श्वेतम् | हीरक: |
| 4. | चन्दृन् | अप: | गौरी | तण्डुलम् | श्वेतम् | मौक्तिक: |
| 5. | बुधन् | विष्णु | नारायणन् | मुद्ग | हरितम् | मरगत: |
| 6. | गुरु | इन्दृमरुत्वन् | बृह्मा | चणक: | कनकम् | कनकपुश्पराग: |
| 7. | शनै: | पृजापति: | धर्मराजम् | तिल | नीलम् | नीलपुष्पराग: |
| 8. | राहु | सर्पराजम् | निऋरुति | माष | धूमृ | गोमेध: |
| 9. | केतु | बृह्मा | चितृगुप्तन् | कुलुत्थ | चितृवर्ण: | वैडूर्यम् |

**|| ॐ शान्तिः शान्तिः शान्तिः ||**

www.pradosham.com

# 45. नारायणोपनिषत्

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।

। ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति। नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापःपृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते। नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतयः प्रजायन्ते। नारायणाद्-द्वादशादित्या रुद्रा वसवस्सर्वाणि च छन्दाग्ंसि । नारायणादेव समुत्पद्यन्ते। नारायणे प्रवर्तन्ते । नारायणे प्रलीयन्ते ॥

ओम् । अथ नित्यो नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः। द्यावापृथिव्यौ च नारायणः । कालश्च नारायणः । दिशश्च नारायणः। ऊर्ध्वश्च नारायणः। अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः । न द्वितीयोऽस्ति कश्चित्। य एवं वेद । स विष्णुरेव भवति स विष्णुरेव भवति ॥

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् । ओमित्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनपब्रुवस्सर्वमायुरेति । विन्दते प्राजापत्यग्ं रायस्पोषंगौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । य एवं वेद ॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम्। अकार उकार मकार इति । तानेकधा समभरत्तदेतदोमिति । यमुक्त्वा मुच्यते योगीजन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासकः। वैकुण्ठभुवनलोकं गमिष्यति । तदिदं परं पुण्डरीकं विज्ञानघनम् । तस्मात्तदिदावन्मात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम् । कारणरूपमकार परब्रह्मोम् । एतदथर्व शिरोयोऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति ।

माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चापातकोपपातकात्प्रमुच्यते । सर्व वेद पारायण पुण्यं लभते । नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 46. गायत्रीमन्त्राः

ॐ पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् । ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् । ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नष्षण्मुखः प्रचोदयात् । ॐ तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । ॐ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् । ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । ॐ वज्रनखाय विद्महे तीक्ष्णदग्ग्ष्ट्राय धीमहि । तन्नो नारसिग्ंहः प्रचोदयात् । ॐ भास्कराय विद्महे महद्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । ॐ वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् । ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् । ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

## 47. नवग्रह गायत्री

ॐ अश्वध्वजाय विद्महे पाशहस्ताय धीमहि । तन्नो सूर्यः प्रचोदयात् । ॐ पद्मद्वजाय विद्महे हेमरूपाय धीमहि । तन्नो सोमः प्रचोदयात् । ॐ वीरध्वजाय विद्महे विघ्नहस्ताय धीमहि । तन्नो भौमः प्रचोदयात् । ॐ गजद्वजाय विद्महे शूलहस्ताय धीमहि । तन्नो बुधः प्रचोदयात् । ॐ वृषभद्वजाय विद्महे घृणिहस्ताय धीमहि । तन्नो गुरुः प्रचोदयात् । ॐ अश्वध्वजाय विद्महे धनुर् हस्ताय धीमहि। तन्नो शुक्रः प्रचोदयात् । ॐ काकध्वजाय विद्महे कढ्गहस्ताय धीमहि । तन्नो मन्दः प्रचोदयात् ।

ॐ नगद्वजाय विद्महे पद्महस्ताय धीमहि । तन्नो राहुः प्रचोदयात् । ॐ अश्वध्वजाय विद्महे शूलहस्ताय धीमहि । तन्नो केदुः प्रचोदयात् ।

## 48. शान्ति पञ्चकं

ॐ शं नो मित्र-श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ॥१॥

ॐ शं नो मित्र-श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः। नमो ब्रह्मणे । नमस्ते वायो। त्व-मेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मा वादिषम्। ऋतमवादिषम्। सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत्। आवीन्माम्। आवीद् वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सह ना-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मामामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासगं् शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत्। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये

www.pradosham.com

तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगं् शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये। दैवीः स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 49. ऐकमत्यसूक्तम् (संवादसूक्तम्)

ॐ संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्याभर ॥ संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् । देवां भागं यथा पूर्वे सञ्जानाना उपासते ॥ समानो मन्त्रः समितिः समानी समानं मनस्सह चित्तमेषाम् । समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥ समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥ (ऋग्वेदे अन्तिम सूक्तम्) ॥

आभिर्गीभिर्यदतोन ऊनमाप्याय हरिवो वर्द्धमानः | यदा स्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अधते स्याम | ब्रह्म प्रावादिष्म तन्नो माहासीत् | सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

शान्ता पृथिवि शिव मन्तरिक्षम् द्यौर्नो देव्य भजन्नो अस्तु । शिवादिश:प्रतिश उद्दिशो न अपो विद्युत: परिपान्तु सर्वद: शान्ति:शान्ति:शान्ति: ॥

www.pradosham.com

## 50. गणपति पूजा विधिः

**ॐ सुमुख गणपतये नमो नमो गणपतये नम : (दूर्वा पुष्पं** ***to be used)***

| | | | | | |
|---|---|---|---|---|---|
| सुमुख। | एकदन्त। | कपिल। | गजकर्णक। | लम्बोदर। | विकट। |
| विघ्नराज। | विनायक। | धूमकेत। | गणाध्यक्ष । | फालचन्द्र । | गजानन। |
| वक्रतुण्ड। | शूर्पकर्ण। | हेरम्ब। | स्कन्दपूर्वज। | षोडश। | सिद्विबुद्वि । |
| वल्लभ । | आनन्द । | नर्तन । | विद्या । | शान्ति। | सङ्कटहर। |
| वाञ्छाकल्प। | वल्लभि। | कल्याण। | महागणपतये। | | |

## 51. श्री नन्दिकेश्वर अष्टोत्तरम्

| | | |
|---|---|---|
| ॐ नन्दिकेशाय नमः | ॐ ब्रह्मरूपिणे नमः | ॐ शिवध्यानपरायनाय नमः |
| ॐ तीक्ष्णशृङ्गाय नमः | ॐ वेदपादाय नमः | ॐ विरूपाय नमः |
| ॐ वृषभाय नमः | ॐ तुङ्गशैलाय नमः | ॐ देवदेवाय नमः |
| ॐ शिवप्रियाय नमः | ॐ विराजमानाय नमः | ॐ नटनाय नमः |
| ॐ अग्निरूपाय नमः | ॐ धनप्रियाय नमः | ॐ सितचामरधारिणे नमः |
| ॐ वेदाङ्गाय नमः | ॐ कनकप्रियाय नमः | ॐ कैलासवासिने नमः |
| ॐ देवाय नमः | ॐ स्थितपादाय नमः | ॐ श्रुतिप्रियाय नमः |
| ॐ श्वेतोपवीतिने नमः | ॐ नाट्यनन्दकाय नमः | ॐ किंकिणीधराय नमः |
| ॐ मत्तशृङ्गिणे नमः | ॐ हाटकेशाय नमः | ॐ हेमभूषणाय नमः |
| ॐ विष्णुरूपिणे नमः | ॐ पृथ्वीरूपिणे नमः | ॐ निधीशाय नमः |
| ॐ शिववाहनाय नमः | ॐ गुळप्रियाय नमः | ॐ चारुहासाय नमः |
| ॐ श्रृङ्गिणे नमः | ॐ नवतृणप्रियाय नमः | ॐ वेदसाराय नमः |
| ॐ मन्त्रसाराय नमः | ॐ प्रत्यक्षाय नमः | ॐ करुणाकराय नमः |
| ॐ शीघ्राय नमः | ॐ ललामकलिकाय नमः | ॐ शिवयोगिने नमः |
| ॐ जलाधिपाय नमः | ॐ चारुरूपाय नमः | ॐ वृषेशाय नमः |
| ॐ सोमसूर्याग्निलोचनाय नमः | ॐ सुन्दराय नमः | ॐ सोमभूषाय नमः |
| ॐ सुवक्त्राय नमः | ॐ कलिनाशनाय नमः | ॐ सुप्रकाशाय नमः |
| ॐ महावीर्याय नमः | ॐ हम्साय नमः | ॐ अग्निमयाय नमः |
| ॐ प्रभवे नमः | ॐ वरदाय नमः | ॐ रुद्ररूपाय नमः |
| ॐ मधुराय नमः | ॐ कामिकप्रियाय नमः | ॐ विशिष्टाय नमः |
| ॐ दिव्यरूपाय नमः | ॐ उज्वलिने नमः | ॐ ज्वालनेत्राय नमः |
| ॐ संवर्ताय नमः | ॐ कालाय नमः | ॐ केशवाय नमः |

www.prapatsham.com

ॐ सर्वदैवताय नमः
ॐ श्वेतवर्णाय नमः
ॐ शिवासीनाय नमः
ॐ चिन्मयाय नमः
ॐ श्रृङ्गपट्टाय नमः
ॐ श्वेतचामरभूषाय नमः
ॐ देवराजाय नमः
ॐ प्रभानन्दिने नमः
ॐ पण्डिताय नमः
ॐ परमेश्वराय नमः
ॐ निरूपाय नमः
ॐ निराकाराय नमः
ॐ छिन्नदैत्याय नमः
ॐ नासासूत्रिणे नमः
ॐ अनन्तेशाय नमः
ॐ तिलतण्डुलभक्षणाय नमः
ॐ वारनन्दिने नमः
ॐ सरसाय नमः
ॐ विमलाय नमः
ॐ पट्टसूत्राय नमः
ॐ कालकण्ठाय नमः
ॐ शैलादिने नमः
ॐ शिलातनसुनन्दनाय नमः
ॐ कारणाय नमः
ॐ श्रुतिभक्ताय नमः
ॐ वीरघण्टाधराय नमः
ॐ धन्याय नमः
ॐ विष्णुनन्दिने नमः
ॐ शिवज्वालाग्राहिणे नमः
ॐ भद्राय नमः
ॐ अनघाय नमः
ॐ वीराय नमः
ॐ ध्रुवाय नमः
ॐ धात्रे नमः
ॐ शाश्वताय नमः
ॐ प्रदोषप्रियरूपिणे नमः
ॐ वृषाय नमः
ॐ कुण्डलधृते नमः
ॐ भीमाय नमः
ॐ सितवर्णस्वरूपिने नमः
ॐ सर्वात्मने नमः
ॐ सर्वविख्याताय नमः

**तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नन्दिः प्रचोदयात् ॥**

## 52. शिव अष्टोत्तरशत नामावलि:

ॐ शिवाय नमः (१)
ॐ महेश्वराय नमः (२)
ॐ शम्भवे नमः(३)
ॐ पिनाकिने नमः
ॐ शशिशेखराय नमः
ॐ वामदेवाय नमः
ॐ विरूपाक्षाय नमः
ॐ कपर्दिने नमः
ॐ नीललोहिताय नमः
ॐ शङ्कराय नमः
ॐ शूलपाणिने नमः(११)
ॐ खट्वाङ्गिने नमः
ॐ विष्णुवल्लभाय नमः
ॐ शिपिविष्टाय नमः
ॐ अम्बिकानाथाय नमः
ॐ श्रीकण्ठाय नमः
ॐ भक्तवत्सलाय नमः
ॐ भवाय नमः
ॐ शर्वाय नमः
ॐ त्रिलोकेशाय नमः
ॐ शितिकण्ठाय नमः
ॐ शिवाप्रियाय नमः
ॐ उग्राय नमः
ॐ कपालिने नमः
ॐ कामारये नमः
ॐ अन्धकासुर सूदनाय नमः
ॐ गङ्गाधराय नमः
ॐ ललाटाक्षाय नमः
ॐ कालकालाय नमः
ॐ कृपानिधये नमः
ॐ भीमाय नमः(३१)
ॐ परशुहस्ताय नमः
ॐ मृगपाणिने नमः
ॐ जटाधराय नमः
ॐ कैलासवासिने नमः
ॐ कवचिने नमः
ॐ कठोराय नमः
ॐ त्रिपुरान्तकाय नमः
ॐ वृषाङ्काय नमः
ॐ वृषभारूढाय नमः
ॐ भस्मोद्धूलित विग्रहाय नमः
ॐ सामप्रियाय नमः
ॐ स्वरमयाय नमः
ॐ त्रयीमूर्तये नमः
ॐ अनीश्वराय नमः

www.pradosham.com

ॐ सर्वज्ञाय नमः
ॐ परमात्मने नमः
ॐ सोमसूर्याग्निलोचनाय नमः
ॐ हविषे नमः
ॐ यज्ञमयाय नमः
ॐ सोमाय नमः(५१)
ॐ पञ्चवक्त्राय नमः
ॐ सदाशिवाय नमः
ॐ विश्वेश्वराय नमः
ॐ वीरभद्राय नमः
ॐ गणनाथाय नमः
ॐ प्रजापतये नमः
ॐ हिरण्यरेतसे नमः
ॐ दुर्धर्षाय नमः
ॐ गिरीशाय नमः
ॐ गिरिशाय नमः (६१)
ॐ अनघाय नमः
ॐ भुजङ्गभूषणाय नमः
ॐ भर्गाय नमः
ॐ गिरिधन्विने नमः
ॐ गिरिप्रियाय नमः
ॐ कृत्तिवाससे नमः
ॐ पुरारातये नमः
ॐ भगवते नमः
ॐ प्रमथाधिपाय नमः
ॐ मृत्युञ्जयाय नमः (71)
ॐ सूक्ष्मतनवे नमः
ॐ जगद्व्यापिने नमः
ॐ जगद्गुरवे नमः
ॐ व्योमकेशाय नमः
ॐ महासेनजनकाय नमः
ॐ चारुविक्रमाय नमः
ॐ रुद्राय नमः
ॐ भूतपतये नमः
ॐ स्थाणवे नमः
ॐ अहिर्बुध्न्याय नमः( 81)
ॐ दिगम्बराय नमः
ॐ अष्टमूर्तये नमः
ॐ अनेक ात्मने नमः
ॐ सात्विकाय नमः
ॐ शुद्धविग्रहाय नमः
ॐ शाश्वताय नमः
ॐ खण्डपरशवे नमः
ॐ अजाय नमः
ॐ पापविमोचनाय नमः
ॐ मृडाय नमः(९१)
ॐ पशुपतये नमः
ॐ देवाय नमः
ॐ महादेवाय नमः
ॐ अव्ययाय नमः
ॐ हरये नमः
ॐ पूषदन्तभिदे नमः
ॐ अव्यग्राय नमः
ॐ दक्षाध्वरहराय नमः
ॐ हराय नमः
ॐ भगनेत्रभिदे नमः
ॐ अव्यक्ताय नमः
ॐ सहस्राक्षाय नमः
ॐ सहस्रपदे नमः
ॐ अपवर्गप्रदायकाय नमः
ॐ अनन्ताय नमः
ॐ तारकाय नमः
ॐ परमेश्वराय नमः (108)

<><><><>

## 53. अथ शिव चण्डेश्वर शत नामानि

**शिवाञ्जलि कृतं चण्डम् शिवध्यान परायणम् । शिवार्चाफलदातारम् शिवचण्डेश्वरम् भजे ॥**

ॐ चण्डेश्वराय नमः (१)
ॐ महाचण्डाय नमः (२)
ॐ प्रचण्डाय नमः (३)
ॐ ध्यानमानसाय नमः
ॐ ब्राह्मणाय नमः
ॐ वरदाय नमः
ॐ विद्रवे नमः
ॐ कृतचण्डाय नमः
ॐ शिवप्रियाय नमः
ॐ ज्ञानदाय नमः
ॐ ज्ञाननेत्रसम्भूताय नमः
ॐ सर्पभूषणाय नमः
ॐ भस्मनोदूळिताय नमः
ॐ शिवभस्मप्रियाय नमः
ॐ शिवभक्ताय नमः
ॐ भव्याय नमः
ॐ भवाय नमः
ॐ करुणाकराय नमः

www.pradosham.com

ॐ शीलाय नमः
ॐ वैतनिकाय नमः
ॐ सेनाय नमः
ॐ शान्तमानसाय नमः
ॐ फनिमालाधराय नमः
ॐ फनिकङ्कणधारणाय नमः
ॐ जठाधराय नमः
ॐ जगत्सेनाय नमः
ॐ विप्रप्रियाय नमः
ॐ विषिष्टाय नमः
ॐ विप्रशान्ताय नमः
ॐ विश्वद्रष्ट्रे नमः
ॐ विश्वदर्शनाय नमः
ॐ मूर्तिमते नमः
ॐ व्यवस्थारहिताय नमः
ॐ वेदविदे नमः
ॐ सुन्दराय नमः
ॐ विद्युत्प्रभाय नमः
ॐ शुभकराय नमः
ॐ शङ्करप्रियाय नमः
ॐ शङ्ख्प्रीताय नमः
ॐ डङ्कहस्ताय नमः
ॐ अञ्जलिहस्ताय नमः
ॐ उमाभक्ताय नमः
ॐ अक्षरप्रीताय नमः
ॐ जयिने नमः
ॐ एकाग्रचिन्तनाय नमः
ॐ शुभङ्कराय नमः
ॐ मन्त्रमूर्तये नमः
ॐ मानसार्चापराय नमः
ॐ सान्निध्याय नमः
ॐ शर्वाय नमः
ॐ शान्ताय नमः
ॐ शङ्करप्रियाय नमः
ॐ शरत्रिकाय नमः
ॐ साम्बस्मरणाय नमः
ॐ सामान्याय नमः
ॐ प्रशान्तमानसाय नमः
ॐ केतशरण्याय नमः
ॐ साम्प्रदायकाय नमः
ॐ द्विनेत्राय नमः
ॐ दिव्यज्ञानिने नमः
ॐ दिव्यसुन्दराय नमः
ॐ देवप्रियाय नमः
ॐ दैवचिन्ताय नमः
ॐ निष्कळङ्काय नमः
ॐ निराकाराय नमः
ॐ ईश्वरैक्याय नमः
ॐ निरञ्जनाय नमः
ॐ निरक्ज्ञानाय नमः
ॐ भोगरत्नाय नमः
ॐ शिवपूजाप्रियाय नमः
ॐ ईशानाय नमः
ॐ शम्भुपार्श्वस्थिताय नमः
ॐ सूक्ष्माय नमः
ॐ सूक्ष्मदेहाय नमः
ॐ हरप्रियाय नमः
ॐ दण्डहस्ताय नमः
ॐ शिवकलायायिने नमः
ॐ भस्मनिथये नमः
ॐ भस्मधृते नमः
ॐ परिचराय नमः
ॐ परिव्राजे नमः
ॐ वसवे नमः
ॐ शिवपाद्यप्रियाय नमः
ॐ वश्याय नमः
ॐ रूपिणीप्रियाय नमः
ॐ कलिचण्डाय नमः
ॐ कालिकाय नमः
ॐ कुसुमप्रियाय नमः
ॐ निर्मलाय नमः
ॐ नियताय नमः
ॐ नित्याय नमः
ॐ निरामयाय नमः
ॐ निद्राज्ञानाय नमः
ॐ निरातङ्काय नमः
ॐ नियमप्रियाय नमः
ॐ ध्येयाय नमः
ॐ ध्यानरूपाय नमः
ॐ नित्यचण्डाय नमः
ॐ निष्कळङ्काय नमः
ॐ मोक्षज्ञानप्रदाय नमः
ॐ वज्रकेशाय नमः
ॐ ध्वनिज्ञानिने नमः
ॐ शिवनिर्माल्यभोक्त्रे नमः
ॐ शिवनिर्माल्यधारणाय नमः
ॐ शिवार्चाफलदात्रे नमः
ॐ शिवभक्तिधुरन्धराय नमः
ॐ चण्डेशाय नमः
ॐ शिवचण्डेश्वराय नमः

<><><>

www.pradosham.com

# 54. कदम्ब त्रिशती

| श्री रुद्र त्रिशती | श्री ललिता त्रिशती |
| --- | --- |
| ॐ नमो हिरण्यबाहवे नमः । (१) | ॐ ककाररूपायै नमः । (१) |
| ॐ सेनान्ये नमः । (२) | ॐ कल्याण्यै नमः । (२) |
| ॐ दिशां च पतये नमः । (३) | ॐ कल्याणगुणशालिण्यै नमः । (३) |
| ॐ नमो वृक्षेभ्यो नमः । | ॐ कल्याणशैलनिलयायै नमः । |
| ॐ हरिकेशेभ्यो नमः । | ॐ कमनीयायै नमः । |
| ॐ पशूनां पतये नमः । | ॐ कलावत्यै नमः । |
| ॐ नमःसस्पिञ्जराय नमः । | ॐ कमलाक्ष्यै नमः । |
| ॐ त्विषीमते नमः । | ॐ कल्मक्षघ्नये नमः । |
| ॐ पथीनां पतये नमः । | ॐ करुणामृतसागरायै नमः । |
| ॐ नमो बभ्लुशाय नमः । | ॐ कदम्बकाननावासायै नमः । |
| ॐ विव्याधिने नमः । | ॐ कदम्बकुसुमप्रियायै नमः । |
| ॐ अन्नानां पतये नमः । | ॐ कन्दर्पविद्यायै नमः । |
| ॐ नमो हरिकेशाय नमः । | ॐ कन्दर्पजनकापाङ्गवीक्षणायै नमः । |
| ॐ उपवीतिने नमः । | ॐ कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटायै नमः । |
| ॐ पुष्टानां पतये नमः। | ॐ कलिदोषहरायै नमः । |
| ॐ नमो भवस्य हेत्यै नमः। | ॐ कञ्जलोचनायै नमः । |
| ॐ जगतां पतये नमः । | ॐ कम्रविग्रहायै नमः । |
| ॐ नमो रुद्राय नमः । | ॐ कर्मादिसाक्षिण्यै नमः । |
| ॐ आततािवने नमः । | ॐ कारयित्र्यै नमः । |
| ॐ क्षेत्राणां पतये नमः । | ॐ कर्मफलप्रदायै नमः । (२०) |
| ॐ नमः सूताय नमः । | ॐ एकाररूपायै नमः । |
| ॐ अहन्त्याय नमः । | ॐ एकाक्षर्यै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ वनानां पतये नमः । | ॐ एकानेकाक्षराकृत्यै नमः । |
| ॐ नमो रोहिताय नमः । | ॐ एतत्तदित्यनिर्देश्यायै नमः । |
| ॐ स्थपतये नमः । | ॐ एकानन्दचिदाकृत्यै नमः । |
| ॐ वृक्षाणां पतये नमः । | ॐ एवमित्यागमाबोध्यायै नमः । |
| ॐ नमो मन्त्रिणे नमः । | ॐ एकभक्तिमदर्चिदायै नमः । |
| ॐ वाणिजाय नमः । | ॐ एकाग्रचित्तनिर्ध्यातायै नमः । |
| ॐ कक्षाणां पतये नमः । | ॐ एषणारहिताद्दतायै नमः । |
| ॐ नमो भुवन्तये नमः । | ॐ एलासुगन्धिचिकुरायै नमः । |
| ॐ वारिवस्कृताय नमः। | ॐ एनःकूटविनाशिन्यै नमः । |
| ॐ ओषधीनां पतये नमः । | ॐ एकभोगायै नमः । |
| ॐ नम उच्चैर्घोषाय नमः । | ॐ एकरसायै नमः । |
| ॐ आक्रन्दयते नमः । | ॐ एकैश्वर्यप्रदायिण्यै नमः । |
| ॐ पथीनां पतये नमः । | ॐ एकातपत्रसाम्राज्यप्रदायै नमः । |
| ॐ नमः कृत्स्नवीताय नमः । | ॐ एकान्तपूजितायै नमः । |
| ॐ धावते नमः । | ॐ एधमानप्रभायै नमः । |
| ॐ सत्वनां पतये नमः। (38) | ॐ एजदनेजज्जगदीश्वर्यै नमः । |
| ॐ नमः सहमानाय नमः । | ॐ एकवीरादिसंसेव्यायै नमः । |
| ॐ निव्याधिने नमः। | ॐ एकप्राभवशालिन्यै नमः । (४०) |
| ॐ आव्याधिनीनां पतये नमः । | ॐ ईकाररूपिण्यै नमः । |
| ॐ नमः ककुभाय नमः । | ॐ ईशित्र्यै नमः । |
| ॐ निषङ्गिणे नमः। | ॐ ईप्सितार्थप्रदायिन्यै नमः । |
| ॐ स्तेनानां पतये नमः । (44) | ॐ ईदृगित्यविनिर्देश्यायै नमः । |
| ॐ नमो निषङ्गिणे नमः । | ॐ ईश्वरत्वविधायिण्यै नमः । |
| ॐ इषुधिमते नमः । | ॐ ईशानादिब्रह्ममय्यै नमः । |

| | |
|---|---|
| ॐ तस्कराणां पतये नमः । | ॐ ईषित्वाद्यष्टसिद्धिदायै नमः । |
| ॐ नमो वञ्चते नमः । | ॐ ईक्षित्र्यै नमः । |
| ॐ परिवञ्चते नमः । | ॐ ईक्षणसृष्टाण्डकोट्यै नमः । |
| ॐ स्तायूनां पतये नमः । | ॐ ईश्वरवल्लभायै नमः । |
| ॐ नमो निचेरवे नमः। | ॐ ईडितायै नमः । |
| ॐ परिचराय नमः । | ॐ ईश्वरार्द्धाङ्गशरीरायै नमः । |
| ॐ अरण्यानां पतये नमः । | ॐ ईशाधिदेवतायै नमः । |
| ॐ नमः सृकाविभ्यो नमः । | ॐ ईश्वरप्रेरणकर्यै नमः । |
| ॐ जिघागं्सद्भ्यो नमः । | ॐ ईशताण्डवसाक्षिण्यै नमः । |
| ॐ मुष्णतां पतये नमः । | ॐ ईश्वरोत्सङ्गनिलयायै नमः । |
| ॐ नमोऽसिमद्भ्यो नमः। | ॐ ईतिबाधाविनाशिन्यै नमः । |
| ॐ नक्तं चरद्भ्यो नमः । | ॐ ईहाविरहितायै नमः । |
| ॐ प्रकृन्तानां पतये नमः । | ॐ ईशशक्त्यै नमः । |
| ॐ नमः उष्णीषिणे नमः । | ॐ ईषत्स्मिताननायै नमः । (६०) |
| ॐ गिरिचराय नमः । | ॐ लकाररूपायै नमः । |
| ॐ कुलुञ्चानां पतये नमः । | ॐ ललितायै नमः । |
| ॐ नमः इषुमद्भ्यो नमः । | ॐ लक्ष्मीवाणीनिषेवितायै नमः । |
| ॐ धन्वाविभ्यश्च नमः । | ॐ लाकिन्यै नमः । |
| ॐ वो नमः । | ॐ ललनारूपायै नमः । |
| ॐ नम आतन्वानेभ्यो नमः । | ॐ लसद्दाडिमपाटलायै नमः । |
| ॐ प्रतिदधानेभ्यश्च नमः । | ॐ ललन्तिकालसत्फालायै नमः । |
| ॐ वो नमः । | ॐ ललाटनयनार्चितायै नमः । |
| ॐ नम आयच्छद्भ्यो नमः । | ॐ लक्षणोज्वलदिव्याङ्ग्यै नमः । |
| ॐ विसृजद्भ्यश्च नमः । | ॐ लक्षकोट्यण्डनायिकायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ वो नमः । | ॐ लक्ष्यार्थायै नमः । |
| ॐ नमोऽस्त्वद्भ्यो नमः । | ॐ लक्षणागम्यायै नमः । |
| ॐ विद्यद्भ्यश्च नमः। | ॐ लब्धकामायै नमः |
| ॐ वो नमः। | ॐ लतातनवे नमः । |
| ॐ नम आसीनेभ्यो नमः । | ॐ ललामराजदलिकायै नमः । |
| ॐ शयानेभ्यश्च नमः । | ॐ लम्बमुक्तालताञ्चितायै नमः । |
| ॐ वो नमः । | ॐ लम्बोदरप्रसवे नमः । |
| ॐ नमः स्वपद्भ्यो नमः । | ॐ लभ्यायै नमः । |
| ॐ जाग्रद्भ्यश्च नमः । | ॐ लज्जाढ्यायै नमः । |
| ॐ वो नमः । | ॐ लयवर्जितायै नमः । (८०) |
| ॐ नमस्तिष्ठद्भ्यो नमः । | ॐ ह्रीम्काररूपायै नमः । |
| ॐ धावद्भ्यश्च नम । | ॐ ह्रीम्कारनिलयायै नमः । |
| ॐ वो नमः । | ॐ ह्रीम्पदप्रियायै नमः । |
| ॐ नमःसभाभ्यो नमः । | ॐ ह्रीम्कारबीजायै नमः । |
| ॐ सभापतिभ्यश्च नमः । | ॐ ह्रीम्कारमन्त्रायै नमः । |
| ॐ वो नमः । | ॐ ह्रीम्कारलक्षणायै नमः । |
| ॐ नमो अश्वेभ्यो नमः । | ॐ ह्रीम्कारजपसुप्रीतायै नमः । |
| ॐ अश्वपतिभ्यश्च नमः । | ॐ ह्रीम्मत्यै नमः । |
| ॐ वो नमः ॥ | ॐ ह्रीम्विभूषणायै नमः । |
| ॐ नम आव्याधिनीभ्यो नमः। (90) । | ॐ ह्रीम्शीलायै नमः । |
| ॐ विविध्यन्तीभ्यश्च नमः । | ॐ ह्रीम्पदाराध्यायै नमः । |
| ॐ वो नमः । | ॐ ह्रीम्गर्भायै नमः । |
| ॐ नम उगणाभ्यो नमः । | ॐ ह्रीम्पदाभिधायै नमः । |
| ॐ तृगंहतीभ्यश्च नमः । | ॐ ह्रीम्कारवाच्यायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ वो नमः । | ॐ ह्रीम्कारपूज्यायै नमः । |
| ॐ नमो गृत्सेभ्यो नमः । | ॐ ह्रीम्कारपीठिकायै नमः । |
| ॐ गृत्सपतिभ्यश्च नमः । | ॐ ह्रीम्कारवेद्यायै नमः । |
| ॐ वो नमः । | ॐ ह्रीम्कारचिन्त्यायै नमः । |
| ॐ नमो व्रातेभ्यो नमः । | ॐ ह्रीम् नमः । |
| ॐ व्रातपतिभ्यश्च नमः ‖ (100) | ॐ ह्रीम्शरीरिण्यै नमः । (१००) |
| ॐ वो नमः । | ॐ हकाररूपायै नमः । |
| ॐ नमो गणेभ्यो नमः । | ॐ हलधृत्पूजितायै नमः । |
| ॐ गणपतिभ्यश्च नमः । | ॐ हरिणेक्षणायै नमः । |
| ॐ वो नमः । | ॐ हरप्रियायै नमः । |
| ॐ नमो विरूपेभ्यो नमः । | ॐ हराराध्यायै नमः । |
| ॐ विश्वरूपेभ्यश्च नमः । | ॐ हरिब्रह्मेन्द्रसेवितायै नमः । |
| ॐ वो नमः । | ॐ हयारूढासेविताङ्घ्र्यै नमः । |
| ॐ नमो महद्भ्यो नमः । | ॐ हयमेधसमर्चितायै नमः । |
| ॐ क्षुल्लकेभ्यश्च नमः । | ॐ हर्यक्षवाहनायै नमः । |
| ॐ वो नमः । | ॐ हम्सवाहनायै नमः । |
| ॐ नमो रथिभ्यो नमः । | ॐ हतदानवायै नमः । |
| ॐ अरथेभ्यश्च नमः । | ॐ हत्यादिपापशमन्यै नमः । |
| ॐ वो नमः । | ॐ हरिदश्वादिसेवितायै नमः । |
| ॐ नमो रथेभ्यो नमः। | ॐ हस्तिकुम्भोत्तुङ्गकुचायै नमः । |
| ॐ रथपतिभ्यश्च नमः । | ॐ हस्तिकृत्तिप्रियाङ्गनायै नमः । |
| ॐ वो नमः । | ॐ हरिद्राकुङ्कुमदिग्धायै नमः । |
| ॐ नमःसेनाभ्यो नमः। | ॐ हर्यश्वाद्यमरार्चितायै नमः । |
| ॐ सेनानिभ्यश्च नमः । | ॐ हरिकेशसख्यै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ वो नमः । | ॐ हादिविद्यायै नमः । |
| ॐ नमः क्षत्तृभ्यो नमः । (120) | ॐ हालामदालसायै नमः । (१२०) |
| ॐ सङ्ग्रहीतृभ्यश्च नमः। | ॐ सकाररूपायै नमः । |
| ॐ वो नमः । | ॐ सर्वज्ञायै नमः । |
| ॐ नमस्तक्षभ्यो नमः । | ॐ सर्वेश्यै नमः । |
| ॐ रथकारेभ्यश्च नमः । | ॐ सर्वमङ्गलायै नमः । |
| ॐ वो नमः । | ॐ सर्वकर्त्र्यै नमः । |
| ॐ नमः कुलालेभ्यो नमः । | ॐ सर्वभर्त्र्यै नमः । |
| ॐ कर्मारेभ्यश्च नमः । | ॐ सर्वहन्त्र्यै नमः । |
| ॐ वो नमः। | ॐ सनातनायै नमः । |
| ॐ नमः पुञ्जिष्टेभ्यो नमः । | ॐ सर्वानवद्यायै नमः । |
| ॐ निषादेभ्यश्च नमः। | ॐ सर्वाङ्गसुन्दर्यै नमः । |
| ॐ वो नमः। | ॐ सर्वसाक्षिण्यै नमः । |
| ॐ नम इषुकृद्भ्यो नमः । | ॐ सर्वात्मिकायै नमः । |
| ॐ धन्वकृद्भ्यश्च नमः । | ॐ सर्वसौख्यदात्र्यै नमः । |
| ॐ वो नमः । | ॐ सर्वविमोहिन्यै नमः । |
| ॐ नमो मृगयुभ्यो नमः । | ॐ सर्वाधारायै नमः । |
| ॐ श्वनिभ्यश्च नमः । | ॐ सर्वगतायै नमः । |
| ॐ वो नमः । | ॐ सर्वावगुणवर्जितायै नमः । |
| ॐ नमः श्वभ्यो नमः । | ॐ सर्वारुणायै नमः । |
| ॐ श्वपतिभ्यश्च नमः । | ॐ सर्वमात्रे नमः । |
| ॐ वो नमः । (140) । | ॐ सर्वाभरणभूषितायै नमः । (१४०) |
| ॐ नमो भवाय च नमः । | ॐ ककारार्थायै नमः । |
| ॐ रुद्राय च नमः । | ॐ कालहन्त्र्यै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ नमश्शर्वाय च नमः । | ॐ कामेश्यै नमः । |
| ॐ पशुपतये च नमः । | ॐ कामिकार्थदायै नमः । |
| ॐ नमो नीलग्रीवाय च नमः । | ॐ कामसञ्जीविन्यै नमः । |
| ॐ शितिकण्ठाय च नमः । | ॐ कल्यायै नमः । |
| ॐ नमः कपर्दिने च नमः । | ॐ कठिनस्तनमण्डलायै नमः । |
| ॐ व्युप्तकेशाय च नमः । | ॐ करभोरवे नमः । |
| ॐ नमःसहस्राक्षाय च नमः । | ॐ कलानाथमुख्यै नमः । |
| ॐ शतधन्वने च नमः । | ॐ कचजिताम्बुदायै नमः । |
| ॐ नमो गिरिशाय च नमः । | ॐ कटाक्षस्यन्दिकरुणायै नमः । |
| ॐ शिपिविष्टाय च नमः । | ॐ कपालिप्राणनायिकायै नमः । |
| ॐ नमो मीढुष्टमाय च नमः । | ॐ कारुण्यविग्रहायै नमः । |
| ॐ इषुमते च नमः । | ॐ कान्तायै नमः । |
| ॐ नमो ह्रस्वाय च नमः । | ॐ कान्तिधूतजपावल्यै नमः । |
| ॐ वामनाय च नमः । | ॐ कलालापायै नमः । |
| ॐ नमो बृहते च नमः । | ॐ कम्बुकण्ठ्यै नमः । |
| ॐ वर्षीयसे च नमः । | ॐ करनिर्जितपल्लवायै नमः । |
| ॐ नमो वृद्धाय च नमः । | ॐ कल्पवल्लीसमभुजायै नमः । |
| ॐ संवृध्वने च नमः। | ॐ कस्तूरितिलकाञ्चितायै नमः । (१६०) |
| ॐ नमो अग्रियाय च नमः। | ॐ हकारार्थायै नमः । |
| ॐ प्रथमाय च नमः । | ॐ हम्सगत्यै नमः । |
| ॐ नम आशवे च नमः । | ॐ हाटकाभरणोज्ज्वलायै नमः । |
| ॐ अजिराय च नमः । | ॐ हारहारिकुचाभोगायै नमः । |
| ॐ नमः शीघ्रियाय च नमः । | ॐ हाकिण्यै नमः । |
| ॐ शीभ्याय च नमः । | ॐ हल्यवर्जितायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ नम ऊर्म्याय च नम : । | ॐ हरित्पतिसमाराध्यायै नमः । |
| ॐ अवस्वन्याय च नमः । | ॐ हठात्कारहतासुरायै नमः । |
| ॐ नमः स्रोतस्याय च नमः । | ॐ हर्षप्रदायै नमः । |
| ॐ द्वीप्याय च नमः॥ (170) | ॐ हविर्भोवक्त्र्यै नमः । |
| ॐ नमो ज्येष्ठाय च नमः । | ॐ हार्दसन्तमसापहायै नमः । |
| ॐ कनिष्ठाय च नमः । | ॐ हल्लीसालास्यसन्तुष्टायै नमः । |
| ॐ नमः पूर्वजाय च नमः । | ॐ हम्समन्त्रार्थरूपिण्यै नमः । |
| ॐ अपरजाय च नमः । | ॐ हानोपादाननिर्मुक्तायै नमः । |
| ॐ नमो मध्यमाय च नमः । | ॐ हर्षिण्यै नमः । |
| ॐ अपगल्भाय च नमः । | ॐ हरिसोदर्यै  नमः । |
| ॐ नमो जघन्याय च नमः। | ॐ हाहाहूहूमुखस्तुत्यायै नमः । |
| ॐ बुद्‌ध्नियाय च नमः । | ॐ हानिवृद्धिविवर्जितायै नमः । |
| ॐ नमःसोभ्याय च नमः। | ॐ हैयङ्गवीनहृदयायै नमः । |
| ॐ प्रतिसर्याय च नमः। | ॐ हरिकोपारुणाम्शुकायै नमः । (१८०) |
| ॐ नमो याम्याय च नमः। | ॐ लकाराख्यायै नमः । |
| ॐ क्षेम्याय च नमः । | ॐ लतापूज्यायै नमः । |
| ॐ नम उर्वर्याय च नमः । | ॐ लयस्थित्युद्भवेश्वर्यै नमः । |
| ॐ खल्याय च नमः । | ॐ लास्यदर्शनसन्तुष्टायै नमः । |
| ॐ नमःश्लोक्याय च नमः । | ॐ लाभालाभविवर्जितायै नमः । |
| ॐ अवसान्याय च नमः । | ॐ लङ्घेतराज्ञायै नमः । |
| ॐ नमो वन्याय च नमः । | ॐ लावण्यशालिण्यै नमः । |
| ॐ कक्ष्याय च नमः । | ॐ लघुसिद्धिदायै नमः । |
| ॐ नमः श्रवाय च नमः । | ॐ लाक्षारससवर्णाभायै नमः । |
| ॐ प्रतिश्रवाय च नमः । | ॐ लक्ष्मणाग्रजपूजितायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ नम आशुषेणाय च नमः । | ॐ लभ्येतरायै नमः । |
| ॐ आशुरथाय च नमः । | ॐ लब्धभक्तिसुलभायै नमः । |
| ॐ नमःशूराय च नमः । | ॐ लाङ्गलायुधायै नमः । |
| ॐ अवभिन्दते च नमः । | ॐ लग्नचामरहस्तश्रीशारदापरिवीजितायै नमः । |
| ॐ नमो वर्मिणे च नमः । | ॐ लज्जापदसमाराध्यायै नमः । |
| ॐ वरूथिने च नमः । | ॐ लम्पटायै नमः । |
| ॐ नमो बिल्मिने च नमः । | ॐ लकुलेश्वर्यै नमः । |
| ॐ कवचिने च नमः । | ॐ लब्धमानायै नमः । |
| ॐ नमःश्रुताय च नमः। | ॐ लब्धरसायै नमः । |
| ॐ श्रुतसेनाय च नम :॥ (200) | ॐ लब्धसम्पत्समुन्नत्यै नमः । (२००) |
| ॐ नमो दुन्दुभ्याय च नमः । | ॐ ह्रीम्कारिण्यै नमः । |
| ॐ आहनन्याय च नमः । | ॐ ह्रीम्काराद्यायै नमः । |
| ॐ नमो धृष्णवे च नमः । | ॐ ह्रीम्मध्यायै नमः । |
| ॐ प्रमृशाय च नमः । | ॐ ह्रीम्शिखामणये नमः । |
| ॐ नमो दूताय च नमः । | ॐ ह्रीम्कारकुण्डाग्निशिखायै नमः । |
| ॐ प्रहिताय च नमः । | ॐ ह्रीम्कारशशिचन्द्रिकायै नमः । |
| ॐ नमो निषङ्गिणे च नमः । | ॐ ह्रीम्कारभास्कररुच्यै नमः । |
| ॐ इषुधिमते च नमः । | ॐ ह्रीम्काराम्भोजचञ्चलायै नमः । |
| ॐ नमस्तीक्ष्णेषवे च नमः । | ॐ ह्रीम्कारकन्दाङ्कुरिकायै नमः । |
| ॐ आयुधिने च नमः । | ॐ ह्रीम्कारैकपरायणायै नमः । |
| ॐ नमःस्वायुधाय च नमः । | ॐ ह्रीम्कारदीर्घिकाहम्स्यै नमः । |
| ॐ सुधन्वने च नमः । | ॐ ह्रीम्कारोद्यानकेकिन्यै नमः । |
| ॐ नमः स्रुत्याय च नमः । | ॐ ह्रीम्कारारण्यहरिण्यै नमः । |
| ॐ पथ्याय च नमः । | ॐ ह्रीम्कारावालवल्लर्यै नमः । |

| | |
|---|---|
| ॐ नमःकाट्याय च नमः । | ॐ ह्रीम्कारपञ्जरशुक्यै नमः । |
| ॐ नीप्याय च नमः । | ॐ ह्रीम्काराङ्गणदीपिकायै नमः । |
| ॐ नमःसूद्याय च नमः । | ॐ ह्रीम्कारकन्दारसिम्ह्यै नमः । |
| ॐ सरस्याय च नमः । | ॐ ह्रीम्काराम्भोजभृङ्गिकायै नमः । |
| ॐ नमो नाद्याय च नमः । | ॐ ह्रीम्कारसुमनोमाध्व्यै नमः । |
| ॐ वैशन्ताय च नमः । (220) | ॐ ह्रीम्कारतरुमञ्जर्यै नमः । (२२०) |
| ॐ नमःकूप्याय च नमः । | ॐ सकाराख्यै नमः । |
| ॐ अवट्याय च नमः । | ॐ समरसायै नमः । |
| ॐ नमो वर्ष्याय च नमः । | ॐ सकलागामसम्स्तुतायै नमः । |
| ॐ अवर्ष्याय च नमः । | ॐ सर्ववेदान्ततात्पर्यभूम्यै नमः । |
| ॐ नमो मेघ्याय च नमः । | ॐ सदसदाश्रयायै नमः । |
| ॐ विद्युत्याय च नमः । | ॐ सकलायै नमः । |
| ॐ नम **ईध्रियाय** च नमः । | ॐ सच्चिदानन्दायै नमः । |
| ॐ आतप्याय च नमः । | ॐ साध्यै नमः । |
| ॐ नमो वात्याय च नमः । | ॐ सद्गदिदायिण्यै नमः । |
| ॐ रेष्मियाय च नमः | ॐ सनकादिमुनिध्येयायै नमः । |
| ॐ नमो वास्तव्याय च नमः । | ॐ सदाशिवकुटुम्बिन्यै नमः । |
| ॐ वास्तुपाय च नमः ॥ (232) *(ring bell)* | ॐ सकलाधिष्ठानरूपायै नमः । |
| ॐ नमःसोमाय च नमः | ॐ सत्वरूपायै नमः । |
| ॐ रुद्राय च नमः । | ॐ समाकृत्यै नमः । |
| ॐ नमस्ताम्राय च नमः । | ॐ सर्वप्रपञ्चनिर्मात्र्यै नमः । |
| ॐ अरुणाय च नमः । | ॐ समानाधिकवर्जितायै नमः । |
| ॐ नमःशङ्गाय च नमः । | ॐ सर्वोत्तुङ्गायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ पशुपतये च नमः । | ॐ सङ्गहीनायै नमः । |
| ॐ नम उग्राय च नमः । | ॐ सगुणायै नमः । |
| ॐ भीमाय च नमः । (240) | ॐ सकलेष्टदायै नमः । (२४०) |
| ॐ नमो अग्रेवधाय च नमः । | ॐ ककारिण्यै नमः । |
| ॐ दूरेवधाय च नमः । | ॐ काव्यलोलायै नमः । |
| ॐ नमो हन्त्रे च नमः । | ॐ कामेश्वरमनोहरायै नमः । |
| ॐ हनीयसे च नमः । | ॐ कामेश्वरप्राणनाड्यै नमः । |
| ॐ नमो वृक्षेभ्यो नमः । | ॐ कामेशोत्सङ्गवासिन्यै नमः । |
| ॐ हरिकेशेभ्यो नमः । | ॐ कामेश्वरालिङ्गिताङ्ग्यै नमः । |
| ॐ नमस्ताराय नमः । | ॐ कामेश्वरसुखप्रदायै नमः । |
| ॐ नमः शम्भवे च नमः । | ॐ कामेश्वरप्रणयिन्यै नमः । |
| ॐ मयोभवे च नमः । | ॐ कामेश्वरविलासिन्यै नमः । |
| ॐ नमःशङ्कराय च नमः । | ॐ कामेश्वरतपस्सिद्ध्यै नमः । |
| ॐ मयस्कराय च नमः । | ॐ कामेश्वरमनःप्रियायै नमः । |
| **ॐ नमःशिवाय च नमः** । | ॐ कामेश्वरप्राणनाथायै नमः । |
| ॐ शिवतराय च नमः । | ॐ कामेश्वरविमोहिन्यै नमः । |
| ॐ नमस्तीर्थ्याय च नमः । | ॐ कामेश्वरब्रह्मविद्यायै नमः । |
| ॐ कूल्याय च नमः । | ॐ कामेश्ववरगृहेश्वर्यै नमः । |
| ॐ नमः पार्याय च नमः । | ॐ कामेश्वराह्लादकर्यै नमः । |
| ॐ अवार्याय च नमः । | ॐ कामेश्वरमहेश्वर्यै नमः । |
| ॐ नमः प्रतरणाय च नमः । | ॐ कामेश्वर्यै नमः । |
| ॐ उत्तरणाय च नमः । | ॐ कामकोटिनिलयायै नमः । |

www.pradosham.com

| | |
|---|---|
| ॐ नम आतार्याय च नमः । (260) | ॐ काम्क्षितार्थायै नमः । (२६०) |
| ॐ आलाद्याय च नमः । | ॐ लकारिण्यै नमः । |
| ॐ नमःशष्प्याय च नमः । | ॐ लब्धरूपायै नमः । |
| ॐ फेन्याय च नमः । | ॐ लब्धधिये नमः । |
| ॐ नमःसिकत्याय च नमः । | ॐ लब्धवाञ्छितायै नमः । |
| ॐ प्रवाह्याय च नमः । | ॐ लब्धपापमनोदूरायै नमः । |
| ॐ नम इरिण्याय च नमः । | ॐ लब्धाहङ्कारदुर्गमायै नमः । |
| ॐ प्रपथ्याय च नमः । | ॐ लब्धशक्त्यै नमः । |
| ॐ नमः किग्ंशिलाय च नमः । | ॐ लब्धदेहायै नमः । |
| ॐ क्षयणाय च नमः । | ॐ लब्धैश्वर्यसमुन्नत्यै नमः । |
| ॐ नमःकपर्दिने च नमः । | ॐ लब्धबुध्यै नमः । |
| ॐ पुलस्तये च नमः । | ॐ लब्धलीलायै नमः । |
| ॐ नमो गोष्ठ्याय च नमः । | ॐ लब्धयौवनशालिन्यै नमः । |
| ॐ गृह्याय च नमः । | ॐ लब्धातिशयसर्वाङ्गसौन्दर्यायै नमः । |
| ॐ नमस्तल्प्याय च नमः । | ॐ लब्धविभ्रमायै नमः । |
| ॐ गेह्याय च नमः । | ॐ लब्धरागायै नमः । |
| ॐ नमः काट्याय च नमः । | ॐ लब्धगत्यै नमः । |
| ॐ गह्वरेष्ठाय च नमः । | ॐ लब्धनानागमस्थित्यै नमः । |
| ॐ नमो ह्रदय्याय च नमः । | ॐ लब्धभोगायै नमः । |
| ॐ निवेष्प्याय च नमः । | ॐ लब्धसुखायै नमः । |
| ॐ नमःपाग्ंसव्याय च नमः । | ॐ लब्धहर्षाभिपूजितायै नमः । (२८०) |
| ॐ रजस्याय च नमः । | ॐ ह्रीम्कारमूर्त्यै नमः । |
| ॐ नमःशुष्क्याय च नमः । | ॐ ह्रीम्कारसौधश्रृङ्गकपोतिकायै नमः । |
| ॐ हरित्याय च नमः । | ॐ ह्रीम्कारदुग्धाब्धिसुधायै नमः । |

| | |
|---|---|
| ॐ नमो लोप्याय च नमः । | ॐ ह्रीम्कारकमलेन्द्रियायै नमः । |
| ॐ उलप्याय च नमः । | ॐ ह्रीम्कारमणिदीपार्चिषे नमः । |
| ॐ नम ऊर्व्याय च नमः । | ॐ ह्रीम्कारतरुशारिकायै नमः । |
| ॐ सूर्म्याय च नमः । | ॐ ह्रीम्कारपेटकमणये नमः । |
| ॐ नमःपर्ण्याय च नमः । | ॐ ह्रीम्कारादर्शबिम्बिकायै नमः । |
| ॐ पर्णशद्याय च नमः । | ॐ ह्रीम्कारकोशासिलतायै नमः । |
| ॐ नमोपगुरमाणाय च नमः । | ॐ ह्रीम्कारस्थाननर्तक्यै नमः । |
| ॐ अभिघ्नते च नमः । | ॐ ह्रीम्कारशुक्तिकामुक्तामणये नमः । |
| ॐ नम आख्खिदते च नमः । | ॐ ह्रीम्कारबोधितायै नमः । |
| ॐ प्रख्खिदते च नमः । | ॐ ह्रीम्कारमयसौवर्णस्तम्भविद्रुमपुत्रिकायै नमः । |
| ॐ नमो वो नमः । | ॐ ह्रीम्कारवेदोपनिषदायै नमः । |
| ॐ किरिकेभ्यो नमः । | ॐ ह्रीम्काराध्वरदक्षिणायै नमः । |
| ॐ देवानाग्ं हृदयेभ्यो नमः । | ॐ ह्रीकारनन्दनारामनवकल्पकवल्लर्यै नमः । |
| ॐ नमो विक्षीणकेभ्यो नमः । | ॐ ह्रीम्कारहिमवद्गङ्गायै नमः । |
| ॐ नमो विचिन्वत्केभ्यो नमः | ॐ ह्रीम्कारार्णवकौस्तुभायै नमः । |
| ॐ नम आनिर्हतेभ्यो नमः । (299) | ॐ ह्रीम्कारमन्त्रसर्वस्वायै नमः । |
| ॐ नम आमीवत्केभ्यो नमः ‖ (300) ‖ | ॐ ह्रीम्कारपदसौख्यदायै नमः ‖ (३००) ‖ |

<><<>><>

## 55. शिवोपासन मन्त्राः

ॐ निधनपतये नमः। निधनपतान्तिकाय नमः। ॐ ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नम ।

ॐ हिरण्याय नमः । हिरण्यलिङ्गाय नमः । ॐ सुवर्णाय नमः। सुवर्णलिङ्गाय नमः।

ॐ दिव्याय नमः । दिव्यलिङ्गाय नमः । ॐ भवाय नमः । भवलिङ्गाय नमः ।

ॐ शर्वाय नमः। शर्वलिङ्गाय नमः । ॐ शिवाय नमः । शिवलिङ्गाय नमः ।

ॐ ज्वलाय नमः। ज्वललिङ्गाय नमः । ॐ आत्माय नमः। आत्मलिङ्गाय नमः।

ॐ परमाय नमः । परमलिङ्गाय नमः ।

एतत्सोमस्य सूर्यस्य सर्वलिङ्गग् स्थापयति पाणिमन्त्रं पवित्रम् ॥

निघृष्वैरसमायुतैः। कालैर्हरित्वमापन्नैः। इन्द्रायाहि सहस्रयुक्।अग्निर्विभ्राष्टिवसनः। वायुश्श्वेतसिकद्रुकः। संवत्सरो विषूवर्णैः। नित्यास्तेऽनुचरास्तव। सुब्रह्मण्योग् सुब्रह्मण्योग् सुब्रह्मण्योम्।

धाताविधातापरमोतसंद्दक्-प्रजापतिःपरमेष्ठीविराजा । स्तोमाश्छंदाग् सिनिविदोम आहुरेतस्मैराष्ट्र-मभिसन्नमाम । अभ्यावर्तद्दवमुपमेतसाकमयग् शास्ताधिपतिर्वो अस्तु । अस्य विज्ञानमनुसग्रभध्वं इमंपश्चादनुजीवाथसर्वे।

(१) सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवे नातिभवे भवस्वमाम् । भवोद्भवाय नमः ॥

(२) वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

(३) अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

(४) तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

(५) ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

(६) नमो हिरण्यभाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥

(७) ऋतग् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥

(८) सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्र-स्सन्महो नमो नमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वो चेम शन्तमग् हृदे। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

www.pradosham.com

# 56. दिव्य स्तोत्रम्

## 56.(1) श्री कैलासपति प्रार्थना

कैलासे कमनीयरत्नखचिते कल्पद्रुमूले स्थितम् । कर्पूरस्फटिकेन्दु सुन्दरतनुं कात्यायनी सेवितम् ॥ गङ्गातुङ्ग तरङ्ग रञ्जित जटाभारं कृपासागरम् । कण्ठालङ्कृत शेषभूषणमजं मृत्युञ्जयं भावये । आगच्छ मृत्युञ्जय चन्द्रमौले व्याघ्राजिनालङ्कृत शूलपाणे । स्वभक्त संरक्षण कामधेनो प्रसीद विस्वेश्वर पार्वतीश ॥

।। श्री उमामहेश्वराभ्यां नमः ।।

## 56.(2) गोवन्दनम्

गं च दृष्ट्वा नमस्कृत्य चैव प्रदक्षिणम् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ १

सर्व कामदुधे देवि सर्वतीर्थाभिषेचिनि । पावने सुरभिश्रेष्ठे देवी दुभ्यं नमोस्तुते ॥ २

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाम् अमृतस्य नाभिः ॥ (एकाग्नि काण्डम्-२ प्रश्नः) ॥

<><><><>

## 56.(3) बिल्वाष्टकं

| | | |
|---|---|---|
| १ | त्रिदलं त्रिगुणाकारं त्रिणेत्रं च त्रियायुधम्। | त्रिजन्मपापसंहारम् एकबिल्वं शिवार्पणम् ॥ |
| २ | त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैश्शुभैः। | तव पूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥ |
| ३ | दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्। | अघोरपापसंहारम् एकबिल्वं शिवार्पणम् ॥ |
| ४ | काशीक्षेत्रनिवासं च कालभैरवदर्शनम्। | प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणम् ॥ |
| ५ | तुलसी बिल्वनिर्गुण्डी जम्बीराऽमलकं तथा। | पञ्चबिल्वमिति ख्याता एकबिल्वं शिवार्पणम् ॥ |
| ६ | तटाकं धननिक्षेपं ब्रह्मस्थाप्यं शिवालयम्। | कोटिकन्यामहादानम् एकबिल्वं शिवार्पणम् ॥ |
| ७ | दन्त्यश्वकोटिदानानि अश्वमेधसहस्रकं (शतानिच)। | सवत्सधेनुदानानि एकबिल्वं शिवार्पणम् ॥ |
| ८ | सालग्रामसहस्राणि विप्रान्नं शतकोटिकम्। | यज्ञकोटिसहस्राणि एकबिल्वं शिवार्पणम् ॥ |
| ९ | अज्ञानेन कृतं पापम् ज्ञानेनापि कृतं च यत्। | तत्सर्वं नाशमायातु एकबिल्वं शिवार्पणम् ॥ |
| १० | एकैकबिल्वपत्रेण कोटियज्ञफलं लभेत्। | महादेवस्य पूजार्थं एकबिल्वं शिवार्पणम् ॥ |
| ११ | अमृतोद्भववृक्षस्य महादेवप्रियस्य च । | मुच्यन्ते कण्टकाघाता कण्टकेभ्यो हि मानवाः॥ |

<><><><>

www.pradosham.com

## 56.(4) लिङ्गाष्टकम्

ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासितशोभितलिङ्गम् । जन्मजदु:खविनाशकलिङ्गं तत् प्रणमामि सदाशिवलिङ्गम् ‖ (१) देवमुनिप्रवरार्चितलिङ्गं कामदहं करुणाकर लिङ्गम्। रावणदर्पविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (२) सर्वसुगन्धिसुलेपितलिङ्गं बुद्धिविवर्धन कारणलिङ्गम् । सिद्धसुरासुरवन्दितलिङ्गम् तत्प्रणमामि सदाशिवलिङ्गम् ‖ (३) कनकमहामणि भूषितलिङ्गं फणिपतिवेष्टित शोभितलिङ्गम् । दक्षसुयज्ञविनाशन लिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (४) कुंकुम-चन्दनलेपितलिङ्गं पंकजहारसुशोभितलिङ्गम् । संचितपाप विनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (५) देवगणार्चित सेवितलिङ्गं भावैर्भक्तिभिरेव च लिङ्गम् । दिनकरकोटि प्रभाकरलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (६) अष्टदलोपरिवेष्टितलिङ्गं सर्वसमुद्भव कारणलिङ्गम् । अष्टदरिद्रविनाशनलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (७) सुरगुरुसुरवर पूजितलिङ्गं सुरवनपुष्पसदार्चितलिङ्गम् । परात्परं परमात्मकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम् ‖ (८) लिङ्गाष्टकमिदं पुण्यं य: पठेत् शिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ‖ (९)

<><><><>

## 56.(5) शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय - भस्माङ्गरागाय महेश्वराय। नित्याय शुद्धाय दिगम्बराय - तस्मै नकाराय नम: शिवाय ‖ (१) मन्दाकिनी सलिल चन्दन चर्चिताय - नन्दीश्वर प्रमथनाथ महेश्वराय।मन्दारपुष्प बहुपुष्प-सुपूजिताय - तस्मै मकाराय नम: शिवाय ‖ (२) शिवाय गौरीवदनाब्जबाल - सूर्याय दक्षाध्वरनाशकाय। श्रीनीलकण्ठाय वृषध्वजाय - तस्मै शिकाराय नम: शिवाय ‖ (३) वसिष्ठकुम्भोद्भवगौतमार्य - मुनीन्द्रदेवार्चितशेखराय। चन्द्रार्कवैश्वानरलोचनाय - तस्मै वकाराय नम: शिवाय ‖ (४) यज्ञस्वरुपाय जटाधराय - पिनाकहस्ताय सनातनाय। दिव्याय देवाय दिगम्बराय - तस्मै यकाराय नम: शिवाय ‖ (५) पञ्चाक्षरमिदं पुण्यं य:पठेच्छिवसन्निधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ‖

## 56.(6) दारिद्र्यदहन शिवस्तोत्रम्

विश्वेश्वराय नरकार्णवतारणाय कर्णामृताय शशिशेखर भूषणाय।कर्पूरकुन्दधवलायजटाधराय दारिद्र्यदु:ख दहनाय नम:शिवाय ‖ (१)गौरीप्रियाय रजनीशकलाधराय कालान्तकाय भुजगाधि पकङ्कणाय। गङ्गाधराय गजराजविमर्दनाय दारिद्र्यदु:ख दहनाय नम:शिवाय ‖ (२) भक्तिप्रियाय भवरोगभयापहाय उग्राय दुर्ग भवसागर तारणाय । ज्योतिर्मयाय पुनरुद्भववारणाय दारिद्र्यदु:ख दहनाय नम:शिवाय ‖ (३)चर्माम्बराय

www.pradosham.com

शवभस्मविलेपनाय भालेक्षणाय फणिकुण्डलमण्डिताय । मञ्जीरपादयुगलाय जटाधराय दारिद्र्यदु:ख दहनाय नम:शिवाय ॥ (४) पञ्चाननाय फणिराजविभूषणाय हेमांशुकाय भुवनत्रयमण्डनाय । आनन्द-भूमिवरदाय तमोहराय दारिद्र्यदु:ख दहनाय नम:शिवाय॥ (५) भानुप्रियाय दुरितार्णवतारणाय कालान्त कालान्तकाय कमलासनपूजिताय। नेत्रत्रयाय शुभलक्षणलक्षिताय दारिद्र्यदु:ख दहनाय नम:शिवाय॥(६) रामप्रियाय रघुनाथवरप्रदाय नागप्रियाय नागराज निकेतनाय। पुण्याय पुण्यचरिताय सुरार्चिताय दारिद्र्य-दु:ख दहनाय नम:शिवाय ॥ (७) मुक्तीश्वराय फलदाय गणेश्वराय गीतप्रियाय वृषभेश्वरवाहनाय । मातङ्गचर्मवसनाय महेश्वराय दारिद्र्यदु:ख दहनाय नम:शिवाय॥ (८) गौरीविलास भुवनाय महोदयाय पञ्चाननाय शरणागत रक्षकाय। शर्वाय सर्वजगतामधिपाय तस्मै दारिद्र्यदु:ख दहनाय नम:शिवाय॥ (९)

<><><><>

## 56.(7) अर्धनारीश्वरस्तोत्रम्

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय । धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥ (१) कस्तूरिका कुङ्कुम चर्चितायै चितारजःपुञ्जविचर्चिताय। कृतस्मरायै विकृतस्मराय नम:शिवायै च नमः शिवाय ॥ (२) झणत्क्वणत्कङ्कणनूपुरायै पादाब्जराजत्फणिनूपुराय । हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ॥ (३) विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय। समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ॥ (४) मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय। दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ (५) अम्भोधर-श्यामलकुन्तलायै तटिद्प्रभाताम्रजटाधराय। निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥ (६) प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय। जगज्ञनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय ॥ (७) प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय। शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ॥ (८) एतत्पठेदष्टकमिष्टदं यो भक्त्या स मान्यो भुवि दीर्घजीवी। प्राप्नोति सौभाग्यमनन्तकालं भूयात्सदा तस्य समस्तसिद्धिः॥ (९)

## 56.(8) द्वादशज्योतिलिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् । उज्ञयिन्यां महाकालमोङ्कारममलेश्वरम् ॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् । सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे । हिमालये तु केदारं घुश्मेशं च शिवालये ॥
एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः । सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥

## 56. (9) नवग्रहदेवता प्रार्थना

सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मुङ्गलं मङ्गलः | सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः |
राहुर्बाहुबलं करोतु विपुलं केतुः कुलस्योन्नतिम् | नित्यं प्रीतिकरा भवन्तु भवतां सर्वे प्रसन्ना ग्रहाः ||

आदित्यादि नवग्रह देवताभ्यो नमः ||

<><><><>

## 56. (10) महालक्ष्म्यष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते। शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते॥ (१)
नमस्ते गरुडारुढे कोलासुरभयङ्करि। सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ (२)
सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि। सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥ (३)
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायनि। मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते॥ (४)
आद्यन्तरहिते देवि आदिशक्तिमहेश्वरि। योगज्ञे योगसम्भूते महालक्ष्मि नमोऽस्तु ते॥ (५)
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे। महापापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ (६)
पद्मासनस्थिते देवि परब्रह्मस्वरुपिणि। परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥ (७)
श्वेताम्बरधरे देवि नानालङ्कारभूषिते। जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥ (८)
महालक्ष्म्यष्टकस्तोत्रं यः पठेत् भक्तिमान्नरः। सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा॥ (९)
एककाले पठेन्नित्यं महापापविनाशनम्। द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः॥ (१०)
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्। महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदाशुभा॥ (११)

## 56. (11) अन्नपूर्णास्तोत्रम्

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी । प्रालेयाचल-वंशपावनकरी काशीपुराधीश्वरी । भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥ अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे । ज्ञानवैराग्यसिध्यर्थं भिक्षां देहि च पार्वति । माता मे पार्वती देवी पिता देवो महेश्वरः । बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥

<><><><>

**(धूपं, दीपं, नैवेद्यं)**

www.pradosham.com

## 57. धूप मन्त्रं

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानंदृग्हस्व माह्वारमित्रस्य त्वा चक्षुषा प्रक्षेमा भेर्मा संविक्था मा त्वाहिग्ंसिषम् ॥

<><><><>

## 58. एक हारति दीपं

उद्दीप्यस्व जातवेदोऽपघ्नं निर्ऋतिं मम। पशूग्श्च मह्यमावह जीवनं च दिशोदिश। मानोहिग्ंसीज्ञातवेदो गामश्वं पुरुषं जगत्। अबिभ्रदग्न आगहि श्रिया मा परिपातय॥ एक हारति दीपं दर्शयामि॥

## 59. नैवेद्य समर्पणं

ॐ भूर्भुवःसुवः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । **देवसवितप्रसुवा** ।।

(प्रातः - morning) सत्यं त्वर्तेन परिषिञ्चामि। (सायं - evening) ऋतं त्वा सत्येन परिषिञ्चामि। अमृतोपस्तरणमसि - इति किञ्चिज्जलं विसृज्य । ( sprinkle water )

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ उदानाय स्वाहा ।

ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा । ब्रह्मणि म आत्मा अमृतत्वाय।

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसि मधुमत्पार्थिवग्ं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाग्ं अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥ मधु मधु मधु ॥

ॐ **सोमास्कन्दाय** नमः । आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः । दिव्या**न्नं** घृतगुळपायसं, नालिकेर खण्डद्वयं, कदलीफलं महानैवेद्यं निवेदयामि। मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि। हस्तप्रक्षालनं समर्पयामि। पादप्रक्षालनं समर्पयामि। पुनराचमनीयं समर्पयामि।

ॐ भूर्भुवःसुवः। पूगीफलसमायुक्तं नागवल्ली दलैर्युतम्। कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

www.pradosham.com

ॐ श्री सोमास्कन्दाय नमः कर्पूर ताम्बूलं समर्पयमि । समस्तोपचारान् समर्पयामि।

निर्माल्य देवतायै नमः निर्माल्यं परिकल्पयामि ||

(*Take a small portion of naivedyam and keep for Nanadikeshwara Pooja, to be offered with a banana, after performing Nandikeshwara Pooja as per page no. 131*)

## 60. दीप आराधनै – अलङ्कार दीपं

ॐ **दीपराजाय नमः । गन्ध,पुष्प, दूप दीप सकलारादनै स्वर्चितं** ||

सप्रथसभां मे गोपाय। ये च सभ्याःसभासदः । तानिन्द्रियावतः कुरु। सर्वमायुरुपासताम्। अ हे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रै विदा विदुः। ऋचःसामानि यजूंषि। सा हि श्रीरमृता सताम् । पञ्चहूतो हवै नामैषः। तं वा एतं पञ्चहूतगं सन्तम्। पञ्चहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः - आत्मन्नात्मन्नित्यामन्त्रयत।

महागणपतये नमः, सोमास्कन्दाय नमः, शान्ति दुर्गा परमेश्वरिये नमः इष्टदेवताय नमः, कुलदेवताय नमः, ग्रामदेवताय नमः, गृहदेवताय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः अलङ्कार पंचमुख दीपम् दर्शयामि ||

## 61. कर्पूर नीराजनं

सोमो वा एतस्य राज्यमादत्ते। यो राजा सन् राज्यो वा सोमेन यजते। देवसुवा मेतानिहवींगंषि भवन्ति। एतावन्तो वै देवानागं सवाः। त एवास्मै सवान्प्रयश्चन्ति। त एनं पुनः सुवन्ते राज्याय। देवसू राजा भवति||

बहुग्वै बह्वश्वायै बह्वजाविकायै । बहुब्रीहि यवायै बहुमाशातिलायै । बहुहिरण्यायै बहुहस्तिकायै । बहुदासपूरुषायै रयिमत्त्यै पुष्टिमत्यै । बहुरायस्पोषायै राजाऽस्तु ||

साङ्ग्रहण्येष्ट्या यजते । इमां जनतागं सङ्गृह्णानीति । द्वादशारत्नी रशना भवति । द्वादशमासास्संवथ्सरः। संवथ्सरमेवावरुन्धे । मौञ्जी भवति । ऊर्ग्वै मुञ्जाः। ऊर्जमेवावरुन्धे । चित्रा नक्षत्रं भवति । चित्रं वा एतत्कर्म । यदश्वमेधस्समृद्ध्यै ||

नर्यप्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्यमाणां च । अमृते सत्ये प्रतिष्ठताम् । अथर्व पितुं मे गोपाय । रसमन्नमिहायुषे । अदब्दा योऽशीततनो। अविषं नः पितुं कृणु। शग्स्य पशून्मे गोपय । द्विपादो ये चतुष्पदः । अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । सप्रथसभां मे गोपय । ये च सभ्यास्सभासदः । तानिन्द्रियावतः कुरु। सर्वमायुरुपासताम् । अ हे बुध्निय मन्त्रं मे गोपय । यमृषयस्त्रै विदा विदुः । ऋचस्सामानि यजूंषि । सा हि श्रीरमृता सताम् ॥

न तत्र सूर्योभाति न चन्द्र तारकं नेमा विद्युतोभान्ति कुतोऽयमग्निः । तमेव भान्त मनुभाति सर्वं तस्यभासा सर्वमिदं विभाति ।

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातः। अग्निर्वा ऋतम् । असावादित्यस्सत्यम् । अग्निमेव तदादित्येन सायं परिषिञ्चति । अग्निनादित्यं प्रातस्सः। यावदहोरात्रे भवतः । तावदस्य लोकस्य । नार्तिर्न रिष्टिः । नान्तो न पर्यन्तोस्ति । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद ॥

त्र्यम्बकं यजामह इत्याह । मृत्योर्मुक्षीय माऽमृतादिति वा वै तदाह । उत्किरन्ति । भगस्य लीप्सन्ते । मूते कृत्वा सजन्ति । यथा जनं यतेऽवसं करोति । तादृगेवतत् । एष ते रुद्र भाग इत्याह निरवत्यै । अप्रतीक्षमायन्ति । अपः परिषिञ्चति । रुद्रस्यान्तर्हित्यै ।

प्रवा एतेऽस्माल्लोकाच्च्यवन्ते । ये त्र्ययम्बकैश्चरन्ति । आदित्यं चरुं पुनरेत्य निर्वपति । इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति ॥

विराजमेव तैराप्त्वा यजमानोऽवरुन्धे । एकादश दश त आलभ्यन्ते । एकादशाक्षरा त्रिष्टुप् । त्रैष्टुभाः पशवः । पशूनेवावरुन्धे। वैश्वदेवो वा अश्वः । नानादेवत्याः पशवो भवन्ति। अश्वस्य सर्वत्वाय । नानारूपा भवन्ति । तस्मान्नानारूपाः पशवः । बहुरूपा भवन्ति । तस्माद्बहुरूपाः पशवस्समृध्यै ॥

ऐन्द्राग्नमुपसादितम् । सर्वाभ्यो वा एष देवताभ्यो जुहोति । योऽग्निहोत्रं जुहोति । यथा खलु वै धेनुं तीर्थे तर्पयति । एवमग्निहोत्री यजमानं तर्पयति । तृप्यति प्रजया पशुभिः । प्र सुवर्गं लोकं जानाति । पश्यति पुत्रम् । पश्यति पौत्रम् । प्र प्रजया पशुभिर्मिथुनैर्जायते । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद ॥

तं काले काल आगते यजते । ब्रह्मवादिनो वदन्ति । स त्वा अर्ध्वयुस्स्यात् । यो यतो यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयतीति । वाताद्वा अध्वर्युर्यज्ञं प्रयुङ्क्ते । देवा गातु विदो गातुं वित्वा गातुमितेत्याह । यत एव यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयति । प्रतितिष्ठति प्रजया पशुभिर्यजमानः ।

तस्माद्वाजयेययाजी पूतो मेध्यो दक्षिण्यः । प्राङ्ङुद्द्रवति सोमग्रहैः । अमुमेव तैर्लोकम भिजयति । प्रत्यङ्ङ्स्सुराग्रहैः । इममेव तैर्लोकमभिजयति । प्रतिष्ठन्ति सोमग्रहैः । यावदेव सत्यम् । तेन सूयते ।वाजसृद्भ्यस्सुराग्रहाम् हरन्ति ।अनृतेनैव विशग्ं सग्ं सृजति। हिरण्यपात्रं मधोः पूर्णं ददाति । मधव्यो सानीति । एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुस्तेजो दधाति ॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय शंकराय श्रीमन्महादेवाय नमः

महागणपतये नमः, सोमास्कन्दाय नमः, शान्ति दुर्गा परमेश्वर्यै नमः इष्टदेवताय नमः, कुलदेवताय नमः, ग्रामदेवताय नमः, गृहदेवताय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः समस्तोपचारार्थे कर्पूर नीराजनं दर्शयामि - रक्षान्धारयामि ॥

साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यग्ं राज्यं महाराज्यमाधिपत्यम् ॥

इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष। रक्षां धारयामि ॥ इति नीराजनरक्षां धारयेत् ॥

<><><><>

www.pradosham.com

# 62. मन्त्रपुष्पम्

ॐ योऽपां पुष्पं वेद | पुष्पवान् प्रजावान् पशुमान् भवति | चन्द्रमा वा अपां पुष्पम् | पुष्पवान् प्रजावान् पशुमान् भवति | य एवं वेद | योऽपामायतनं वेद | आयतनवान् भवति ‖ अग्निर्वा अपामायतनम् | आयतनवान् भवति | योऽग्नेरायतनं वेद |

आयतनवान् भवति | आपो वा अग्नेरायतनम् | आयतनवान् भवति | य एवं वेद | योऽपामायतनं वेद | आयतनवान् भवति ‖ वायुर्वा अपामायतनम् | आयतनवान् भवति | यो वायोरायतनं वेद | आयतनवान् भवति |

आपो वै वायोरायतनम् | आयतनवान् भवति | य एवं वेद | योऽपामायतनं वेद | आयतनवान् भवति ‖ असौ वै तपन्नपामायतनम् | आयतनवान् भवति | योऽमुष्य तपत आयतनं वेद | आयतनवान् भवति | आपो वा अमुष्य तपत आयतनम् |

आयतनवान् भवति | य एवं वेद | योऽपामायतनं वेद | अयतनवान् भवति ‖ चन्द्रमा वा अपामायतनम् | आयतनवान् भवति | यश्चन्द्रमस आयतनं वेद | आयतनवान् भवति | आपो वै चन्द्रमस आयतनम् | आयतनवान् भवति |

य एवं वेद | योऽपामायतनं वेद | आयतनवान् भवति ‖ नक्षत्राणि वा अपामायतनम् | आयतनवान् भवति | यो नक्षत्राणामायतनं वेद | आयतनवान् भवति | आपो वै नक्षत्राणामायतनम् | आयतनवान् भवति | य एवं वेद |

योऽपामायतनं वेद | आयतनवान् भवति ‖पर्जन्यो वा अपामायतनम् | आयतनवान् भवति | यः पर्जन्यस्यायतनं वेद | आयतनवान् भवति | आपो वै पर्जन्यस्याऽऽयतनम् | आयतनवान् भवति | य एवं वेद | योऽपामायतनं वेद |

आयतनवान् भवति ‖ संवत्सरो वा अपामायतनम् | आयतनवान् भवति | यस्संवत्सरस्यायतनं वेद | आयतनवान् भवति | आपो वै संवत्सरस्यायतनम् | आयतनवान् भवति | य एवं वेद | योऽप्सु नावं प्रतिष्ठितां वेद | प्रत्येव तिष्ठति ‖ ८ ‖

www.pradosham.com

ॐ तद्ब्रह्मा। ॐ तद्वायुः। ॐ तदात्मा। ॐ तथ्सत्यम् । ॐ तथ्सर्वम् । ॐ तत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां विश्व मूर्तिषु। त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वगं् रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः। त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवःसुवरोम्॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजदे तद्यतयो विशन्ति। वेदान्तविज्ञानसुनिश्चितार्थाः सन्यास योगाद्यतयःशुद्धसत्त्वाः । ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे। दहं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसगूस्थम्। तत्रापि दहं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्। यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृति-लीनस्य यः परःस महेश्वरः॥

## 63. भृदावलि (शृङ्गेरि)

ॐ श्रीमत्परमहंस-परिव्राजकाचार्यवर्य-पदवाक्यप्रमाणपारावारपारीण - यमनियमासन प्राणायाम प्रत्याहार धारणा-ध्यान-समाधि-अष्टाङ्गयोगानुष्ठाननिष्ठ-तपश्चक्रवर्ति-अनाद्यविछि**न्न** श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त-षड्दर्शनस्थापनाचार्य - व्याख्यानसिंहासनाधीश्वर - सकलनिगमागमसारहृदय - सांख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक - सर्वतन्त्रस्वतन्त्र - आदिराजधानी - विद्यानगरमहाराजधानी - कर्णाटकसिंहासन प्रतिष्ठापनाचाय - श्रीमद्राजाधिराजगुरु - भूमण्डलाचार्य - ऋष्यशृङ्गपुरवराधीश्वर - तुङ्गभद्रातीरवासी-श्रीमद्विद्याशङ्कर पादपद्माराधक - श्रीमद्जगद्गुरु - **श्रीमदभिनवविद्यातीर्थमहास्वामि** - गुरुकरकमलसञ्जात - श्रीमद्जगद्गुरु - **श्रीभारतीतीर्थमहास्वामीनाम्** - तत्करकमलसञ्जात - श्रीमद्जगद्गुरु - **श्रीविधुशेखरभारती** महास्वामीनां च चरणारविन्दयोः साष्टाङ्गप्रणामान् समर्पयामः ॥

<><><><>

www.pradosham.com

# 64. स्वस्ति वाक्यम् (काञ्ची)

श्री काञ्ची कामकोटी पीठाधिपति जगद्गुरु श्री शङ्कराचार्य श्रीचरणयोः प्रणामाः।

श्री गुरुभ्यो नमः।

श्रीमहात्रिपुरसुन्दरीसमेत श्रीचन्द्रमौलीश्वराय नमः।

ॐ स्वस्ति - श्रीमदखिलभूमण्डलालङ्कार - त्रयस्त्रिंशत्कोटिदेवतासेवित श्रीकामाक्षीदेवीसनाथ श्रीमदेकाम्रनाथ - श्रीमहादेवीसनाथ श्रीहस्तिगिरिनाथ - साक्षात्कार परमाधिष्ठान - सत्यव्रत नामाङ्कित काञ्ची दिव्यक्षेत्रे - शारदामठसुस्थितानां - अतुलित सुधारसमाधुर्य - कमलासन- कामिनी धम्मिल्लसम्फुल्ल मल्लिका मालिकानिष्यन्द मकरन्दझरी सौवस्तिक वाङ्निगुम्भ विजृम्भणानन्द तुन्दिलित मनीषिमण्डलानां - अनवरत अद्वैतविद्याविनोदरसिकानां - निरन्तरालङ्कृतीकृत - शान्तिदान्तिभूम्नां - सकलभुवन चक्रप्रतिष्ठापक श्रीचक्रप्रतिष्ठा विख्यात यशोऽलङ्कृतानां - निखिलपाषण्डषण्डकण्टकोत्पाटनेन विशदीकृत वेदवेदान्तमार्ग षण्मत- प्रतिष्ठापकाचार्याणां - श्रीमद्परमहंस परिव्राजकाचार्यवर्य **श्रीजगद्गुरु श्रीमत् शङ्कर भगवत्पादाचार्याणां** अधिष्ठाने सिंहासनाभिषिक्त - **श्रीमत् चन्द्रशेखरेन्द्र** सरस्वती

संयमीन्द्राणां **- अधिष्ठाने** अन्तेवासिवर्य **श्रीमज्जयेन्द्र सरस्वती** श्रीपादानां - तदन्तेवासिवर्य **श्रीमत् शङ्कर विजयेन्द्र सरस्वती** श्रीपादानां च, चरणनलिनयोः सप्रश्रयं साञ्जलिबन्धं च नमस्कुर्मः ॥

<><><><>

ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥ सुवर्णपुष्पं समर्पयामि। पारिजातपुष्पं समर्पयामि ।

# 65. प्रदक्षिण नमस्कारं च प्रार्थना

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ॥

प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये । प्रदक्षिणं करोमीश प्रसीद परमेश्वर ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात् कारुण्यभावेन रक्ष रक्ष महेश्वर ॥

वक्रतुण्ड महाकाय सूर्यकोठी (कोठीसूर्य) समप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमं । शिवमार्ग प्रणेतारं प्रणतोस्मि सदाशिवं ॥

वागर्थविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

www.pradosham.com

हालास्यनाथाय महेश्वराय हालाहलालंकृतकन्धराय । मीनेक्षणायाः पतये शिवाय नमो नमः सुन्दरताण्डवाय ॥

कृपासमुद्रं सुमुखं त्रिनेत्रं जटाधरं पार्वतीवामभागम्।सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥

नमश्शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्याम् । नगेन्द्रकन्यावृषकेतनाभ्यां नमो नमःशङ्करपार्वतीभ्याम् ॥

रामाय राम भद्राय रामचन्द्राय वेदसे। रघुनाथाय नाथाय सीतायाः पतये नमः॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं। विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिहृध्यानगम्यं। वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

श्री राम राम रामेति रमे रामे मनोरमे। सहस्रनाम तत्तुल्यं राम नाम वरानने॥ *(3 times)*

नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

अन्नपूर्णे सदापूर्णे शङ्कर प्राणवल्लभे । ज्ञान वैराग्य सिध्यर्थं भिक्षां देहि च पार्वती।
माता मे पार्वती देवी पिता देवो महेश्वरः । बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥

साम्ब परमेश्वराय नमः, आवाहिताभ्यः सर्वाभ्यो देवताभ्यो नमः अनन्तकोठि प्रदक्षिणनमस्कारान् समर्पयामि । छत्रं धारयामि । नृत्तं दर्शयामि। वाद्यं घोषयामि। गीतं श्रावयामि । आन्दोळिकाम् आरोपयामि । अश्वम् आरोपयामि। गजम् आरोपयामि। रथम् आरोपयामि। समस्त राजोपचारान् षोडशोपचारान् सत्योपचारान् समर्पयामि॥

## 66. गुरु परम्परा प्रार्थना

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च । व्यासं शुकं गौड्पदं महान्तं गोविन्दयोगीन्द्र-मथास्य शिष्यम् । श्री शङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् । तं तोटकं वातिर्ककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥ शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥ श्रुतिस्स्मृतिपुराणानामालयं करुणालयम् । नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

## 67. तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत् कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शङ्कर देशिक मे शरणम् ॥ ॥ १ ॥

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शङ्कर देशिक मे शरणम् ॥ ॥ २ ॥

भवता जनता सुहिता भविता विजबोधविचारण चारुमते ।
कलयेश्वरजीवविवेकविदं भव शङ्कर देशिक मे शरणम् ॥ ॥ ३ ॥

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शङ्कर देशिक मे शरणं ॥ ॥ ४ ॥

सुकृतेधिकृते बहुधा भवतो भविता समदर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शङ्कर देशिक मे शरणम् ॥ ॥ ५ ॥

जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो भव शङ्कर देशिक मे शरणम् ॥ ॥ ६ ॥

गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां नहि कोऽपिसुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शङ्कर देशिक मे शरणम् ॥ ॥ ७ ॥

विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शङ्कर देशिक मे शरणम् ॥ ॥ ८ ॥

<><><><>

## 68. वेदपारायणम्

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् ऋषिगणवन्द्या ऋग्वेदः प्रिया **ऋग्वेद** अवधारया॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्॥

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् यज्ञरक्षका यजुर्वेदप्रिया **यजुर्वेद** अवधारया॥

ॐ इषेत्वोर्जेत्वावा यवस्थो पायवस्स्थ देवोवस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥

www.pradosham.com

**आप्यायध्वमघ्निया देवभाग मूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मावस्तेन ईशत माऽघशग्ंसो रुद्रस्य हेतिःपरिवो वृणु ध्रुवास्मिन्गोपतौस्यात बह्वी र्यजमानस्य पशून्पाहि ||१||**

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् ।

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् सङ्गीत नायका सामगानप्रिया **सामगान** अवधारया

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि ||

ॐ एतथ्साम गायन्नास्ते। हा ३ वु हा ३ वु हा ३ वु। अहम**न्न** - महम**न्न** -महम**न्न**म्। अहम**न्ना**दो २ ऽहम**न्ना**दो २ ऽहम**न्ना**दः । अहगग् श्लोकक्-दहगग् श्लोकक्-दहगग् श्लोककृत्। अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ । योमा ददाति स इदेव मा ३ वाः। अह-म**न्न**म**न्न** - मदन्तमा ३ ध्मि । अहं विश्वं भुवन-मभ्यभवाम् । सुवर्ण ज्योतीः । य एवं वेद । इत्युपनिषत्

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् अथर्वणवेदप्रिया **अथर्वणवेद** अवधारया

ॐ श**न्नो** देवी रभिष्ट्य आपोभवन्तु पीतये। शं यो रभि स्त्रवन्तु नः ।

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः || *(or alternatively.)*

ॐ अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा अन्यमाहवनीयं प्रणीय अग्नीनन्वादधाति । न गतश्रियोऽन्यमग्निं प्रणयति || (श्रौतसूत्रम्)

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् पुराणवाक्यप्रिया **पुराणवाक्य** अवधारया।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्म संस्थापनार्थाय संभवामि युगे युगे ||

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् **पंचांग पठनप्रिया** पंचांग पठनफल अवधारया ||

www.pradosham.com

श्रीकल्याणगुणावहं रिपुहरं दु:स्वप्नदोषापहं । गंगास्नान विषेषपुण्यफलदं गोदानतुल्यं नृणां । आयुर्वृद्धिं उत्तमं शुचिकरं संतानसंपत्प्रदं । नानाकर्मसुसाधनं समुदितं पंचांगमाकर्ण्यतां ‖(१) तिथि श्रवणादारोग्यं वारादायुष्यवर्धनं । नक्षत्रात् पापमुक्तिश्च योगाद्रोगनिवारणं॥(२) करणात् कार्यसिद्धिश्च पंचांग फलमुत्तमं। पंचांगं य: पठेन्नित्यं श्रोतुमिच्छंति ये नरा: । अग्निष्ठोमफलं तेषां गंगास्नानं दिनेदिने ‖ (३) य: शृणोति तिथिवारवत्सरान् ऋक्षयोग करणं दिनेदिने । प्राप्नुयात् दुरितमुक्त विग्रहश्चायुर्थमतुलं यश: सुखं ‖ (४)

## 69. स्वस्ति वचनं (आशीर्वाद:)

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलाण्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् आशीर्वाद वचन:प्रिया **आशीर्वाद वचन** अवधारया ।

ॐ स्वस्ति प्रजाभ्य: परिपालयन्ताम् न्यायेन मार्गेण महीं महीशा:। गोब्राह्मणेभ्य: शुभमस्तु नित्यं लोका: समस्ता: सुखिनो भवन्तु ‖

काले वर्षतु पर्जन्य: पृथिवी सस्यशालिनी:। देशोऽयं क्षोभरहितो ब्राह्मणा: सन्तु निर्भया: ॥

अपुत्रा: पुत्रिण: सन्तु पुत्रिण: सन्तु पौत्रिण:। अधना: सधना: सन्तु जीवन्तु शरदां शतम् ॥

ॐ स्वस्ति मन्त्रार्था: सत्या: सफला: सन्त्विति भवन्तो महान्तोऽनुगृह्णन्तु।(तथाऽस्तु)

*(Following sequence may be shuffled according to pooja and or place requirements)*

अनेन विषेशकाल पूजां ______(तिथि) (लघुन्यास)*or*(महाण्यास) पुरस्सर अन्योन्य सहायेन एकादशवार रुद्र प्रयुक्त रुद्राभिषेकेन भगवान् सर्वात्मक: ________ गोत्रोद्भवस्य *(gothram)* __________________ *(Name)* (यजमानस्य) *or*(मम) सहकुटुम्बस्य बन्धुजनवर्गस्य क्षेम-स्थैर्य-वीर्य-विजय-आयुरारोग्य-ऐश्वर्याणां अभिवृध्यर्थं भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

ये ये गृहा: शुभस्थानेषु नीरोगा निरुपद्रवा: बान्धवा: सदाचारहा: सह कुठुम्बस्य अष्टलक्ष्मी कटाक्ष सिद्ध्यर्थं भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

ये ये गृहा: शुभस्थानेषु स्थिता: ये ये गृहा: शुभ-इतर-स्थानेषु स्थिता: तेषां तेषां गृहाणां अत्यन्त, अतिशयित, शुभ एकादशस्थान फलप्राप्ति, प्रदश्च भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)** अस्मद् गृहे वसतां द्विपदां चतुष्पदां च नीरोग पूर्णायुष्य सिद्धिप्रदो भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

अद्यकृत उदकशान्ति, कल्याण, अङ्कुरार्पण, प्रतिसरबन्ध, पुण्याहवाचन, भुम्सुवन, श्रीमतोन्नयन, अब्दपूर्त्ति कर्णभूषण, आयुष्यहोम, उपनयण/भ्रह्मोपदेस कल्याण/उद्वाह जातागाति / प्राजापत्याति व्रत चतुष्टय उपक्रम उत्सर्जन कल्याण/सत्यनारायण पूजा मुहूर्त: पनुद्रएकादशनि आग्य महा प्रायश्चित्त शिवारादन मङ्गळ कर्म मुहूर्त:/ षष्ठ्यब्दपूर्ति, भीमरथशान्ति शदाभिषेक/पूर्णाभिषेक/गणपति होम, नवग्रह होम इत्याति कर्म मुहूर्त: / पुण्याकवचन जातकर्म, नामकरण, अन्नप्राशन, शौळ, उपनयण कल्याण आशीर्वाद शुभ मुहूर्त: अस्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

तन्लग्णा पेषया आदित्यादीनां नवानां गृहाणां अनुकूल्यम् भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

आरादित सकल देवता कृपया, इष्ठदेवता कुलदेवता ग्रामदेवता कृपया, सकल देवता कृपया, सद्गुरु कृपया, दैव ब्राह्मण कृपया, वेदविधुषां परमाणानां आशीर्वाद फलेन अस्य/अनयो: दम्पत्यो: पुत्री, पुत्राणां इष्ठमित्र, बन्धु वर्गाणां, स्नेहित वर्गाणां, सर्वेषां /अस्मिन् कर्मणि आस्तिकपराणां कैस्कर्यपराणां अदिकारि वर्गाणां, द्रव्य उपकारीणां, शरीर उपकारीणां, आगतानां/अनेक गताणां सर्वेषां सर्वाभीष्ठ सिद्धर्थं, पुत्र, पौत्र, धन, धाण्य, वस्तु वाहन, तेजो लक्ष्म्यादि विविद विद सकल सौभाग्य समृद्ध्यर्थं धर्मा विरोधेन चिन्तित मनोरत अवास्यर्थं, शौशील्य प्रास्यर्थम्, सौहार्द प्रात्यर्थम्, सौमुख्य प्रास्यर्थं, सौभ्रात्रु सिद्ध्यर्थं, सौमङ्गळय प्राप्त्यर्थं, सौभाग्य सिद्ध्यर्थं, सौख्य प्राप्त्यर्थं, सर्वेषां यजमानानां सहकुठुम्बानां, गृहे, उद्योगस्थले अष्ठलक्ष्मी निरन्दरदया निवास सिद्ध्यर्थं, सर्वेषां यजमानानां, तत्तत् उद्योगादि विषये अतीत कीर्ति लाभ, अभिवृद्ध्यर्थं, उद्योगादि विषये सर्वशत्रुपाद निवृत्यर्थं, सर्व जन वशीकरण प्रास्यर्थं, राजद्वारे जन आनुकूल्यता सिद्ध्यर्थं, राजयोग फल प्राप्त्यर्थं, सर्वेषां विद्यार्थीनां मेधा दक्षिणामुर्ति प्रसादेन परीक्षादि विषये उत्तम कक्षियायां उद्धीर्णता सिद्ध्यर्थं, मेधा विलास प्राप्त्यर्थं, प्रज्ञापि वृद्ध्यर्थं, व्याल वर्गाणां व्यापारादि विषये सर्वजन वशीकरण प्राप्त्यर्थं, समस्त कीर्तिलाभ अभिवृद्द्यर्थं, सर्वेषां महाजनानां / सह कुठुम्बानां शरीर वृत्त

वर्तमान वर्तिष्यमान वात, पित्त, स्लेश्माक्य, नाडीत्रय सञ्जात त्वक्चक्षुषी श्रोत्र जिह्वा घ्राण वाक् पाणि पाद पायू उत्र वक्ष: कुक्षि प्रस्तानादि सर्वास्क आश्रित सर्व रोग निवृद्ध्यर्थं, क्षिप्र आरोग्य कुठुम्ब वृद्धि मनप्रसाद सिद्ध्यर्थं सिद्धि भुद्धि वल्लबाम्भा समेत, वल्लभ महागणपति प्रसातेन सर्वाभीष्ठ सिद्ध्यर्थं सङ्कष्ठहर महागणपति प्रसादेन सर्वाभीष्ठ सिद्ध्यर्थं, कुभेर गणपति प्रसादेन अष्टैश्वर्य प्रास्यर्थं, भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)**

चेन्नै or अबुधाभि, दुबै, शार्जा सप्त महानगरस्य राजातिराज राजकिङ्किंकरण __________ *(name of Ruler)* सभ्राता सह कुठुम्बस्य बन्धु जनवर्गस्य क्षेम स्थैर्य वीर्य विजय आयुर आरोग्य - ऐश्वर्याणां अभिवृद्ध्यर्थं भूयास्त्विति भवन्त: महान्तोऽनुगृह्णन्तु। **(तथाऽस्तु)॥**

अश्विनी नक्षत्र, अपभरणी नक्षत्र, कृत्तिका नक्षत्र, पाद समवेते अश्विणी यमाग्नि दैवत्ये, अङ्गारक क्षेत्रे, मेष रासौ जातानाम् .....

कृत्तिका नक्षत्र पादत्रय, रोहिणी नक्षत्र, मृगशीरो नक्षत्र पूर्वपाद, समवेते अग्नि, प्रजापति, सोम दैवत्ये शुक्र क्षेत्रे, वृषभ रासौ जातानाम् ....

मृगशीरो नक्षत्र उत्तरपाद, आर्द्रा नक्षत्र, पुनर्वसू नक्षत्र पादत्रय, समवेते सोमरुद्रादिति दैवात्ये, बुध क्षेत्रे, मिथुन रासौ जातानाम् .....

पुनर्वसु नक्षत्र पाद, पुष्य नक्षत्र, आश्लेषा नक्षत्र, समवेते अदिति बृहस्पति दैवात्ये, चन्द्र क्षेत्रे, कर्कटक रासौ जातानाम्......

मघा नक्षत्र, पूर्वफल्गुणी नक्षत्र, उत्रफल्गुणी नक्षत्र पाद, समवेते पितृ अर्यमा भग दैवत्ये, सूर्य क्षेत्रे, सिम्ह रासौ जातानाम् ......

उत्रफल्गूणी नक्षत्र त्रिपाद, हस्त नक्षत्र, चित्रा नक्षत्र पूर्वपाद समवेते, मगा सवितृ त्वष्ट्र दैवत्ये, बुध क्षेत्रे, कन्या रासौ जतानाम्.......

चित्रा नक्षत्र उत्तरपाद, स्वाती नक्षत्र, विशाखा नक्षत्र त्रिपाद समवेते, त्वष्ट्र वायु इन्द्राग्नि दैवत्ये, शुक्र क्षेत्रे, तुला रासौ जातानाम् .......

विशखा नक्षत्र पाद, अनूराधा नक्षत्र, ज्येष्ठा नक्षत्र समवेते, इन्द्राग्नि मित्रेन्द्र दैवत्ये, अङ्गारक क्षेत्रे, वृश्चिक रासौ जातानाम्

मूल नक्ष्त्र, पूर्वाषाडा नक्षत्र, उत्राषाडा नक्षत्र समवेते, प्रजापति आप विश्वेदेव दैवत्ये, बृहस्पति क्षेत्रे, धनुर्रासौ जातानाम्......

उत्रषाडा नक्षत्र त्रिपाद, श्रवण नक्षत्र, श्रविष्ठा नक्षत्र पूर्वपाद समवेते, विश्वेदेव विष्णु वसु दैवत्ये, शनैश्चर क्षेत्रे मकर रासौ जातानाम्, ......

श्राविष्ठा नक्षत्र उत्तरपाद, शतभिषक् नक्षत्र, पूर्वप्रोष्ठपदा नक्षत्र त्रिपाद समवेते, वसु वरुण अजैकपाद् दैवत्ये, शनैश्चर क्षेत्रे, कुम्भ रासौ जातानाम्.....

पूर्वप्रोष्ठपदा नक्षत्र पाद, उत्रप्रोष्ठपदा नक्षत्र, रेवती नक्षत्र समवेते, अहिर्बुध्न्य पूष अजैकपाद् दैवत्ये, बृहस्पति क्षेत्रे, मीन रासौ जातानाम्......

भुवन परिपालनाय ऊरिकृत दिव्य गाजापतारस्य, दूरीकृत प्रपञ्च मायाकारस्य, देशकाल देहत्रयाणाम् गुणत्रयाणाम् च, मूलभूते मूलाधार प्रथम चक्रे कृतालयस्य सर्वविघ्न नाशकस्य सर्वदेवनायकस्य सिद्धिविनायकस्य प्रसादेन,

इत: पूर्वं कृतानां, इत: परं करिष्यमाणानाम्, इदानीं क्रियमाणानां, सर्वयज्ञ कर्मणां, विघ्न विगति दोष वैकल्य पापेभ्य: रक्षणेन अभयार्थिनां, अस्माकं अभयप्रदानेन सततं यज्ञकर्म प्रवृत्तै:, सन्धुक्षणेन क्रियमाण यज्ञ कर्मण: सकल विघ्न प्रशमनेन, वेद शास्त्रोक्त सम्पूर्ण फलावास्यर्थं, महनीयानां मदपाटन लम्पठानां, अज्ञानध्वान्त विध्वम्सि विमल वीक्षण विहाराणां, आत्मज्ञान दान चतुर निर्मल चरणकमलानां, भवजलधिमग्न भक्तजन तरणैक निपुन कृपा विलासानां, निरामय निरञ्जन निर्गुण निर्विकल्प निरुपाधिक महावाक्य तत्व सिद्धान्त अद्वय कैवल्य आत्मानन्द साक्षात्कार समाकलित मानसानां, परमहंस परिव्राजक योगिवर्यानां, जगद्गुरूणां, मन्त्रगुरूणां, परमगुरूणां, परमेष्ठिगुरूणां, प्रसादेन ......

सहस्रार सरोजाते परशिवेन सह, रहसि विहरन्त्या: पृथ्वी जल पावक पवनाकाश मनस्तत्वात्मकेषु, मूलाधार, स्वाधिष्ठान, मणिपूरक, अनाहत, विशुद्धि, आज्ञा, नामक षठ्चक्रेषु सुषुम्नायां कुण्डलिन्यासह निरपायम् सञ्चरन्त्या: श्रीयोगांसिकाया:, उरुकृपारूप विपुल विविध वेद स्मृति शास्त्र विचारावगम्य विषयेन्द्रियग्राम विजय प्राप्य निस्सङ्ग चित्त

वैराग्नजात अखण्डाद्वैत आनन्द-पर- चिद्विलास अनुभूति विभूते: प्रास्त्यर्थं, सकल पावैक कारणाणां, बुद्धि-भ्रम्श-कराणां, अन्त: शत्रूणां सर्वमानव साधारणाणां, काम, क्रोध, लोभ, मोह, मद, मात्सर्यादीनां, आमूलत: निर्हरणार्थं, जप पूजा पुण्यकर्म सदाचारादि सनातनधर्म निधनैक निरीक्षणानां, वर्णाश्रम धर्म निर्रहण नित्य विहाराणां, सततं रन्ध्र अन्वेषिणां जातिभ्रम्श कराणां, लोकायतिकानां बाह्य शत्रूणां निश्शेषतया निर्मूलनार्थं .....

जाग्रत्, स्वप्न, सुशुप्तिषु मनोवाक्काय कर्मकृतानां, महापातकादि समस्त विविध पापानां, नित्यत: निरसनार्थं, आधिदैविक, आधिभौतिक, आध्यात्मिक तापजनित नाना पाप मुखारिष्ठानां निवृत्यर्थं, परप्रयुक्त मन्त्र यन्त्र शस्त्र अस्त्र विषचूर्ण पुत्तल्यादि पराभिचार जनित शत्रुकृत्या बाधानाम् प्रषमणार्थं .....

अस्मत् ....... देशे .......नगरे ..... कार्ये प्रवृत्ताणां, द्रव्यसहायकृताणां, शरीरोपकारिणां, भक्त महाजनानां साधकानां, कुले कुठुम्भे ग्रामे च सम्भवतां, महामारि विषूचिका नाडि पिटकास्पोट प्रणोपसर्ग, ज्वर अपस्मार अर्शोतिसार क्षय स्वासकास, पाण्डु कामला कुष्ठ मूर्ख उन्माद शोथ प्रमेह गुल्म शूलाधीणां, साद्य असाद्यानां, अनुपक्रम याप्यानां, हीन मिथ्यातियोग विरुधलकाल कर्म प्रकृतिजानां, शारीराणां मानसनाञ्च निजानां, आगन्तुकानां क्षुद्राणां महतांच व्याधीणां, निश्शेषतया निवारणार्थं ......

एषमे ....... सम्वत्सरे रवि सोम शुक्र बुध सौम्य मन्द राहु केतूणां, मिथ:शत्रूणां एकत्र समयोगेन वीक्षणेन दुस्थानस्थित्या वा सम्भूतानां, सम्भवतां, सम्भविष्यमाणानां च, अतिवृष्ठि, अनावृष्ठि, क्षाम,

क्षोभ, देश, देह, साधा, सामन्त, राजाक्रमण द्रव्य क्रय विक्रयादि, मूल्य वैपरीत्य द्रव्योत्पत्ति प्राप्ति, वैकल्य विषभीति व्याधि, क्षोक कक्ष्या कलह प्रकृतिकोप, विविध उत्पात दुर्निदित्तानां, निखिल दोषाणां निवृत्यर्थं .....

अतिकुपित, भूतप्रेत, दुष्ट, पिशाच, यक्ष, राक्षस, नाग, गन्धर्व, रक्षोदानव, पूतना, यक्षिण्यादि, दुष्टग्रहाणां उच्चाटनार्थं, .....

स्थावर, जङ्गम, प्राकृत, कृत्रिम, आकाश, भूमि, प्रभव, लतातन्तु, कृमिकीटादि, जात दन्त नकोद्भूतानाम्, नाना विषाणां प्रषमणार्थं, जलाऽनल झझोनिल भौमान्तरिक्ष महोत्पाताणां,

प्रकृतिकोप जाताणां, अश्रुपात रक्त श्राव दिवशीथ इन्द्रचाप दिवानक्षत्र पुश्च नक्षत्र धूम केतु सूर्यादि ग्रह पार्श्वबिम्ब चराचर वैकृतानां, लोकारिष्टानां दुर्निदित्तानां, प्रशमनार्थं ……

इह ….. सेवार्थं आगतानां, मन्त्र रक्षाधारिणां, आस्तिकानां, महाजनानां, सर्वेषामपि शरीरे वर्तमान वर्तिष्यमाणाणां, रोग शोक उपद्रवाणां, प्राक्जन्म प्रारब्ध, सञ्चित, आगामि, सकलपाप जनितानां, परासूया परद्वेष परमात्सर्य परनिन्दा परक्रूर दृष्टि हेतुकानां, महज्जनशाप देवता कोप भूतक्रोध प्रितृशाप पराभिचार पापजनितानां, अनिन्द्य निन्दा विधित्त्याग त्याज्य सेवन दुष्प्रतिग्रह दुरालाप दुर्निरीक्षण दुश्चिन्तन दुस्मरण पूज्यपूजाव्यतिक्रम जातानां, अज्ञातज्ञातपाप सम्भवानां, ग्रहदोष सम्भूतानां, सर्वारिष्ठानां निवृत्यर्थम् ……

धन, वाहन, कनक, दुकूलवस्त्र, रत्न, मुक्ताभरण, सौधगृहाराम नन्दनोद्यान, केलीभवन, विहारभवन, गन्धमालिका भोग्य वस्तु, धन, धान्य, पशु, पत्नी, पति, पुत्र, दासीदास, सेवक, मित्र, बान्धव, विभुत विद्वज्जन सरस सदस्याति सकल ऐहिक भोग सम्पताम् प्राप्यर्थं ……

सकल सौभाग्य सौन्दर्य सौमनस्य सौहार सौशीलय सौलभ्य सौमुख्य सौश्रिय सौख्य सौमङ्गल्यादि श्रेय: सम्पदां अवाप्त्यर्थं …..

वैदिक स्मार्त शौत सदाचार अनुष्ठान स्वाध्याय अध्यापन, वेद शास्त्र अध्यापन यजन धान सिक्षण प्रवचन वेदागम पुराण, इदिहास स्मृति कल्पसूत्र तन्त्र, मन्त्र, यन्त्र शास्त्र कला काव्याधि सर्व शास्त्र प्रपञ्चसार पारङ्गता प्राप्त्यर्थं ….

ऊपासितानां मन्त्रकूटानां ध्यातार्चितानां हुत पूजितानां अर्चामूर्तिनाम् आराधितानां देवतानां नित्य सान्निध्य, नित्य चैतन्य, क्षिप्रप्रसाद नित्यानुकूल सिद्ध्यर्थम् कन्यकानां विद्यावत: लक्ष्मीवत: यशस्वत: गुणवत: रूपवत: अनुरागवत: अनुरूपस्य वरस्य सम्प्राप्त्यर्थं ….

उत्कर्षापकर्ष प्रयुक्त रागद्वेष मात्सर्य जनित दोषै: परस्पर हिम्सा प्रवृत्तानां विविध क्ष्याधिष्ठितानां सचिवोत्तमानां भारतराज्य निर्वाहकरणे श्रुति स्मृति प्रोक्त धर्ममार्ग न्यायानपेत जगन्मङ्गल नीतिपरिपालण प्रव्रृते सम्पादनार्थं …..

बहुजन सैन्योत्कर्ष गर्व प्रमत्तानां साम दान भेद दण्ड चतुर्विध उपाय अनर्हाणां अति तीक्षण परुष भाषण पारीण मीषण मित्रयुक्तानां अकारणत: अन्याय्यत: द्वेष क्रोध पापोन्मेषाणां अक्रम कोप अधिक्षेप चितण्डापद मिथ्यादूषण प्रचण्ड पाषण्डाणां, महिष रक्तभीज चण्डमुण्डासुर दुष्ट कुल क्रमागतानां, मूर्ख मूर्ध्य महामूडाणां अपरिचित मैत्रीभावानां अतिक्रान्त समय सङ्कल्पानां अनास्रात धर्म गन्धानां अनार्जवैक नियत सर्वकार्याणां तुच्छ जन्म चिन्ता कर्मयुक्त दुष्टवर्गाणां विद्रावणार्थम् सिक्षणार्थं आमूलतो वा विध्वंसनार्थम् ............

सर्वे जना: सुखिनो भवन्तु । समस्त सन्मंगळानि भवन्तु । उत्तरोत्तराभिर्वृद्धिरस्तु । **(तथाऽस्तु)**

उत्तरे कर्मणि निर्विघ्नमस्तु। सत्या एषा आशिष: सन्तु ||

## 69. सङ्गीतं

ॐ स्वस्ति ॐ देवदेवोत्तमा देवतासार्वभौमा अखिलान्डकोठी ब्रह्माण्डनायका सोमास्कन्द स्वामिन् सङ्गीतप्रिया **सन्ङ्गीत** अवधारया *(Sing one song)*

## 70. नन्दिकेश्वर पूजा

ॐ भूर्भुवस्वरोम् । अस्मिन् बिम्बे नन्दिकेश्वरं ध्यायमि। आवाहयामि। नन्दीश्वराय नम: गन्ध पुष्प धूप दीप सकलारधनै स्वर्चितं ।

बाण रावण चण्डेश नन्दि भृंगिरिटादय: । महादेवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवा: ||
नन्दिकेश्वराय नम:, निर्माल्यदेवताभ्यो नम: । शिवनिर्माल्यं समर्पयामि।
समस्तापोचरन् समर्पयामि ।

ईशान: सर्वविद्यानामीश्वर: सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ||

(इति त्रिवाम् उच्चरेत्) *(recite 3 times)*

**ॐ हर। ॐ हर। ॐ हर। ।**

*Recite "om hara, om hara, om hara," on the right ear of Nandikeshwara and offer the Nirmalya Naivedhyam with a banana/ (small portion of) cooked rice, that was kept aside from Mahanaivedhyam, (page #116) to Lord Nandikeshwara and Pour water from Conch on Nandikeshwara)*

अनन्तरं श्रीशक्तिपञ्चाक्षरी मन्त्रं किञ्चित् जपेत् । हृत्पद्मकर्णिकामध्यम् उमया सह शङ्कर |

प्रविश त्वं महादेव सर्वौरावरणैः सह ॥ (इति शिवनिर्माल्यम् आघ्राय स्तोत्रादिकं पठेत्) ॥

## 71. तीर्थप्रसादनिषेवणम्

शंखमद्ये स्थितं तोयं भ्रामितं शङ्करोपरि । अङ्गलग्नं मनुष्याणां ब्रह्महत्या युतं दहेत् ।
इति शंखतीर्थं प्रोक्ष्य ।*(sprinkle holy water from Conch on self and surroundings)*
अकालमृत्युहरणं सर्वव्याधि निवारणम्। सर्वपापक्षयकरं शिवपादोदकं पावनं शुभम् ॥
इति तीर्थं पीत्वाः प्रसादं धारयेत् ॥ *(Distribute and consume the holy Abhisheka water)*

## 72. ऋग्वेद मन्त्रं – आशीर्वाद मन्त्रं

(१) नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे । भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरति दीर्घमायुः ।

## 73. यजुर्वेद मन्त्रं – आशीर्वाद मन्त्रं

(१) शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति ॥

(२) सुमंगलीरियं वधूरिमागं समेतपश्यत। सौभाग्यमस्यै दत्वा याथास्तं विपरेतन ॥

(३) इमाम् त्वमिन्द्रमीढ्वस्सुपुत्रागं सुभगां कुरु । दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥

(४) क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणागं शतभिषग्वसिष्ठः । तौ देवेभ्यः कृणुतो दीर्घमायुः॥

(५) शताय स्वाहेत्याह। शतायुर्वै पुरुषश्शतवीर्यः। आयुरेव वीर्यमवरुन्धे। सहस्रायस्वाहेत्याह ।
आयुर्वै सहस्रं । आयुरेवा वरुन्धे । सर्वस्मै स्वाहेत्याह । अपरितमेवा वरुन्धे ॥

(६) श्रेयोवसीय आयध्सम्भूतं भूतं। चित्रः केतुः प्रभा नाभान्ध्सम्भान्।
ज्योदिश्मागं स्तेजस्वानातपग्स्त पन्नभितपन् । रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः ॥

(७) आनन्दो ब्रह्मेतिव्यजानात् । आनन्दाध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि

जीवन्ति । आनन्दं प्रयन्त्यभि संविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजयापशुभिर्ब्र- ह्मवर्चसेन। महान् कीर्त्या ॥

<><><><>

पूर्णमद: पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 74. पूतत्व कृच्छ्रम्

हिरण्यगर्भ गर्भस्थं हेम बीजं विभावसोः । अनन्त पुण्य फलदं अतश्शान्तिं प्रयच्छमे ॥
मया संकल्पित (श्री महा रुद्राख्य/रुद्रैकादशिन्याख्य/अतिरुद्राख्य) शुभ कर्मणि पूतत्व सिद्ध्यर्थं प्राजापत्य कृच्छ्र प्रय्याम्नायं इदंहिरण्यं नानागोत्रेभ्यः ब्राह्मनेभ्यः तेभ्यस्तेभ्यः संप्रददे । न मम ॥

कायेन वाचा मनसेन्द्रियैर्वा बुध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन। यत् कृतं तु मया देव परिपूर्णं तदस्तु ते ॥

**- Shiva Pooja ends here –**

## 75. श्री गणपति क्रम पाठ:

ॐ गणानान्त्वा । त्वा गणपतिम् । गणपतिगं हवामहे । गणपति मिति गण - पतिम् । हवामहे कविम् । कविङ् कवीनाम् । कवीना मुपमश्रवस्तमम् । उपमश्रवस्तम मित्युप मश्रवः - तमम् । ज्येष्ठ राजम् ब्रह्मणाम् । ज्येष्ठ राजमिति ज्येष्ठ - राजम् । ब्रह्मणाम् ब्रह्मणः । ब्रह्मणस्पते । पत आ। आ नः । नशृण्वन् । शृण्वन् नूतिभिः । ऊतिभिसीद । ऊतिभिरित्यूति - भिः । सीद सादनम् । सादन मिति सादनम् ॥

<><><><>

www.pradosham.com

# 76. श्री रुद्र क्रम पाठः

**प्रथमानुवाकः**

नमस्ते । ते रुद्र । रुद्र मन्यवे । मन्यव उतो । उतो ते । उतो इत्युतो । त इषवे । इषवे नमः । नम इति नमः । नमस्ते । ते अस्तु । अस्तु धन्वने । धन्वने बाहुभ्यां । बाहुभ्या मुत । बाहुभ्या मिति बाहु - भ्यां । उत ते । ते नमः । नम इति नमः ॥ या ते । त इषुः । इषुः शिवतमा । शिवतमा शिवं । शिवतमेति शिव - तमा । शिवं बभूव । बभूव ते । ते धनुः । धनु रिति धनुः ॥ शिवा शरव्या । शरव्या या । या तव । तव तया । तया नः । नो रुद्र । रुद्र मृडय । मृडयेति मृडय ॥ या ते । ते रुद्र । रुद्र शिवा । शिवा तनूः। तनूरघोरा । अघोराऽपापकाशिनी । अपापकशिनीत्यपाप - काशिनी ॥ तया नः। नस्तनुवा । तनुवा शन्तमया । शन्तमया गिरिशन्त। शन्तमयेति शं - तमया । गिरिशन्ताऽभि । गिरिशन्तेतिगिरि - शन्त । अभि चाकशीहि ।

चाकशीहीति चाकशीहि ॥ या मिषुं । इषुं गिरिशन्त । गिरिशन्त हस्ते । गिरिशन्तेति गिरि - शन्त। हस्ते बिभर्षि । बिभर्ष्यस्तवे । अस्तव इत्यस्तवे ॥ शिवां गिरित्र । गिरित्र तां । गिरित्रेति गिरि - त्र । तां कुरु । कुरु मा । माहिग्ंसीः । हिग्ं सीःपुरुषं । पुरुषं जगत् । जगदिति जगत् ॥ शिवेन वचसा। वचसा त्वा । त्वा गिरिश । गिरिशाऽच्छ । अच्छा वदामसि । वदामसीति वदामसि ॥ यथा नः । नस्सर्वं । सर्वमित् । इज्जगत् । जगदयक्ष्मं । अयक्ष्मग्ं सुमनाः । सुमना असत् । सुमना इति सु - मनाः । असदित्यसत् ॥ अध्यवोचत् । अवोचदधिवक्ता । अधिवक्ता प्रथमः । अधिवक्तेत्यधि - वक्ता । प्रथमो दैव्यः । दैव्यो भिषक् । भिष गिति भिषक् ॥ अहीग्ंश्च । च सर्वान् । सर्वाञ्जम्भयन् । जम्भयन् सर्वाः । सर्वाश्च । च यातुधान्यः । यातुधान्य इति यातु - धान्यः ॥ असौ यः। यस्ताम्रः।ताम्रो अरुणः। अरुण उत । उत बभ्रुः । बभ्रस्सुमंगलः । सुमंगल इति सु - मंगलः ॥ ये च । चे मां । इमाग्ं रुद्राः । रुद्रा अभितः । अभितो दिक्षु । दिक्षु श्रिताः । श्रितास्सहस्रशः । सहस्रशोऽव । सहस्रश इति सहस्र - शः । अवैषां । एषाग्ं हेडः । हेड ईमहे । ईमह इतीमहे ॥ असौ यः । योऽवसर्पति । अवसर्पति नीलग्रीवः । अवसर्पतीत्यव - सर्पति । नीलग्रीवो विलोहितः । नीलग्रीव इति नील - ग्रीवः । विलोहित इति वि - लोहितः ॥ उतैनं । एनं गोपाः । गोपा अदृशन् ।

www.pradosham.com

गोपा इति गो - पाः । **अद्दशन्नद्दशन्** । अद्दशन्नुदहार्यः । उदहार्य इत्युद - हार्यः । उतैनं । एनं विश्वा । विश्वा भूतानि । भूतानि सः । स दृष्टः । दृष्टो मृडयाति । मृडयाति नः । न इति नः ॥ नमो अस्तु । अस्तु नील ग्रीवाय । नीलग्रीवाय सहस्राक्षाय । नीलग्रीवायेति नील - ग्रीवाय । सहस्राक्षाय मीढुषे । सहस्राक्षायेति सहस्र - अक्षाय । मीढुष इति मीढुषे ॥ अथो ये । अथो इत्यथो । ये अस्य । अस्य सत्वानः । सत्वानोऽहं । अहं तेभ्यः । तेभ्योऽकरं । अकरन्नमः । नम इति नमः ॥ प्रमुञ्च । मुञ्च धन्वनः । धन्वनस्त्वं । त्वमुभयोः । उभयोरार्त्नियोः । आर्त्नियोर्ज्यां । ज्यामिति ज्याम् ॥ याश्च । च ते । ते हस्ते । हस्त इषवः । इषवः परा । परा ताः । ता भगवः । भगवो वप । भगव इति भग - वः । वपेति वप ॥ अवतत्य धनुः। अवतत्येत्यव - तत्य । धनुस्त्वं । त्वगं सहस्राक्ष । सहस्राक्ष शतेषुधे । सहस्राक्षेति सहस्र - अक्ष । शतेषुध इति शत - इषुधे ॥ निशीर्य शल्यानां । निशीर्येति नि - शीर्यः । शल्यानां मुखा । मुखा शिवः । शिवो नः । नस्सुमनाः । सुमना भव । सुमना इति सु - मनाः । भवेति भव ॥ विज्यं धनुः । विज्यमिति वि - ज्यं । धनुः कपर्दिनः । कपर्दिनो विशल्यः । विशल्यो बाणवान् । विशल्य इति वि - शल्यः। बाणवागं उत । बाणवानिति बाण वान् । उतेत्युत ॥ अनेशन्नस्य । अस्येषवः । इषव आभुः । आभुरस्य । अस्य निषङ्गथिः । निषङ्गथिरिति नि -षङ्गथिः ॥ या ते । ते हेतिः । हेतिर्मीढुष्टम । मीढुष्टम हस्ते । मीढुष्टमेति मीढुः तम। हस्ते बभूव । बभूव ते । ते धनुः। धनुरिति धनुः ॥ तयास्मान् । अस्मान् विश्वतः । विश्वतस्त्वं । त्वमयक्ष्मया ।अयक्ष्मयापरि । परिब्भुज । भुजेति भुज ॥ नमस्ते । ते अस्तु । अस्त्वायुधाय । आयुधाया नातताय । अनातताय धृष्णवे । अनाततायेत्यना - तताय । धृष्णव इति धृष्णवे ॥उभाभ्यामुत। उत ते । ते नमः । नमो बाहुभ्यां। बाहुभ्यां तव । बाहुभ्यामिति बाहु-भ्यां । तव धन्वने । धन्वन इति धन्वने ॥ परि ते । ते धन्वनः। धन्वनो हेतिः । हेतिरस्मान् । अस्मान् वृणक्तु । वृणक्तु विश्वतः । विश्वत इति विश्वतः ॥ अथो यः । अथो इत्यथो । य इषुधिः । इषुधिस्तव । इषुधिरितीषु - धिः। तवाऽऽरे । आरे अस्मत् । अस्मन्नि । निधेहि । धेहि तं । तमितितम् ॥

**द्वितीयाऽनुवाकः** नमो हिरण्यबाहवे । हिरण्यबाहवे सेनान्ये । हिरण्यबाहव इति हिरण्य-बाहवे । सेनान्ये दिशां । सेनान्य इति सेना - न्ये । दिशां च । च पतये । पतये नमः । नमो नमः। नमो वृक्षेभ्यः । वृक्षेभ्यो हरिकेशेभ्यः । हरिकेशेभ्यः पशूनाम् । हरिकेशेभ्य इति हरि - केशेभ्यः ।

पशूनां पतये |पतये नमः |नमो नमः | नम स्सस्पिञ्जराय | सस्पिञ्जराय त्विषीमते |त्विषीमते पथीनां | त्विषीमत इति त्विषि - मते | पथीनां पतये | पतये नमः | नमो नमः |नमो बब्लुशाय | बब्लुशाय विव्याधिने | विव्याधिनेन्नानां | विव्याधिन इति वि - व्याधिने | अन्नानां पतये | पतये नमः |नमो नमः |नमो हरिकेशाय | हरिकेशायोपवीतिने | हरिकेशायेति हरि - केशाय | उपवीतिने पुष्टानां |उपवीतिन इत्युप-वीतिने |पुष्टानां पतये |पतये नमः |नमो नमः |नमो भवस्य |भवस्य हेत्यै| हेत्यै जगतां |जगतां पतये | पतये नमः | नमो नमः | नमो रुद्राय | रुद्रायाततापिने |आततापिने | क्षेत्राणां | आततापिन इत्या - ततापिने |क्षेत्राणां पतये |पतये नमः | नमो नमः |नमस्सूताय | सूतायाहन्त्याय | अहन्त्याय वनानां | वनानां पतये | पतये नमः | नमो नमः | नमो रोहिताय | रोहिताय स्थपतये | स्थपतये वृक्षाणां | वृक्षाणां पतये | पतये नमः | नमो नमः | नमो मन्त्रिणे |मन्त्रिणे वाणिजाय | वाणिजायकक्षाणां |कक्षाणां पतये |पतये नमः |नमो नमः | नमो भुवन्तये | भुवन्तये वारिवस्कृताय | वारिवस्कृतायौषधीनां | वारिवस्कृतायेति वारिवः - कृताय | ओषधीनां पतये | पतये नमः | नमो नमः | नमउच्चैर्घोषाय | उच्चैर्घोषायाक्रन्दयते | उच्चैर्घोषायेत्युच्चैः -घोषाय |आक्रन्दयते पत्तीनां | आक्रन्दयत इत्या - क्रन्दयते |पत्तीनां पतये | पतये नमः |नमो नमः | नमःकृत्स्नवीताय | कृत्स्नवीताय धावते |कृत्स्नवीतायेति कृत्स्न -वीताय | धावते सत्वनां |सत्वनां पतये |पतये नमः |नम इति नमः ||

**तृतीयोऽनुवाकः** नमस्सहमानाय | सहमानाय निव्याधिने |निव्याधिन आव्याधिनीनां | निव्याधिन इति नि - व्याधिने | आव्याधिनीनां पतये | आव्याधिनीनामित्या - व्याधिनीनां | पतये नमः | नमो नमः | नमः ककुभाय | ककुभाय निषङ्गिणे | निषङ्गिणेस्तेनानां | निषङ्गिण इति नि - सङ्गिने | स्तेनानां पतये | पतये नमः |नमो नमः |नमो निषङ्गिणे | निषङ्गिण इषुधिमते |निषङ्गिण इति नि - सङ्गिने |इषुधिमते तस्कराणां |इषुधिमत इतीषुधि - मते | तस्कराणां पतये | पतये नमः |नमो नमः | नमो वञ्चते |वञ्चते परिवञ्चते |परिवञ्चते स्तायूनां |परिवञ्चत इति परि - वञ्चते| स्तायूनां पतये | पतये नमः |नमो नमः |नमो निचेरवे |निचेरवे परिचराय |निचेरव इति नि - चेरवे |परिचरायारण्यानां | परिचरायेति परि-चराय |अरण्यानां पतये | पतये नमः |नमो नमः |नमस्सृकाविभ्यः |सृकाविभ्यो

जिघांग्‌ सद्भ्यः । सृकाविभ्य इति सृकावि - भ्यः । जिघांग्‌ सद्भयो मुष्णतां । जिघांग्‌ सद्भ्य इति जिघांग्सत्‌ - भ्यः । मुष्णतां पतये । पतये नमः । नमो नमः । नमोऽसिमद्भ्यः । असिमद्भयो नक्तं। असिमद्भ्य इत्यसिमत्‌ - भ्यः । नक्तं चरद्भ्यः । चरद्भ्यः प्रकृन्तानां । चरद्भय इति चरत्‌ - भ्यः । प्रकृन्तानां पतये । प्रकृन्तानामिति प्र -कृन्तानां । पतये नमः । नमो नमः । नम उष्णीषिणे । उष्णीषिणे गिरिचराय । गिरिचराय कुलुञ्चानां । गिरिचरायेति गिरि-चराय । कुलुञ्चानां पतये। पतये नमः । नमो नमः । नम इषुमद्भ्यः । इषुमद्भ्यो धन्वाविभ्यः । इषुमद्भ्य इतीषुमत्‌ - भ्यः । धन्वाविभ्यश्च । धन्वाविभ्य इति धन्वावि - भ्यः । च वः । वो नमः । नमो नमः । नम

आतन्वानेभ्यः। आतन्वानेभ्यः प्रतिदधानेभ्यः । आतन्वानेभ्य इत्या -तन्वानेभ्यः । प्रतिदधानेभ्यश्च । प्रतिदधानेभ्य इति प्रति - दधानेभ्यः । च वः । वो नमः । नमो नमः ।नम आयच्छद्भ्यः। आयच्छद्भ्यो विसृजद्भ्यः । आयच्छद्भ्य इत्यायच्छत्‌ - भ्यः । विसृजद्भ्यश्च । विसृजद्भ्य इति विसृजत्‌ - भ्यः । च वः । वो नमः। नमो नमः । नमोऽस्यद्भ्यः । अस्यद्भ्यो विध्यद्भ्यः । अस्यद्भ्य इत्यस्यत्‌ - भ्यः । विध्यद्भ्यश्च । विध्यद्भ्य इति विध्यत्‌ - भ्यः । च वः । वो नमः । नमो नमः । नम आसीनेभ्यः । आसीनेभ्यश्शायानेभ्यः । शयानेभ्यश्च । च वः । वो नमः । नमो नमः । नमस्स्वपद्भ्यः । स्वपद्भ्यो जाग्रद्भ्यः । स्वपद्भ्य इति स्वपत्‌ - भ्यः । जाग्रद्भ्यश्च । जाग्रद्भय इति जाग्रत्‌ - भ्यः । च वः । वो नमः । नमो नमः । नमस्तिष्ठद्भ्यः । तिष्ठद्भ्यो धावद्भ्यः । तिष्ठद्भय इति तिष्ठत्‌ - भ्यः । धावद्भ्यश्च । धावद्भय इति धावत्‌ - भ्यः । च वः । वो नमः । नमो नमः । नमस्सभाभ्यः । सभाभ्यस्सभापतिभ्यः । सभापतिभ्यश्च । सभापतिभ्य इति सभापति - भ्यः । च वः । वो नमः । नमो नमः । नमो अश्वेभ्यः । अश्वेभ्योऽश्वपतिभ्यः । अश्वपतिभ्यश्च । अश्वपतिभ्य इत्यश्वपति - भ्यः । च वः । वो नमः । नम इति नमः ॥

**चतुर्थोऽनुवाकः** नम आव्याधिनीभ्यः । आव्याधिनीभ्यो विविध्यन्तीभ्यः । आव्याधिनीभ्य इत्या - व्याधिनीभ्यः । विविध्यन्तीभ्यश्च । विविध्यन्तीभ्य इति वि - विध्यन्तीभ्यः । च वः । वो नमः । नमो नमः । नम उगणाभ्यः । उगणाभ्यस्तृंग्‌ हतीभ्यः । तृंग्‌ हतीभ्यश्च । च वः । वो नमः । नमो नमः । नमो गृथ्सेभ्यः । गृथ्सेभ्यो गृथ्सपतिभ्यः । गृथ्सपतिभ्यश्च । गृथ्सपतिभ्य इति गृथ्सपति - भ्यः । च वः ।

वो नमः | नमो नमः | नमो व्रातेभ्यः | व्रातेभ्यो व्रातपतिभ्यः | व्रातपतिभ्यश्च | व्रातपतिभ्य इति व्रातपति-भ्यः | च वः | वो नमः | नमो नमः | नमो गणेभ्यः | गणेभ्यो गणपतिभ्यः | गणपतिभ्यश्च | गणपतिभ्य इति गणपति - भ्यः | च वः | वो नमः | नमो नमः | नमो विरूपेभ्यः | विरूपेभ्यो विश्वरूपेभ्यः | विरूपेभ्य इति वि - रूपेभ्यः | विश्वरूपेभ्यश्च | विश्वरूपेभ्य इति विश्व - रूपेभ्यः | च वः | वो नमः | नमो नमः | नमो महद्भ्यः | महद्भ्यः क्षुल्लकेभ्यः | महद्भ्य इति महत् - भ्यः | क्षुल्लकेभ्यश्च | च वः | वो नमः| नमो नमः | नमो रथिभ्यः | रथिभ्योऽरथेभ्यः | रथिभ्य इति रथि - भ्यः| अरथेभ्यश्च | च वः | वो नमः | नमो नमः | नमो रथेभ्यः | रथेभ्योऽरथपतिभ्यः | रथपतिभ्यश्च | रथपतिभ्य इति रथपति-भ्यः | च वः | वो नमः | नमो नमः | नमस्सेनाभ्यः | सेनाभ्यस्सेनानिभ्यः | सेनानिभ्यश्च | सेनानिभ्य इति सेनानि - भ्यः | च वः | वो नमः | नमो नमः | नमः क्षत्तृभ्यः | क्षत्तुभ्यस्संगृहीतृभ्यः | क्षत्तृभ्य इति क्षत्तृ - भ्यः | संग्रहीतृभ्यश्च | संग्रहीतृभ्य इति संग्रहीतृ - भ्यः | च वः | वो नमः | नमो नमः | नमस्तक्षभ्यः | तक्षभ्यो रथकारेभ्यः | तक्षभ्य इति तक्ष - भ्यः । रथ कारेभ्यश्च | रथकारेभ्य इति रथ - कारेभ्यः | च वः | वो नमः | नमो नमः | नमः कुलालेभ यः | कुलालेभ्यः कर्मारेभ्यः | कर्मारेभ्यश्च | च वः | वो नमः | नमो नमः | नमः पुञ्जिष्टेभ्यः | पुञ्जिष्टेभ्यो निषादेभ्यः | निषादेभ्यश्च | च वः | वो नमः | नमो नमः | नम इषुकृद्भ्यः | इषुकृद्भ्यो धन्वकृद्भ्यः | इषुकृद्भ्य इती षुकृत् - भ्यः | धन्वकृद्भ्यश्च | धन्वकृद्भ्य इति धन्वकृत् - भ्यः | च वः | वो नमः | नमो नमः | नमो मृगयुभ्यः | मृगयुभ्यःश्वनिभ्यः | मृगयुभ्य इति मृगयु - भ्यः | श्वनिभ्यश्च | श्वनिभ्य इति श्वनि - भ्यः | च वः | वो नमः | नमो नमः | नमः श्वभ्यः | श्वभ्य श्वपतिभ्यः | श्वभ्य इतिश्व - भ्यः | श्वपतिभ्यश्च | श्वपतिभ्य इति श्वपति - भ्यः | च वः | वो नमः | नम इति नमः |

**पंचमोऽनुवाकः**

नमो भवाय | भवाय च | च रुद्राय| रुद्राय च | च नमः | नमः शर्वाय | शर्वाय च | च पशुपतये | पशुपतये च | पशुपतय इति पशु - पतये | च नमः | नमो नीलग्रीवाय | नीलग्रीवाय च | नीलग्रीवायेति नील - ग्रीवाय | चशितिकण्ठाय | शितिकण्ठाय च | शितिकण्ठायेति शिति - कण्ठाय | च नमः | नमः कपर्दिने | कपर्दिने च | च व्युप्तकेशाय | व्युप्तकेशाय च | व्युप्तकेशायेति व्युप्त - केशाय च

www.pradosham.com

नमः ।नमस्सहस्राक्षाय । सहस्राक्षाय च । सहस्राक्षायेति सहस्र - अक्षाय । च शत धन्वने । शतधन्वने च । शतधन्वन इति शत - धन्वने । च नमः । नमो गिरिशाय । गिरिशाय च । च शिपिविष्टाय । शिपिविष्टाय च । शिपिविष्टायेति शिपि - विष्टाय । च नमः । नमो मीढुष्टमाय । मीढुष्टमाय च । मीढुष्टमायेति मीढुः - तमाय । चेषुमते । इषुमते च । इषुमत इतीषु - मते । च नमः । नमो ह्रस्वाय । ह्रस्वाय च । च वामनाय ।वामनाय च । च नमः । नमो बृहते ।बृहते च । च वर्षीयसे । वर्षीयसे च । च नमः । नमो वृद्धाय । वृद्धाय च । च संवृध्वने । संवृध्वने च । संवृध्वन इति सं - वृध्वने । च नमः । नमो अग्रियाय । अग्रियाय च । च प्रथमाय । प्रथमाय च । च नमः । नम आशवे । आशवे च । चाऽजिराय । अजिराय च । च नमः ।नमः शीघ्रियाय । शीघ्रियाय च । च शीभ्याय । शीभ्याय च । च नमः ।नम ऊर्म्याय । ऊर्म्याय च । चावस्वन्याय । अवस्वन्याय च । अवस्वन्यायेत्यव - स्वन्याय । च नमः। नमः स्रोतस्याय । स्रोतस्याय च । चद्वीप्याय । द्वीप्याय च । चेति च ॥

**षष्ठमोऽनुवाकः**

नमो ज्येष्ठाय । ज्येष्ठाय च । च कनिष्ठाय । कनिष्ठाय च । च नमः । नमः पूर्वजाय । पूर्वजाय च । । पूर्वजायेति पूर्व - जाय । चाऽपरजाय । अपरजाय च । अपरजायेत्यपर - जाय । च नमः । नमो मध्यमाय । मध्यमाय च । चाऽपगल्भाय । अपगल्भाय च । अपगल्भायेत्यप -गल्भाय । च नमः। नमो जघन्याय । जघन्याय च । च बुध्नियाय । बुध्नियाय च । च नमः ।नमस्सोभ्याय । सोभ्याय च । च प्रतिसर्याय । प्रतिसर्याय च । प्रतिसर्यायेति प्रति - सर्याय । च नमः । नमो याम्याय । याम्याय च । च क्षेम्याय । क्षेम्याय च । च नमः । नम उर्वर्याय । उर्वर्याय च । च खल्याय । खल्याय च । च नमः । नम **श्लोक्याय । श्लोक्याय** च । चाऽवसान्याय । अवसान्याय च । अवसान्यायेत्यव - सान्याय । च नमः । नमो वन्याय । वन्याय च । च कक्ष्याय । कक्ष्याय च । च नमः ।नमश्श्रवाय । श्रवाय च । च प्रतिश्रवाय । प्रति श्रवाय च । प्रति श्रवायेतिप्रति - श्रवाय । च नमः । नम आशुषेणाय । आशुषेणाय च । आशुषेणायेत्याशु - सेनाय । चाऽऽशुरथाय । आशुरथाय च । आशुरथायेत्याशु - रथाय । च नमः । नमश्शूराय । शूराय च । चाऽवभिन्दते । अवभिन्दते च । अवभिन्दत इत्यव - भिन्दते । च नमः । नमो वर्मिणे । वर्मिणे च । च वरूथिने । वरूथिने च ।च नमः ।नमो

बिल्मिने । बिल्मिने च । च कवचिने । कवचिने च । च नमः । नमःश्रुताय । श्रुताय च । च श्रुतसेनाय । श्रुतसेनाय च । श्रुतसेनायेति श्रुत - सेनाय । चेति च ॥

**सप्तमोऽनुवाकः**

नमो दुन्दुभ्याय । दुन्दुभ्याय च । चाऽऽहनन्याय । आहनन्याय च । आहनन्यायेत्या-हनन्याय । च नमः । नमो धृष्णवे । धृष्णवे च । च प्रमृशाय । प्रमृशाय च । प्रमृशायेति प्र - मृशाय । च नमः । नमो दूताय । दूताय च । च प्रहिताय । प्रहिताय च । प्रहितायेति प्र-हिताय । च नमः । नमो निषङ्गिणे । निषङ्गिणे च । निषङ्गिण इति नि - सङ्गिने । चेषुधिमते । इषुधिमते च । इषुधिमत इतीषुधि - मते । च नमः । नम स्तीक्ष्णेषवे । तीक्ष्णेषवे च । तीक्ष्णेषव इति तीक्षण - इषवे । चाऽऽयुधिने । आयुधिने च । च नमः । नमस्स्वायुधाय । स्वायुधाय च । स्वायुधायेति सु - आयुधाय । च सुधन्वने । सुधन्वने च । सुधन्वन इति सु - धन्वने । च नमः । नमस्स्रुत्याय । स्रुत्याय च । च पथ्याय । पथ्याय च । च नमः । नमः काट्याय । काट्याय च । च नीप्याय । नीप्याय च । च नमः । नमस्सूद्याय । सूद्याय च । च सरस्याय । सरस्याय च । च नमः । नमो नाद्याय । नाद्याय च । च वैशन्ताय । वैशन्ताय च । च नमः । नमः कूप्याय । कूप्याय च । चाऽवट्याय । अवट्याय च । च नमः । नमो वर्ष्याय । वर्ष्याय च । चाऽवर्ष्याय । अवर्ष्याय च । च नमः । नमो मेघ्याय । मेघ्याय च । च विद्युत्याय । विद्युत्याय च । विद्युत्यायेति वि - द्युत्याय । च नमः । नम ईध्रियाय । ईध्रियाय च । चाऽऽतप्याय । आतप्याय च । आतप्यायेत्या - तप्याय । च नमः । नमो वात्याय । वात्याय च । च रेष्मियाय । रेष्मियाय च । च नमः । नमो वास्तव्याय । वास्तव्याय च । च वास्तुपाय । वास्तुपाय च । वास्तुपायेति वास्तु - पाय । चेति च ॥

**अष्टमोऽनुवाकः** *(ring the bell)* । नमस्सोमाय । सोमाय च । च रुद्राय । रुद्राय च । च नमः । नमस्ताम्राय । ताम्राय च । चाऽरुणाय । अरुणाय च । च नमः । नमश्शङ्गाय । शङ्गाय च । च पशुपतये। पशुपतये च । पशुपतय इति पशु - पतये । च नमः । नम उग्राय । उग्राय च । च भीमाय । भीमाय च । च नमः । नमो अग्रेवधाय । अग्रेवधाय च । अग्रेवधायेत्यग्रे - वधाय । च दूरेवधाय । दूरेवधाय च ॥

दूरेवधायेति दूरे - वधाय | च नमः | नमो हन्त्रे | हन्त्रे च | च हनीयसे | हनीयसे च | च नमः| नमो वृक्षेभ्यः | वृक्षेभ्यो हरिकेशेभ्यः | हरिकेशेभ्यो नमः | हरिकेशेभ्य इति हरि - केशेभ्यः | नमस्ताराय | ताराय नमः | नमश्शंभवे | शंभवे च | शंभव इति शं - भवे | च मयोभवे | मयोभवे च | मयोभव इति मयः - भवे | च नमः | नमश्शङ्कराय | शङ्कराय च | शङ्करायेति शं - कराय | च मयस्कराय | मयस्कराय च | मयस्करयेति मयः - कराय | च नमः | **नमश्शिवाय** | शिवाय च | च शिवतराय | शिवतराय च | शिवतरायेति शिव - तराय | च नमः | नमस्तीर्थ्याय | तिर्थ्याय च | च कूल्याय | कूल्याय च | च नमः | नमः पार्याय | पार्याय च | चाऽवार्याय | अवार्याय च | च नमः | नमः प्रतरणाय | प्रतरणाय च | प्रतरणायेति प्र - तरणाय | चोऽत्तरणाय | उत्तरणाय च | उत्तरणायेत्युत् - तरणाय | च नमः | नम आतार्याय | आतार्याय च | आतार्यायेत्या -तार्याय | चाऽऽलाद्याय | आलाद्याय च | आलाद्यायेत्या - लाद्याय | च नमः | नमश्शष्प्याय| शष्प्याय च | चफेन्याय | फेन्याय च | च नमः | नमस्सिकत्याय | सिकत्याय च | च प्रवाह्याय | प्रवाह्याय च | प्रवाह्यायेति प्र - वाह्याय | चेति च ||

**<u>नवमोऽनुवाकः</u>** |

नम इरिण्याय | इरिण्याय च | च प्रपथ्याय | प्रपथ्याय च | प्रपथ्यायेति प्र - पथ्याय | च नमः | नमः किगं् शिलाय | किगं् शिलाय च | च क्षयणाय | क्षयणाय च | च नमः | नमः कपर्दिने | कपर्दिने च | च पुलस्तये | पुलस्तये च | च नमः | नमो गोष्ठ्याय | गोष्ठ्याय च | गोष्ठ्यायेति गो -स्थ्याय | च गृह्याय | गृह्याय च | च नमः | नमस्तल्प्याय | तल्प्याय च | च गेह्याय | गेह्याय च | च नमः | नमः काट्याय | काट्याय च | च गह्वरेष्ठाय | गह्वरेष्ठाय च | गह्वरेष्ठायेति गह्वरे - स्थाय | च नमः | नमो ह्रदय्याय | ह्रदय्याय च | च निवेष्प्याय | निवेष्प्याय च | निवेष्प्यायेति नि - वेष्प्याय | च नमः | नमः पागं् सव्याय | पागं् सव्याय च | च रजस्याय | रजस्याय च | च नमः | नमश्शुष्क्याय | शुष्क्याय च | च हरित्याय | हरित्याय च | च नमः | नमोलोप्याय | लोप्याय च | चो लप्याय | उलप्याय च | च नमः | नम ऊर्व्याय | ऊर्व्याय च | च सूर्म्याय | सूर्म्याय च | च नमः | नमः पर्ण्याय | पर्ण्याय च | च पर्णशद्याय | पर्णशद्याय च | पर्णशद्यायेति पर्ण - शद्याय | च नमः | नमोऽपगुरमाणाय |

अपगुरमाणाय च । अपगुरमाणा येत्यप - गुरमाणाय । चाऽभिघ्नते । अभिघ्नते च । अभिघ्नत इत्यभि -घ्नते । च नमः । नम आक्खिदते । आक्खिदते च । आक्खिदतइत्या - खिदते । च प्रक्खिदते । प्रक्खिदते च । प्रक्खिदत इति प्र - खिदते । च नमः । नमो वः । वः किरिकेभ्यः । किरिकेभ्यो देवानां । देवानागं् हृदयेभ्यः । हृदयेभ्यो नमः । नमो विक्षीणकेभ्यः । विक्षीणकेभ्यो नमः । विक्षीणकेभ्य इति वि -क्षीणकेभ्यः । नमो विचिन्वत्केभ्यः । विचिन्वत्केभ्यो नमः । विचिन्वत्केभ्य इति वि - चिन्वत्केभ्यः । नम आनिर्हतेभ्यः । आनिर्हतेभ्यो नमः । आनिर्हतेभ्य इत्यानिः - हतेभ्यः । नम आमीवत्केभ्यः । आमीवत्केभ्य इत्या - मीवत्केभ्यः ॥

**दशमोऽनुवाकः**

द्रापे अन्धसः । अन्धसस्पते । पते दरिद्रत् । दरिद्रन्नीललोहित । नीललोहितेति नील -लोहित ॥ एषां पुरुषाणां । पुरुषाणामेषां । एषां पशूनां । पशूनां मा । मा भेः । भे र्मा । माऽरः । अरोमो । मो एषां । मो इति मो । एषां किं । किञ्चन । च नाऽऽममत् । आममदित्या - ममत् ॥ या ते । ते रुद्र । रुद्र शिवा । शिवा तनूः। तनूश्शिवा । शिवा विश्वाहभेषजी । विश्वाहभेषजीति विश्वाह - भेषजी ॥ शिवा रुद्रस्य । रुद्रस्य भेषजी । भेषजी तया । तया नः । नो मृड । मृड जीवसे । जीवस इति जीवसे ॥ इमागं् रुद्राय । रुद्राय तवसे । तवसे कपर्दिने । कपर्दिने क्षयद्वीराय । क्षयद्वीराय प्र । क्षयद्वीरायेति क्षयत् - वीराय । प्रभरामहे । भरामहे मतिं । मतिमिति मतिम् ॥ यथा नः । नश्शं । श मसत् । असद्द्विपदे । द्विपदे चतुष्पदे । द्विपद इति द्वि - पदे । चतुष्पदे विश्वं । चतुष्पद इति चतुः - पदे । विश्वं पुष्टं । पुष्टं ग्रामे । ग्रामे अस्मिन् । अस्मिन्ननातुरं । अनातुरमित्यना - तुरम् ॥ मृडा नः। नो रुद्र । रुद्रोत । उत नः । नो मयः । मयस्कृधि । कृधिक्षयद्वीराय । क्षयद्वीराय नमसा । क्षयद्वीरायेति क्षयत् - वीराय । नमसा विधेम । विधेम ते । त इति ते ॥ यच्छं । शञ्च । च योः । योश्च । च मनुः । मनुरायजे । आयजे पिता । आयज इत्या - यजे । पिता तत् । तदश्याम । अश्याम तव । तव रुद्र । रुद्र प्रणीतौ । प्रणीताविति प्र - नीतौ ॥ मानः । नो महान्तं । महान्तमुत । उतमा । मा नः । नोअर्भकं । अर्भकं मा । मा नः । न उक्षन्तं । उक्षन्तमुत । उत मा । मा नः । न उक्षितं । उक्षितमित्युक्षितम् । मा नः । नो वधीः । वधीः पितरं । पितरं मा । मोत । उत मातरं । मातरं प्रियाः । प्रिया मा । मा नः । नस्तनुवः । तनुवो रुद्र । रुद्र रीरिषः । रीरिष इति रीरिषः ॥ मा नः ।

नस्तोके | तोके तनये | तनये मा | मा नः | न आयुषि | आयुषि मा | मा नः | नो गोषु | गोषुमा | मा नः| नो अश्वेषु | अश्वेषु रीरिषः| रीरिष इति रीरिषः ‖ वीरान्मा | मा नः | नो रुद्र | रुद्रभामितः | भामितो वधीः| वधीर्हविष्मन्तः | हविष्मन्तो नमसा | नमसा विधेम | विधेम ते | त इति ते | आरात्ते | ते गोघ्ने | गोघ्न उत | गोघ्न इति गोघ्ने | उतपूरुषघ्ने | पूरुषघ्ने क्षयद्वीराय | पूरुषघ्न इति पूरुषघ्ने | क्षयद्वीराय सुम्नं | क्षयद्वीरायेति क्षयत् - वीराय | सुम्नमस्मे | अस्मेते | अस्मे इत्यस्मे | ते अस्तु | आस्त्वित्यस्तु | रक्षा च | च नः| नो अधि |अधि च | च देव | देव ब्रूहि | ब्रूह्यध | अधा च | च नः | नश्शर्म | शर्म यच्छ | यच्छद्विबर्हाः | द्विबर्हा इति द्वि - बर्हाः ‖ स्तुहि श्रुतं | श्रुतं गर्तसद | गर्तसदंयुवानं | गर्तसदमिति गर्त - सदं | युवानं मृगं | मृगं न | न भीमं | भीममुपहत्नुं | उप हत्नुमुग्रं | उग्रमित्युग्रम् | मृडाजरित्रे | जरित्रे रुद्र | रुद्रस्तवानः | स्तवानो अन्यं | अन्यं ते | ते अस्मत् | अस्मन्नि | निवपन्तु | वपन्तु सेनाः | सेना इति सेनाः ‖ परिणः | नो रुद्रस्य | रुद्रस्य हेतिः | हेतिर्वृणक्तु | वृणक्तु परि | परित्वेषस्य | त्वेषस्य दुर्मतिः | दुर्मतिरघायोः | दुर्मतिरिति दुः - मतिः | अघायोरित्यघ - योः ‖ अवस्थिरा | स्थिरामघवद्भ्यः| मघवद्भ्यस्तनुष्व | मघवद्भ्य इति मघवत् - भ्यः | तनुष्व मीढ्वः | मीढ्वस्स्तोकाय | तोकाय तनयाय | तनयाय मृडय | मृडयेति मृडय | मीढुष्टम शिवतम | मीढुष्टमेति मीढुः - तम | शिवतम शिवः | शिवतमेति शिव - तम | शिवो नः | नस्सुमनाः | सुमना भव | सुमना इति सु - मनाः | भवेति भव ‖ परमे वृक्षे | वृक्ष आयुधं | आयुधं निधाय | निधाय कृत्तिं | निधायेति नि - धाय | कृत्तिं वसानः | वसान आ | आ चर | चर पिनाकं | पिनाकम बिभ्रत् | बिभ्रदा | आगहि | गहीति गहि ‖ विकिरिद विलोहित | विकिरिदेतिवि - किरिद | विलोहित नमः | विलोहितेति वि - लोहित | नमस्ते | ते अस्तु | अस्तु भगवः | भगव इति भग - वः ‖ यास्ते | ते सहस्रं | सहस्रग्ं हेतयः | हेतयोऽन्यं | अन्यमस्मत् | अस्मन्नि | निवपन्तु | वपन्तु ताः | ता इति ताः ‖ सहस्राणि सहस्रधा | सहस्रधा बाहुवोः | सहस्रधेति सहस्र - धा | बाहुवोस्तव | तव हेतयः। हेतय इति हेतयः‖ तासामीशानः | ईशानो भगवः | भगवः पराचीना | भगव इति भग - वः | पराचीनामुखा | मुखा कृधि | कृधीति कृति ‖

**(एकादशोऽनुवाकः)**

सहस्राणि सहस्रशः | सहस्रशो ये | सहस्रश इति सहस्र - शः | ये रुद्राः | रुद्रा अधि | अधि भूम्यां | भूम्यामिति भूम्याम् ‖ तेषाँ सहस्रयोजने | सहस्रयोजनेऽव | सहस्रयोजन इति सहस्र - योजने | अवधन्वानि | धन्वानि तन्मसि | तन्मसीति तन्मसि ‖ अस्मिन्महति | महत्यर्णवे | अर्णवेन्तरिक्षे | अन्तरिक्षे भवाः | भवा अधि | अधीत्यधि ‖ नीलग्रीवाः शितिकण्ठाः | नीलग्रीवा इति नील - ग्रीवाः | शितिकण्ठाः शर्वाः | शितिकण्ठा इति शिति - कण्ठाः | शर्वा अधः | अधः क्षमाचराः | क्षमाचरा इति क्षमा - चराः ‖ नीलग्रीवाः शितिकण्ठाः | नीलग्रीवा इति नील - ग्रीवाः | शितिकण्ठा धिवं | शितिकण्ठा इति शिति - कण्ठाः | दिवग्ं रुद्राः | रुद्रा उपश्रिताः | उपश्रिता इत्युप - श्रिताः ‖ ये वृक्षेषु | वृक्षेषु सस्पिञ्जराः | सस्पिञ्जरा नीलग्रीवाः | नीलग्रीवा विलोहिताः | नीलग्रीवा इति नील - ग्रीवाः | विलोहिताइति वि - लोहिताः | ये भूतानां | भूतानामधिपतयः | अधिपतयो विशिखासः | अधिपतय इत्यधि - पतयः | विशिखासः कपर्दिनः | विशिखास इति वि - शिखासः | कपर्दिन इति कपर्दिनः ‖ ये अन्नेषु | अन्नेषु विविध्यन्ति | विविध्यन्ति पात्रेषु | विविध्यन्तीति वि - विध्यन्ति | पात्रेषु पिबतः | पिबतो जनान् | जनानिति जनान् ‖ ये पथां | पथां पथिरक्षयः | पथिरक्षय ऐलबृदाः | पथिरक्षय इति पथि - रक्षयः | ऐलबृदायव्युधः | यव्युध इति यव्युधः ‖ येतीर्थानि | तीर्थानि प्रचरन्ति | प्रचरन्ति सृकावन्तः | प्रचरन्तीति प्र - चरन्ति | सृकावन्तो निषङ्गिणः | सृकावन्त इति सृका - वन्तः| निषङ्गिण इति नि - सङ्गिनः ‖ य ऐतावन्तः | ऐतावन्तश्च | च भूयाग्ं सः | भूयाग्ं सश्च | च दिशः | दिशो रुद्रा | रुद्रा वितस्थिरे | वितस्थिर इति वि - तस्थिरे ‖ तेषाग्ं सहस्रयोजने | सहस्रयोजनेव | सहस्रयोजन इति सहस्र - योजने | अवधन्वानि | धन्वानि तन्मसि | तन्मसीति तन्मसि ‖ नमो रुद्रेभ्यः | रुद्रेभ्यो ये | ये पृथिव्यां | पृथिव्यां ये | येऽन्तरिक्षे | अन्तरिक्षे ये | ये दिवि | दिवि येषां | येषामन्नं | अन्नं वातः | वातो वर्षं | वर्षमिषवः | इषवस्तेभ्यः | तेभ्यो दश | दशप्राचीः | प्राचीर्दश | दशदक्षिणा | दक्षिणा दश | दश प्रतीचीः | प्रतीचीर्दश | दशोदीचीः | उदीचीर्दश | दशोर्ध्वाः | उर्ध्वास्तेभ्यः | तेभ्यो नमः | नमस्ते | ते नः | नो मृडयन्तु | मृडयन्तु ते | ते यं | यंद्विष्मः | द्विष्मो यः | यश्च | च नः | नोद्वेष्टि | द्वेष्टि तं | तं वः | वो जम्भे | जम्भे दधामि | दधामिति दधामि ‖ (***Technically Sri Rudra Kramam Ends Here***).

त्र्यंबकं यजामहे | त्र्याम्बकमिति त्रिः - अंबकं | यजामहे सुगन्धिं | सुगन्धिं पुष्टिवर्धनं | सुगन्धिमिति सु - गन्धिं | पुष्टिवर्धनमिति पुष्टि - वर्धन । उर्वारुकमिव | इव बन्धनात् | बन्धनान्मृत्योः | मृत्योर्मुक्षीय | मुक्षीय मा | मामृतात् | अमृतादित्यमृतात् | यो रुद्रः | रुद्रो अग्नौ | अग्नौ यः | यो अप्सु | अप्सु यः| अप्सिवत्यप् - सु | य ओषधीषु | ओषधीषु यः | यो रुद्रः | रुद्रो विश्वा | विश्वा भुवना | भुवनाविवेश | आविवेश तस्मै | आविवेशेत्या - विवेश | तस्मै रुद्राय | रुद्राय नमः | नमो अस्तु | अस्त्वित्यस्तु । तमुष्टुहि | उइत्यू | स्तुहि यः | यः स्विषुः | स्विषु सुधन्वा | स्विषुरिति सु - इषुः | सुधन्वा यः | सुधन्वा इति सु - धन्वा | यो विश्वस्य | विश्वस्यक्षयति | क्षयति भेषजस्य | भेषजस्येति भेषः - जस्य | यक्ष्वामहे | महे सौमनसाय | सौमनसाय रुद्रं | रुद्रं नमोभिः | नमोभिरिति नमः - भिः | देवमसुरं | असुरं दुवस्य | दुवस्येति दुवस्य | अयं मे | मे हस्तः | हस्तो भगवान् | भगवानयं | भगवानिदि भग - वान् | अयं मे | मे भगवत्तरः | अयं मे | मे विश्वभेषजः | विश्वभेषजोयं । विश्वभेषज इति विश्व – भेषजः । अय – शिवाभिमर्शनः । शिवाभिमर्शन इति शिव – अभिमर्शनः ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 77. श्री चमक क्रम पाठ:

एका च | च मे | मे तिस्त्रः | तिस्त्रश्च | च मे | मे पंच | पंच च | च मे | मे सप्त | सप्त च | च मे | मे नव | नव च | च मे | म एकादश | एकादश च | च मे | मे त्रयोदश | त्रयोदश च | त्रयोदशेतित्रयः - दश | च मे | मे पंचदश | पंचदश च | पंचदशेति पंच - दश | च मे | मे सप्तदश | सप्तदश च | सप्तदशेति सप्त - दश | च मे | मे नवदश | नवदश च | नवदशेति नव - दश | च मे | म एकविग् शतिः | एकविग् शतिश्च | एकविग् शतिरित्येक - विग् शतिः | च मे | मे त्र्योविग् शतिः | त्रयोविग् शतिश्च | त्रयोविग् शतिरिति त्रयः - विग् शतिः | च मे | मे पंचविग् शतिः | पंचविग् शतिश्च | पंचविग् शतिरिति पंच - विग् शतिः | च मे | मे सप्तविग् शतिः | सप्तविग्ंशतिश्च | सप्तविग्ंशतिरिति सप्तविग्ंशतिः | च मे | मे नवविग्ंशतिः | नवविग्ंशतिश्च | नवविग्ंशतिरिति नव - विग्ंशतिः | च मे | म एकत्रिद्रशत् | एकत्रिग्ंशश्च | एकत्रिग्ंशदित्येक - त्रिग्ंशत् | च मे | मे त्रयस्त्रिग्ंशत् | त्रयस्त्रिग्ंशश्च | त्रयस्त्रिग्ंशदिति त्रयः - त्रिग्ंशत् | च मे | मे चतस्त्रः | चतस्त्रश्च | च मे | मेष्टौ | अष्टौ च | च मे |

मे द्वादश | द्वादश च | च मे | मे षोडश | षोडश च | च मे | मे विग्ंशतिः | विग्ंशतिश्च | च मे | मे चतुर्विगुंशति | चतुर्विगुंशतिश्च | चतुर्विग्ंशतिरिति चतुः - विग्ंशतिः | च मे | मे अष्टाविग्ंशतिः | अष्टाविग्ंशतिश्च | अष्टाविग्ंशतिरित्यष्टा - विग्ंशतिः | च मे | मे द्वात्रिग्ंशत् | द्वात्रिग्ंशश्च | च मे | मे षट्त्रिग्ंशत् | षट्त्रिग्ंशश्च | षट्त्रिग्ंशदिति षट् - त्रिग्ंशत् | च मे | मे चत्वारिग्ंशत् | चत्वारिग्ंशश्च | च मे | मे चतुश्चत्वारिग्ंशत् | चतुश्चत्वारिग्ंशश्च | चतुश्चत्वारिग्ंशदिति चतुः - चत्वारिग्ंशत् | च मे | मेष्टाचत्वारिग् शत् | अष्टाचत्वारिग्ंशश्च | अष्टाचत्वारिग्ंशदित्यष्टा - चत्वारिग् शत् | च मे | मे वाजः | वाजश्च | च प्रसवः | प्रसवश्च | प्रसव इति - प्र - सवः | चापिजः |अपिजश्च | अपिजइत्यपि - जः | च क्रतुः | क्रतुश्च | च सुवः | सुवश्च | च मूर्द्धा | मूर्द्धा च | च व्यश्नियः | व्यश्नियश्च | व्यश्निय इति वि - अश्नियः | चान्त्यायनः | आन्त्यायनश्च | चान्त्यः | अन्त्यश्च | च भौवनः | भौवनश्च | च भुवनः | भुवनश्च| चाधिपतिः |अधिपतिश्च | अधिपतिरित्यधि - पतिः | चेति च । इडादेवहूः | देवहूर्मनुः | देवहूरितिदेव-हूः | मनुर्यज्ञनीः | यज्ञनीर्बृहस्पतिः | यज्ञनीरितियज्ञ-नीः | बृहस्पतिरुक्तामदानि | उक्तामदानि शर्ग्ंसिषत् | उक्तामदानीत्युक्ता-मदानि | शर्ग्ंसिषद्विश्वे | विश्वे देवाः | देवाःसूक्तवाचः | सूक्तवाचः पृथिवी | सूक्तवाच इति सूक्त वाचः| पृथिविमातः| मातर्मा | मामा | माहिग्ंसीः| हिग्ंसीर्मधु | मधु मनिष्ये | मनिष्येमधु | मधु जनिष्ये | जनिष्ये मधु | मधु वक्ष्यामि | वक्ष्यामि मधु | मधु वदिष्यामि | वदिष्यामि मधुमतीं | मधुमतींदेवेभ्यः | मधुमतीमिति मधु-मतीं | देवेभ्यो वाचम् | वाचमुद्यासं | उद्यासग्ंशुश्रूषेण्यां | शुश्रूषेण्यां मनुष्येभ्यः | मुनुष्येभ्यस्तं | तं मा | मा देवाः | देवाअवन्तु | अवन्तु शोभायै | शोभायै पितरः | पितरोऽनु | अनुमदन्तु | मदन्त्विति मदन्तु |

**|| ॐ शान्तिः शान्तिः शान्तिः ||**

## 78. तैत्तिरीयोपनिषत्

ॐ शं नो मित्र-श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ।

ॐ शान्तिः शान्तिः शान्तिः ॥१॥

## ॥ शिक्षाशास्त्रार्थसङ्ग्रहः ॥

शीक्षां व्याख्यास्यामः । वर्ण-स्स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्त-श्शीक्षाध्यायः ॥२॥

## संहितोपासनम्

सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातस्सगंहिताया उपनिषदं व्याखास्यामः। पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिष - मधिविद्य - मधिप्रज-मध्यात्मम् । ता महासगंहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौ रुत्तररूपम् । आकाश-स्सन्धिः ॥३॥

वायु-स्सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपस्सन्धिः । वैद्युतस्सन्धानम् । इत्यधित्यौतिषम् । अथाधिविद्यम् । आचार्यः पूवरूपम् ॥४॥

अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनगं सन्धानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजासन्धिः । प्रजननगं सन्धानम् । इत्यधिप्रजम् ॥५॥

अथाध्यात्मम् । अधराहनुः पूर्वरूपम् । उत्तराहनुरुत्तररूपम् । वाक्सन्धिः । जिह्वासन्धानम् । इत्यध्यात्मम् । इतीमामहासगंहिताः । य एवमेता महासगंहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः । बह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥६॥

## ॥ मेधादि-सिध्यर्थ आवहन्तीहोम-मन्त्राः ॥

ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृताथ्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥७॥

कुर्वाणा चीर-मात्मनः । वासागंसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रिय-मावह। लोमशां पशुभिस्सह स्वाहा । आमायन्तु ब्रह्मचारिणस्स्वाहा । विमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा। प्रमाऽऽयन्तु ब्रह्मचारिणस्स्वाहा । दमायन्तु ब्रह्मचारिणस्स्वाहा । शमायन्तु ब्रह्मचारिणस्स्वाहा। ।८॥

www.pradosham.com

यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन् सहस्रशाखे । निभगाऽहं त्वयि मृजे स्वाहा । यथाऽऽपः प्रवताऽऽयन्ति।

यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः। धातरायन्तु सर्वत-स्स्वाहा। प्रतिवेशोऽऽसि प्रमाभाहि प्रमापद्यस्व ॥९॥

## ॥ व्याहृत्युपासनम् ॥

भू-र्भुव-स्सुव-रिति वा एता-स्तिस्रो व्याहृतयः । तासामुहस्मै तां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुव-रित्यसौ लोकः ॥१०॥

मह इत्यादित्यः । आदित्येन वाव सर्वे-लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुव-रित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतीगं्षि महीयन्ते । भू-रिति वा ऋचः । भुव इति सामानि । सुव-रिति यजूगं्षि ॥११॥

मह इति ब्रह्म । ब्रह्मणा वाव सर्ववेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः। सुव-रिति व्यानः। मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मैदेवा बलिमावहन्ति ॥ १२॥

## ॥ मनोमयत्वादि-गुणक-ब्रहमोपासनया स्वाराज्य-सिद्धिः ॥

स य एषोऽन्त-र्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः । अन्तरेण तालुके । य एषस्तन इवावलम्बते । सेन्द्रयोनि; । यत्रासौ केशान्तो विवर्तते । व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥१३॥

सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम् । वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म । सत्यात्म प्राणारामं

मन आनन्दम् । शान्तिसमृद्ध-ममृतम् । इति प्राचीन योग्योपास्व ॥ १४॥

## ॥ पृथिव्याद्युपाधिक-पञ्च-ब्रह्मोपासनम् ॥

पृथिव्यन्तरिक्षं द्यौ-र्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्य-श्चन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान उदानस्समानः । चक्षुश्श्रोत्रं मनो वाक् त्वक् । चर्ममागंसग् स्नावाऽस्थि मज्जा । एत-दधिविधाय ऋषि-रवोचत् । पाङ्क्तं वा इदगं सर्वम् । पाङ्क्तेनैव पाङ्क्तग्ं स्पृणोतीति ॥१५॥

## ॥ प्रणवोपासनम् ॥

ओ-मिति ब्रह्म । ओमितीदगं सर्वम् । ओमित्येत-दनुकृति हस्म वा अप्योश्रावयेत्याश्रावयन्ति । ओ-मिति सामानि गायन्ति । ओगं शो-मिति शस्त्राणि शगंसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओ-मिति ब्रह्मा प्रसौति। ओ-मित्यग्निहोत्र-मनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्रवानीति । ब्रह्मैवोपाप्नोति ॥१६॥

## ॥ स्वाध्याय-प्रशंसा ॥

ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथी तरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्याय प्रवचने एवेति नाको मौद्गल्यः । तद्धि तप-स्तद्धि तपः ॥ १७॥

## ॥ ब्रह्मज्ञान-प्रकाशक-मन्त्रः ॥

अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरे-रिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृत-मस्मि । द्रविणगं सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥१८॥

## ॥ शिष्यानुशासनम् ॥

वेदमनूच्याचार्योऽन्तेवासिन-मनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाद्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १९ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳ सुचरितानि । तानि त्वयोपास्यानि । ॥ २० ॥

नो इतराणि । ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः । तेषां त्वयाऽऽसने न प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ २१ ॥

ये तत्र ब्राह्मणा-स्सम्मर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्म-कामास्स्युः । यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणा-स्सम्मर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्म-कामास्स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम् । एवमुपासितव्यम् । एवमुचैतदुपास्यम् ॥ २२ ॥

## ॥ उत्तरशान्तिपाठः ॥

ॐ शं नो मित्र-श्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः। नमो ब्रह्मणे । नमस्ते वायो। त्व-मेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मा वादिषम्। ऋतमवादिषम्। सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत्। आवीन्माम्। आवीद् वक्तारम् ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# 79. द्वितीया ब्रह्मानन्दवल्ली

ॐ सह ना-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ उपनिषत्सारसंग्रहः ॥

ॐ ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायो-रग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः। ओषधीभ्योऽन्नम् । अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः। तस्येद-मेव शिरः। अयंदक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥१॥

## ॥ पञ्चकोशविवरणम् ॥

अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्श्रिताः । अथो अन्नेनैव जीवन्ति । अथैन-दपियन्त्यन्ततः। अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नग्ं हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति। तस्माद्वा एतस्मा-दन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥२॥

प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूताना-मायुः । तस्मा-त्सवायुषमुच्यते। सर्व-मेव त आयु-र्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो हि भूताना-मायुः। तस्मात्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात् प्राणमयात् । अन्योऽन्तर आत्मा

मनोमयः। तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः। आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति । ||३ ||

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात् । अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महःपुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति || ४ ||

विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवास्सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान् कामान् समश्नुत इति। तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञान मयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रिय-मेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति || ५ ||

असन्नेव स भवति। असद्-ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्त-मेनं ततो विदु-रिति। तस्यैष एव शारीर आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वा-नमुं लोकं प्रेत्य । कश्चन गच्छती ३ । आहो विद्वा-नमुं लोकं प्रेत्य । कश्चित्समश्नुता ३ उ । सोऽकामयत । बहुस्यां प्रजायेयेति। स तपोऽतप्यत । स तप-स्तप्त्वा । इदगं्-सर्व-मसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च ।

विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्य-मभवत् । यदिदं किंच । तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति ॥६॥

## ॥ अभयप्रतिष्ठा ॥

असद्वा इद-मग्र आसीत् । ततो वै सदजायत । तदात्मानग्ग् स्वय-मकुरुत । तस्मा-त्तत्सुकृतमुच्यत इति । यद्वै तत्सुकृतम् । रसो वै सः । रसग्ग् ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदर-मन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥७॥

## ॥ ब्रह्मानन्दमीमांसा ॥

भीषाऽस्मा-द्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्नि-श्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽऽनन्दस्य मीमाग्ंसा भवति । युवा स्यात्साधुयुवाऽध्यायकः । आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणा मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणा मानन्दाः । स एको देवगन्धर्वाणा-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणा-मानन्दाः । स एकः पितृणां चिरलोक-लोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोक लोकाना-मानन्दाः । स एक आजानजानां देवाना-मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवाना-मानन्दाः । स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवाना मानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवाना-मानन्दाः । स एक इन्द्रस्यानन्दः । श्रोत्रियस्य चाकामहतस्य । ते

www.pradosham.com

ये शतमिन्द्रस्यानन्दाः । स एको बृहस्पते-रानन्दः। श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापते-रानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापते-रानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित्। अस्माल्लोकात्प्रेत्य । एतमन्नमय-मात्मान-मुपसंक्रामति । एतं प्राणमय मात्मानमुपसंक्रामति। एतं मनोमय-मात्मान-मुपसंक्रामति । एतं विज्ञानमय-मात्मान-मुपसंक्रामति । एतमानन्द-मय-मात्मान-मुपसंक्रामति । तदप्येष श्लोको भवति। ॥८॥

यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतगं ह वाव न तपति । किमहगं साधु नाकरवम् । किमहं पाप-मकरव-मिति । स य एवं विद्वा-नेते आत्मानगं स्पृणुते । उभे ह्येवैष एते आत्मानगं स्पृणुते । य एवं वेद । इत्युपनिषत्॥९॥

ॐ सह ना-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 80. तृतीया भृगुवल्ली

ॐ सह ना-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

### ॥ ब्रह्मजिज्ञासा ॥

भृगु-र्वै वारुणिः । वरुणं पितर-मुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तगं होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ॥१॥

## || पञ्चकोशान्तःस्थित-ब्रह्मानिरूपणम् ||

अन्नं ब्रह्मेति व्यजानात् । अन्नाध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन-रेव वरुणं पितर-मुपससार । अधीहि भगवो बह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ||२||

प्राणो ब्रह्मेति व्यजानात् । प्राणा- ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन-रेव वरुणं पितर-मुपससार । अधीहि भगवो ब्रह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो बह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा || ३ ||

मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन-रेव वरुणं पितर-मुपससार । अधीहि भगवो ब्रह्मेति । तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ||४||

विज्ञानं ब्रह्मेति व्यजानात् । विज्ञाना-ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुन-रेव वरुणं पितर-मुपससार। अधीहि भगवो ब्रह्मेति। तगं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तप-स्तप्त्वा ||५||

आनन्दो ब्रह्मेति व्यजानात् । आनन्दा-ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभि संविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिता । य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान् कीर्त्या || ६ ||

## || अन्नब्रह्मोपासनम् ||

अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः

प्रतिष्ठितः । तदेत-दन्न-मन्ने प्रतिष्ठितम् । स य एत- दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा-नन्नादो भवति । महान् भवति प्रजया पशुभि-र्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ७ ॥

अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेत- दन्न-मन्ने प्रतिष्ठितम् । स य एत- दन्न-मन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवा-नन्नादो भवति । महान् भवति प्रजया पशुभि-र्ब्रह्मवर्चसेन । महान् कीर्त्या ॥ ८ ॥

अन्नं बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता । तदेत- दन्न-मन्ने प्रतिष्ठितम् । स य एत- दन्न-मन्ने -प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवा-नन्नादो भवति । महान् भवति प्रजया पशुभि-र्ब्रह्मवर्चसेन । महान्कीर्त्या ॥९॥

## ॥ सदाचारप्रदर्शनम् । ब्रह्मानन्दानुभवः ॥

न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोऽन्नग्ं राद्धम् । मुखतोऽस्मा अन्नग्ं राध्यते । एतद्वै मध्यतोऽन्नग्ं राद्धम् । मध्यतोऽस्मा अन्नग्ं राध्यते । एतद्वा अन्ततोऽन्नग्ं राद्धम् । अन्ततोऽस्मा अन्नग्ं राध्यते । य एवं वेद । क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गति-रिति पादयोः । विमुक्ति-रिति पायौ । इति मानुषी-स्समाज्ञाः । अथ दैवीः । तृप्ति-रिति वृष्टौ । बल-मिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजाति-रमृत-मानन्द इत्युपस्थे । सर्व-मित्याकाशे । तत् प्रतिष्ठेत्युपासीत । प्रतिष्ठावान् भवति । तन्मह इत्युपासीत । महान् भवति । तन्मन इत्युपासीत । मानवान् भवति । तन्नम इत्युपासीत। नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्त-स्सपत्नाः । परि येऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । यश्चासा-वादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात् प्रेत्य । एत-मन्नमय-मात्मान-मुपसंक्रम्य । एतं प्राणमय-मात्मान-मुपसंक्रम्य । एतं मनोमय-मात्मान-मुपसंक्रम्य। एतं विज्ञानमय-मात्मान-मुपसंक्रम्य । एतमानन्दमय-मात्मान-मुपसंक्रम्य । इमान् लोकान् कामान्नी काम-

रूप्यनुसंचरन् । एतत्साम गायन्नास्ते। हा ३ वु हा ३ वु हा ३ वु। अहमन्न -महमन्न -महमन्नम्। अहमन्नादो२ऽहमन्नादो२हमन्नादः । अहग्ग् श्लोककृ-दहग्ग् श्लोककृ-दहग्ग् श्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भाइ । योमा ददाति स इदेव मा ३ वाः। अह-मन्नमन्न -मदन्तमा ३ द्मि । अहं विश्वं भुवन-मभ्यभवाम् । सुवर्न ज्योतीः । य एवं वेद। इत्युपनिषत् ॥ १० ॥

ॐ सह ना-ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विना-वधीत-मस्तु मा विद्विषावहै ।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## 81. नक्षत्रसूक्तं (अष्टवाक्यम्)

### ॥ कृत्तिका ॥

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासं जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभिसंवसानः। अग्निर्नो देवस्सुविते दधातु ।।

अग्नये स्वाहा कृत्तिकाभ्यःस्वाहा । अम्बायै स्वाहा दुलायै स्वाहा । नितन्त्यै स्वाहाऽभ्र-यन्त्यै स्वाहा । मेघयन्त्यै स्वाहा वर्ष-यन्त्यै स्वाहा चुपुणिकायै स्वाहा ।

### ॥ रोहिणी ॥

प्रजापते रोहिणीवेतु पत्नी । विश्वरूपा बृहती चित्रभानुः । सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदस्सवीराः । रोहिणी देव्युदगात्पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिग्ं हविषा वर्धयन्ती । प्रिया देवाना मुपयातु यज्ञम् ।।

प्रजापतये स्वाहा रोहिण्यै स्वाहा । रोचमानायै स्वाहा प्रजाभ्यः स्वाहा ।

www.pradosham.com

## || मृगशीर्षम् ||

सोमो राजा मृगशीर्षेण आगन्न् । शिवंनक्षत्रंप्रियमस्य धाम । आप्यायमानो बहुधा जनेषु । रेत:प्रजां यजमाने दधातु । यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियगं् राजन् प्रियतमं प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शं चतुष्पदे ।

सोमाय स्वाहा मृगशीर्षाय स्वाहा । इन्वकाभ्य:स्वा-हौषधीभ्य:स्वाहा । राज्याय स्वाहाऽभिजित्यै स्वाहा।

## || आर्द्रा ||

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानाम् पतिरघ्नियानाम् । नक्षत्रमस्यहविषा विधेम । मा नः प्रजागं् रीरिषन्मोत वीरान् । हेती रुद्रस्य परिणो वृणक्तु। आर्द्रानक्षत्रंजुषतागं् हविर्नः । प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशगं्म्सन्नुदतामरातिम् ।।

रुद्राय स्वाहाऽऽर्द्रायै स्वाहा । पिन्वमानायै स्वाहा पशुभ्य:स्वाहा ।

## || पुनर्वसु ||

पुनर्नो देव्यदितिस्पृणोतु । पुनर्वसून:पुनरेतां यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः । एवा न देव्यदितिरनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियम् देवाना-मप्येतु पाथः (५)

अदित्यै स्वाहा पुनर्वसुभ्याम् । स्वाहा भूत्यै स्वाहा प्रजात्यै स्वाहा ।

## || पुष्यम् ||

बृहस्पतिः प्रथमं जायमानः। तिष्यम् नक्षत्रमभि संबभूव । श्रेष्टो देवानां पृतनासुजिष्णुः । दिशोऽनु सर्वा अभयन्नो अस्तु । तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पतिर्नः परिपातु पश्चात् । बाधेतान्द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयस्स्याम ।।

बृहस्पतये स्वाहा तिष्याय स्वाहा । ब्रह्मवर्चसाय स्वाहा ।

www.pradosham.com

## || आश्रेषा ||

इदगं सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषा येषामनुयन्ति चेतः । ये अन्तरिक्षं पृथिवीं क्षियन्ति । ते नस्सर्पासो हवमागमिष्ठाः । ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवीमनुसञ्चरन्ति । येषामाश्रेषा अनुयन्ति कामम् । तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि (७)

सर्पेभ्यःस्वाहाऽऽश्रेषाभ्यःस्वाहा । दन्द-शूकेभ्यःस्वाहा ।

## || मघं ||

उपहूताः पितरो ये मघासु । मनोजवसस्सुकृतस्सुकृत्याः । ते नो नक्षत्रे हवमागमिष्ठाः । स्वधाभिर्यज्ञं प्रयतं जुषन्ताम् । ये अग्निदग्धा येऽनग्निदग्धाः। येऽमुल्लोकं पितरः क्षियन्ति । यागृश्च विद्मयागं उ च न प्रविद्म । मघासु यज्ञगं सुकृतम् जुषन्ताम् (८)

पितृभ्यःस्वाहा मघाभ्यः । स्वाहाऽनघाभ्यः स्वाहाऽगदाभ्यः । स्वाहाऽरुन्धतीभ्यःस्वाहा ।

## || पूर्व फल्गुनी ||

गवां पतिःफल्गुनीनामसि त्वम् । तदर्यमन्वरुणमित्र चारु । तं त्वा वयगं सनितारगं सनीनाम् । जीवा जीवन्तमुप संविशेम । येनेमा विश्वा भुवनानि सञ्जिता । यस्य देवा अनुसंयन्ति चेतः । अर्यमा राजाऽजरस्तु विष्मान् । फल्गुनीनामृषभो रोरवीति (९)

अर्यम्णे स्वाहा फल्गुनीभ्यागं स्वाहा । पशुभ्यः स्वाहा।

## || उत्तर फल्गुनी ||

श्रेष्टो देवानाम् भगवो भगासि । तत्वा विदुःफल्गुनीस्तस्य वित्तात् । अस्मभ्यं क्षत्रमजरगंसुवीर्यम्। गोमदश्ववदुपसन्नुदेह । भगोह दाता भग इत्प्रदाता । भगो देवीः फल्गुनीराविवेश । भगस्येत्तं प्रसवं गमेम । यत्र देवैस्सधमादं मदेम (१०)

भगाय स्वाहा फल्गुनीभ्यागं स्वाहा । श्रेष्ट्याय स्वाहा ।

www.pradosham.com

## || हस्तम् ||

आया तु देवस्सवितोपयातु । हिरण्ययेन सुवृता रथेन । वहन् हस्तग्ं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ । हस्तःप्रयच्छ त्वमृतं वसीयः । दक्षिणेन प्रतिगृभ्णीम एनत् । दाता-रमद्य सविता विदेय । यो नो हस्ताय प्रसुवाति यज्ञम् ।।

सवित्रे स्वाहा हस्ताय । स्वाहा ददते स्वाहा पृणते । स्वाहा प्रयच्छते स्वाहा प्रति गृभ्णते स्वाहा ।

## || चित्रा ||

त्वष्टा नक्षत्रमभ्येति चित्राम् । सुभग्ं ससंयवतिग्ं रोचमानाम् । निवेशयन्नमृतान्मर्त्यांग्श्च । रूपाणि पिग्ंशन्भुवनानि विश्वा । तन्नस्त्वष्टा तदु चित्रा विचष्टाम् । तन्नक्षत्रं भूरिदा अस्तु मह्यम् । तन्नःप्रजां वीरवतीग्ं सनोतु । गोभिर्नो अश्वैस्समनक्तु यज्ञम् (१२)

त्वष्ट्रे स्वाहा चित्रायै स्वाहा । चैत्राय स्वाहा प्रजायै स्वाहा ।

## || स्वाती ||

वायुर्नक्षत्रमभ्येति निष्ट्याम् । तिग्मशृंगो वृषभो रोरुवाणः । समीरयन्भुवना मातरिश्वा । अप द्वेषाग्ंसि नुदतामरातीः । तन्नो वायुस्तदु निष्ट्या शृणोतु । तन्नक्षत्रं भूरिदा अस्तु मह्यम् । तन्नो देवासो अनुजानन्तु कामम् । यथा तरेम दुरितानि विश्वा (१३)

वायवे स्वाहा निष्ट्यायै स्वाहा । कामचाराय स्वाहाऽभिजित्यै स्वाहा ।

## || विशाखा ||

दूरमस्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुताम् तद्विशाखे । तन्नो देवा अनुमदन्तु यज्ञम् । पश्चात् पुरस्तादभयन्नो अस्तु । नक्षत्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ । विषूचश्शत्रूनपबाधमानौ । अपक्षुधन्नुदतामरातिम् (१४)

इन्द्राग्निभ्याग्ं स्वाहा विशाखाभ्याग्ं स्वाहा । श्रेष्ट्याय स्वाहाऽभिजित्यै स्वाहा ।

www.prdosham.com

## || पौर्णमासी ||

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतःपौर्णमासी जिगाय । तस्यां देवा अधिसंवसन्तः । उत्तमे नाक इह मादयन्ताम् । पृथ्वी सुवर्चा युवतिः सजोषाः । पौर्णमास्युदगाच्छोभमाना । आप्याययन्ती दुरितानि विश्वा । उरुं दुहां यजमानाय यज्ञम् (१५)

पौर्णमास्यै स्वाहा कामाय स्वाहा गत्यै स्वाहा ।।

## || अनुराधा ||

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदःसवीराः । चित्रम् नक्षत्रमुदगात्पुरस्तात् । अनूराधा स इति यद्वदन्ति । तन्मित्र एति पथिभिर्देवयानैः । हिरण्ययै-र्विततै-रन्तरिक्षे (१६)

मित्राय स्वाहाऽनूराधेभ्यः स्वाहा । मित्र-धेयाय स्वाहाऽभिजित्यै स्वाहा ।

## || ज्येष्ठा ||

इन्द्रो ज्येष्ठामनु नक्षत्रमेति । यस्मिन् वृत्रं वृत्र तूर्ये ततार । तस्मिन्वय-ममृतं दुहानाः । क्षुधन्तरेम दुरितिं दुरिष्टिम् । पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे । इन्द्राय ज्येष्ठा मधु मद्दुहाना । उरुं कृणोतु यजमानाय लोकम् (१७)

इन्द्राय स्वाहा ज्येष्ठायै स्वाहा । ज्यैष्ठयाय स्वाहाऽभिजित्यै स्वाहा ।

## || मूलम् ||

मूलं प्रजां वीरवतीं विदेय । पराच्येतु निरृऋतिःपराचा । गोभिर्नक्षत्रंपशुभिस्समक्तम् । अहर्भूयाद्यजमानाय मह्यम् । अहर्नो अद्य सुविते दधातु । मूलं नक्षत्रमिति यद्वदन्ति । पराचीम् वाचा निरृऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यम् ।।

प्रजापतये स्वाहा मूलाय स्वाहा । प्रजायै स्वाहा ।

www.prapdosham.com

## || पूर्वाषाडा ||

या दिव्या आपः पयसा सम्बभूवुः। या अन्तरिक्ष उत पार्थिवीर्याः । यासा मषाढा अनुयन्ति कामम्। ता न आपःशग्ग्स्योना भवन्तु । याश्च कूप्या याश्च नाद्यास्समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः । यासामषाढा मधु भक्षयन्ति । ता न आपःशग्ग्स्योना भवन्तु (१९)

अद्भ्यःस्वाहाऽषाढाभ्यःस्वाहा । समुद्राय स्वाहा कामाय स्वाहा । अभिजित्यै स्वाहा ।

## || उत्तराषाडा ||

तन्नो विश्वे उप शृण्वन्तु देवाः । तदषाढा अभिसंयन्तु यज्ञम् । तन्नक्षत्रं प्रथतां पशुभ्यः । कृषिर्वृष्टि-र्यजमानाय कल्पताम्। शुभ्राःकन्या युवतयस्सुपेशसः । कर्मकृत-स्सुकृतो वीर्यावतीः । विश्वान् देवान् हविषा वर्धयन्तीः । अषाढाःकाममुपयान्तु यज्ञम् (२०)

विश्वेभ्यो देवेभ्यःस्वाहाऽषाढाभ्यःस्वाहा । अनपजय्याय स्वाहा जित्यै स्वाहा ।

## || अभिजित् ||

यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् । अमुञ्च लोक-मिदमूच सर्वम् । तन्नो नक्षत्र-मभिजिद्विजित्य । श्रियं दधात्वहृणीयमानम् । उभौ लोकौ ब्रह्मणा सञ्जितेमौ । तन्नो नक्षत्रमभिजिद्विचष्टाम् । तस्मिन्वयं पृतनास्सञ्जयेम । तन्नो देवासो अनजानन्तु कामम् (२१)

ब्रह्मणे स्वाहाऽभिजिते स्वाहा । ब्रह्म-लोकाय स्वाहाऽभिजित्यै स्वाहा ।

## || श्रवण ||

शृण्वन्ति श्रोणा-ममृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् । महीं देवीं विष्णुपत्नी-मजूर्याम्। प्रतीची मेनागं हविषा यजामः। त्रेधा विष्णु-रुरुगायो विचक्रमे। महीं दिवं पृथिवी-मन्तरिक्षम्। तच्छ्रोणैतिश्रव-इच्छमाना। पुण्यगग्श्लोकं यजमानाय कृण्वती (२२)

विष्णवे स्वाहा श्रोणायै स्वाहा । श्लोकाय स्वाहा श्रुतायस्स्वाहा ।

www.pradosham.com

## || श्रविष्ठा ||

अष्टौ देवा वसवस्सोम्यासः । चतस्रो देवी-रजराः श्रविष्ठाः । ते यज्ञं पान्तु रजसः पुरस्तात् । संवत्सरीण-ममृतग्ग् स्वस्ति । यज्ञं नः पान्तु वसवःपुरस्तात् । दक्षिणतोऽभियन्तु श्रविष्ठाः । पुण्यन्नक्षत्रमभिसंविशाम । मा नो अराति-रघशग्ंसाऽगन्न् (२३)

वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा । अग्राय स्वाहा परीत्यै स्वाहा ।

## || शतभिषग् ||

क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणागं शतभिषग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः ||

। शतगं सहस्रा भेषजानि धत्तः । यज्ञन्नो राजा वरुण उपयातु । तन्नो विश्वे अभि संयन्तु देवाः । तन्नो नक्षत्रगं शतभिषग्जुषाणम् । दीर्घमायुःप्रतिरद्भेषजानि (२४)

वरुणाय स्वाहा शतभिषजे स्वाहा । भेषजेभ्यः स्वाहा :

## || पूर्वप्रोष्टपदा ||

अज एकपादुदगात्पुरस्तात् । विश्वा भूतानि प्रति मोदमानः । तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः । विभ्राजमानस्समिधान उग्रः । आऽन्तरिक्षमरुहदगन्द्याम् । तगं सूर्यं देव-मजमेकपादम् । प्रोष्ठपदासो अनुयन्ति सर्वे (२५)

अजायैकपदे स्वाहा प्रोष्ठपदेभ्यःस्वाहा । तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा ।

## || उत्तरप्रोष्टपदा ||

अहिर्बुध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणाम् । तं ब्राह्मणास्सोमपास्सोम्यासः। प्रोष्ठपदासोअभिरक्षन्ति सर्वे । चत्वार एकमभि कर्म देवाः। प्रोष्ठपदा स इति यान् वदन्ति । ते बुध्नियं परिषद्यग्ग् स्तुवन्तः । अहिग्ं रक्षन्ति नमसोपसद्य (२६)

अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यःस्वाहा । प्रतिष्ठायै स्वाहा ।

## || रेवती ||

पूषा रेवत्यन्वेति पन्थाम् । पुष्टिपती पशुपा वाजबस्त्यौ । इमानि हव्या प्रयता जुषाणा । सुगौर्नो यानैरुपयातां यज्ञम् । क्षुद्रान् पशून्रक्षतु रेवती नः । गोवो नो अश्वाग्ं अन्वेतु पूषा । अन्नग्ं रक्षन्तौ बहुधा विरूपम् । वाजग्ं सनुतां यजमानाय यज्ञम् (२७)

पूष्णे स्वाहा रेवत्यै स्वाहा । पशुभ्यःस्वाहा ।

## || अश्विनी ||

तदश्विनावश्वयुजोपयाताम् । शुभङ्गमिष्ठौ सुयमेभिरश्वैः । स्वं नक्षत्रग्ं हविषा यजन्तौ। मध्वासम्पृक्तौ यजुषा समक्तौ । यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूता-वमृतस्य गोपौ । तौ नक्षत्रं जुजुषाणो पयाताम् । नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम् (२८)

अश्विभ्याग्ं स्वाहाऽश्वयुग्भ्याग्ं स्वाहा । श्रोत्राय स्वाहा श्रुत्यै स्वाहा ।

## || अपभरणी ||

अप पाप्मानं भरणीर्भरन्तु । तद्यमो राजा भगवान् विचष्टाम् । लोकस्य राजा महतो महान् हि। सुगं नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा । यस्मिन्नेन-मभ्यषिंचन्त देवाः । तदस्य चित्रग्ं हविषा यजाम । अप पाप्मानं भरणीर्भरन्तु (२९)

यमाय स्वाहाऽपभरणीभ्यःस्वाहा । राज्याय स्वाहाऽभिजित्यै स्वाहा ।।

## || अमावास्यै ||

निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती । सहस्र-पोषग्ं सुभगा रराणा सा न आगन्वर्चसा संविदाना । यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा । सा नो यज्ञं पिपृहि विश्वारे रयिन्नो धेहि सुभगे सुवीरम् (३०)

अमावास्यायै स्वाहा कामाय स्वाहा गत्यै स्वाहा । चन्द्रमसे स्वाहा प्रती-दृश्यायै स्वाहा । अहो-रात्रेभ्यःस्वाहाऽर्धमासे-भ्यः स्वाहा । मासेभ्यःस्वाहर्तुभ्यः स्वाहा । संवत्सराय स्वाहा । अह्ने स्वाहा रात्रियै स्वाहा ।अति-मुक्त्यै स्वाहा । उषसे स्वाहा व्युष्ट्यै स्वाहा । व्यूषु-ष्यै स्वाहा व्युच्छन्त्यै

www.pradosham.com

स्वाहा। व्युष्टायै स्वाहा । नक्षत्राय स्वाहो-देष्यते स्वाहा । उद्यते स्वाहो-दिताय स्वाहा । हरसे स्वाहा भरसे स्वाहा । भ्राजसे स्वाहा तेजसे स्वाहा । तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा । सूर्याय स्वाहा नक्षत्रेभ्य:स्वाहा । प्रतिष्ठायै स्वाहा । अदित्यै स्वाहा प्रतिष्ठायै स्वाहा । विष्णवे स्वाहा यज्ञाय स्वाहा । प्रतिष्ठायै स्वाहा ||

|| ॐ शान्तिः शान्तिः शान्तिः || ॐ

www.pradosham.com

| 82. श्री ललिता सहस्रनाम स्त्रोत्र नामावलि: | |
|---|---|
| *(Note: Read Namavali left to right)* | |
| सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्-तारानायकशेखराम् स्मितमुखीं आपीनवक्षोरुहाम् \| पाणिभ्याम् अलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थ-रक्तचरणां ध्यायेत्परामम्बिकाम् \|\| | |
| ॐ श्रीमात्रे नम: (1) | ॐ श्री महाराज्ञ्यै नम: (2) |
| ॐ श्रीमत्सिम्हासनेश्वर्यै नम: | ॐ चिदग्निकुण्डसंभूतायै नम: |
| ॐ देवकार्यसमुद्यतायै नम: | ॐ उद्यद्भानुसहस्राभायै नम: |
| ॐ चतुर्बाहुसमन्वितायै नम: | ॐ रागस्वरूपपाशाढ्यायै नम: |
| ॐ क्रोधाकाराङ्कुशोज्वलायै नम:(9) | ॐ मनोरूपेक्षुकोदण्डायै नम: (10) |
| ॐ पञ्चतन्मात्रसायकायै नम: | |
| ॐ निजारुण-प्रभापूर-मज्जद्-ब्रह्माण्डमण्डलायै नम: | |
| ॐ चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्कचायै नम: | |
| ॐ कुरुविन्दमणिश्रेणी-कनत्कोटीर-मण्डितायै नम: | |
| ॐ अष्टमीचन्द्र-विभ्राजदलिकस्थल-शोभितायै नम: | |
| ॐ मुखचन्द्र-कलङ्काभ-मृगनाभि-विशेषकायै नम: | |
| ॐ वदन-स्मरमाङ्गल्य-गृहतोरण-चिल्लिकायै नम: | |
| ॐ वक्त्रलक्ष्मी-परीवाह-चलन्-मीनाभ-लोचनायै नम: | |
| ॐ नवचम्पक-पुष्पाभ-नासादण्ड-विराजितायै नम: | |
| ॐ ताराकान्ति-तिरस्कारि-नासाभरण-भासुरायै नम: | |
| ॐ कदम्बमञ्जरी-क्लृप्त-कर्णपूर-मनोहरायै नम: | |
| ॐ ताटङ्क-युगली-भूत-तपनोडुप-मण्डलायै नम: | |
| ॐ पद्मरागशिलादर्श-परिभावि-कपोलभुवे नम: | |

www.prapdosham.com

| | |
|---|---|
| ॐ नवविद्रुम-बिम्बश्री-न्यक्कारि-रदनच्छदायै नम: (24) | |
| ॐ शुद्धविद्याङ्कुराकार-द्विजपङ्क्ति-द्वयोज्वलायै नम: | |
| ॐ कर्पूरवीटिकामोद-समाकर्षद्दिगन्तरायै नम: | |
| ॐ निजसल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छप्यै नम: | |
| ॐ मन्दस्मित-प्रभापूर-मज्जत्कामेश-मानसायै नम: | |
| ॐ अनाकलित-सादृश्य-चुबुकश्री-विराजितायै नम: | |
| ॐ कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरायै नम: | |
| ॐ कनकाङ्गद-केयूर-कमनीय-भुजान्वितायै नम: | |
| ॐ रत्नग्रैवेय-चिन्ताक-लोल-मुक्ता-फलान्वितायै नम: | |
| ॐ कामेश्वर-प्रेमरत्न-मणि-प्रतिपणस्तन्यै नम: | |
| ॐ नाभ्यालवाल-रोमालिलता-फल-कुचद्वय्यै नम: | |
| ॐ लक्ष्यरोम-लताधारतासमुन्नेयमध्यमायै नम: | |
| ॐ स्तनभार-दलन्मध्य-पट्टबन्ध-वलित्रयायै नम: | |
| ॐ अरुणारुण-कौसुम्भ-वस्त्र-भास्वत्-कटीतट्यै नम: | |
| ॐ रत्न-किङ्किणिकारम्य-रशना-दामभूषितायै नम: | |
| ॐ कामेशज्ञात-सौभाग्य-मार्दवोरुद्वयान्वितायै नम: | |
| ॐ माणिक्य-मुकुटाकार-जानुद्वय-विराजितायै वम: | |
| ॐ इन्द्रगोप-परिक्षिप्त-स्मरतूणाभ-जङ्घिकायै नम: | |
| ॐ गूढगुल्फायै नम: (42) | ॐ कूर्मपृष्ठजयिष्णु-प्रपदान्वितायै नम: |
| ॐ नख-दीधिति-संछन्न-नमज्जन-तमोगुणायै नम: (44) | |
| ॐ पदद्वय-प्रभाजाल-पराकृत-सरोरुहायै नम: | |

www.pradosham.com

| | |
|---|---|
| ॐ शिञ्जान-मणि-मञ्जीर-मण्डित-श्री-पदाम्बुजायै नम: (46) | |
| ॐ मराली-मन्दगमनायै नम: (47) | ॐ महालावण्य-शेवध्यै नम: (48) |
| ॐ सर्वारुणायै नम: | ॐ अनवद्याङ्ग्यै नम: |
| ॐ सर्वाभरणभूषितायै नम: | ॐ शिव-कामेश्वराङ्कस्थायै नम: |
| ॐ शिवायै नम: | ॐ स्वाधीन-वल्लभायै नम: |
| ॐ सुमेरु-मध्य-शृङ्गस्थायै नम: | ॐ श्रीमन्नगर-नायिकायै नम: |
| ॐ चिन्तामणि-गृहान्तस्थायै नम: | ॐ पञ्चब्रह्मासनस्थितायै नम: |
| ॐ महापद्माटवीसंस्थायै नम: | ॐ कदम्ब-वन-वासिन्यै नम: |
| ॐ सुधासागर-मध्यस्थायै नम: | ॐ कामाक्ष्यै नम: |
| ॐ कामदायिन्यै नम: (63) | |
| ॐ देवर्षि-गण-सङ्घात-स्तूयमानात्म-वैभवायै नम: | |
| ॐ भण्डासुर-वधोद्युक्त-शक्तिसेना-समन्वितायै नम: | |
| ॐ सम्पत्करी समारूढ-सिन्धुरव्रज-सेवितायै नम: | |
| ॐ अश्वारूढाधिष्ठिताश्व-कोटिकोटि-भिरावृतायै नम: | |
| ॐ चक्रराज-रथारूढ-सर्वायुध-परिष्कृतायै नम: | |
| ॐ गेयचक्र-रथारूढ-मन्त्रिणी-परिसेवितायै नम: | |
| ॐ किरिचक्र-रथारूढ-दण्डनाथापुरस्कृतायै नम: | |
| ॐ ज्वाला-मालिनिकाक्षिप्त-वह्निप्राकार-मध्यगायै नम: | |
| ॐ भण्डसैन्य-वधोद्युक्त-शक्ति-विक्रमहर्षितायै नम: | |
| ॐ नित्या पराक्रमोटोप-निरीक्षण-समुत्सुकायै नम: | |
| ॐ भण्डपुत्रवधोद्युकत-बाला-विक्रम-नन्दितायै नम: | |

www.pradosham.com

| | |
|---|---|
| ॐ मन्त्रिण्यम्बा-विरचित-विषङ्गवध-तोषितायै नम: | |
| ॐ विशुक्र-प्राणहरण-वाराही-वीर्य-नन्दितायै नम: | |
| ॐ कामेश्वर-मुखालोक-कल्पित-श्री गणेश्वरायै नम: | |
| ॐ महागणेश-निर्भिन्न-विघ्नयन्त्र-प्रहर्षितायै नम: | |
| ॐ भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्शिण्यै नम: | |
| ॐ कराङ्गुलि-नखोत्पन्न नारायण-दशाकृत्यै नम: | |
| ॐ महापाशुपतास्त्राग्नि-निर्दग्धासुर-सैनिकायै नम: | |
| ॐ कामेश्वरास्त्र-निर्दग्ध-सभण्डासुर-शून्यकायै नम: | |
| ॐ ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवायै नम: | |
| ॐ हर-नेत्राग्नि-सन्दग्ध-काम-सञ्जीवनौषध्यै नम: | |
| ॐ श्रीमद्वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजायै नम: | |
| ॐ कण्ठाध:कटि-पर्यन्त-मध्यकूट-स्वरूपिण्यै नम: | |
| ॐ शक्तिकूटैक-तापन्न-कट्यधोभाग-धारिण्यै नम: (87) | |
| ॐ मूलमन्त्रात्मिकायै नम: (88) | ॐ मूलकूटत्रयकलेवरायै नम: (89) |
| ॐ कुलामृतैक-रसिकायै नम: | ॐ कुलसङ्केत-पालिन्यै नम: |
| ॐ कुलाङ्गनायै नम: | ॐ कुलान्तस्थायै नम: |
| ॐ कौलिन्यै नम: | ॐ कुलयोगिन्यै नम: |
| ॐ अकुलायै नम: | ॐ समयान्तस्थायै नम: |
| ॐ समयाचार-तत्परायै नम: | ॐ मूलाधारैक-निलयायै नम: |
| ॐ ब्रह्मग्रन्थिविभेदिन्यै नम: (100) | ॐ मणिपूरान्तरुदितायै नम: |
| ॐ विष्णुग्रन्थिविभेदिन्यै नम: | ॐ आज्ञाचक्रान्तरालस्थायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ रुद्रग्रन्थिविभेदिन्यै नमः | ॐ सहस्राराम्बुजारूढायै नमः |
| ॐ सुधासाराभिवर्षिण्यै नमः | ॐ तडिल्लतासमुरुच्यै नमः |
| ॐ षट्चक्रोपरि संस्थितायै नमः | ॐ महासक्त्यै नमः |
| ॐ कुण्डलिन्यै नमः | ॐ बिसतन्तु-तनीयस्यै नमः |
| ॐ भवान्यै नमः | ॐ भावनागम्यायै नमः |
| ॐ भवारण्य-कुठारिकायै नमः | ॐ भद्रप्रियायै नमः |
| ॐ भद्रमूर्त्यै नमः | ॐ भक्तसौभाग्यदायिन्यै नमः |
| ॐ भक्तिप्रियायै नमः | ॐ भक्तिगम्यायै नमः |
| ॐ भक्तिवश्यायै नमः | ॐ भयापहायै नमः |
| ॐ शाम्भव्यै नमः | ॐ शारदाराध्यायै नमः |
| ॐ शर्वाण्यै नमः | ॐ शर्मदायिन्यै नमः |
| ॐ शाङ्कर्यै नमः | ॐ श्रीकर्यै नमः |
| ॐ साध्व्यै नमः | ॐ शरच्चन्द्र-निभाननायै नमः |
| ॐ शातोदर्यै नमः | ॐ शान्तिमत्यै नमः |
| ॐ निराधारायै नमः | ॐ निरञ्जनायै नमः |
| ॐ निर्लेपायै नमः | ॐ निर्मलायै नमः |
| ॐ नित्यायै नमः | ॐ निराकारायै नमः |
| ॐ निराकुलायै नमः | ॐ निर्गुणायै नमः |
| ॐ निष्कलायै नमः | ॐ शान्तायै नमः |
| ॐ निष्कामायै नमः | ॐ निरुपप्लवायै नमः |
| ॐ नित्यमुक्तायै नमः | ॐ निर्विकारायै नमः |
| ॐ निष्प्रपञ्चायै नमः | ॐ निराश्रयायै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ नित्यशुद्धायै नम: | ॐ नित्यबुद्धायै नम: |
| ॐ निरवद्यायै नम: | ॐ निरन्तरायै नम: |
| ॐ निष्कारणायै नम: | ॐ निष्कलङ्कायै नम: |
| ॐ निरुपाध्यै नम: | ॐ निरीश्वरायै नम: |
| ॐ नीरागायै नम: | ॐ रागमथन्यै नम: |
| ॐ निर्मदायै नम: | ॐ मदनाशिन्यै नम: |
| ॐ निश्चिन्तायै नम: | ॐ निरहङ्कारायै नम: |
| ॐ निर्मोहायै नम: | ॐ मोहनाशिन्यै नम: |
| ॐ निर्ममायै नम: | ॐ ममताहन्त्र्यै नम: |
| ॐ निष्पापायै नम: | ॐ पापनाशिन्यै नम: |
| ॐ निष्क्रोधायै नम: | ॐ क्रोधशमन्यै नम: |
| ॐ निर्लोभायै नम: | ॐ लोभनाशिन्यै नम: |
| ॐ  निस्संशयायै नम: | ॐ संशयघ्न्यै नम: |
| ॐ निर्भवायै नम: | ॐ भवनाशिन्यै नम: |
| ॐ निर्विकल्पायै नम: | ॐ निराबाधायै नम: |
| ॐ निर्भेदायै नम: | ॐ भेदनाशिन्यै नम: |
| ॐ निर्नाशायै नम: | ॐ मृत्युमथन्यै नम: |
| ॐ निष्क्रियायै नम: | ॐ निष्परिग्रहायै नम: |
| ॐ निस्तुलायै नम: | ॐ नीलचिकुरायै नम: |
| ॐ निरपायायै नम: | ॐ निरत्ययायै नम: |
| ॐ दुर्लभायै नम: | ॐ दुर्गमायै नम: |
| ॐ दुर्गायै नम: | ॐ दु:खहन्त्र्यै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ सुखप्रदायै नमः | ॐ दुष्टदूरायै नमः |
| ॐ दुराचारशमन्यै नमः | ॐ दोषवर्जितायै नमः |
| ॐ सर्वज्ञायै नमः | ॐ सान्द्रकरुणायै नमः |
| ॐ समानाधिक-वर्जितायै नमः | ॐ सर्वशक्तिमय्यै नमः (200) |
| ॐ सर्वमङ्गलायै नमः | ॐ सद्गति-प्रदायै नमः |
| ॐ सर्वेश्वर्यै नमः | ॐ सर्वमय्यै नमः |
| ॐ सर्वमन्त्रस्वरूपिण्यै नमः | ॐ सर्वयन्त्रात्मिकायै नमः |
| ॐ सर्व-तन्त्ररूपायै नमः | ॐ मनोन्मन्यै नमः |
| ॐ माहेश्वर्यै नमः | ॐ महादेव्यै नमः |
| ॐ महालक्ष्म्यै नमः | ॐ मृडप्रियायै नमः |
| ॐ महारूपायै नमः | ॐ महापूज्यायै नमः |
| ॐ महा-पातका-नाशिन्यै नमः | ॐ महामायायै नमः |
| ॐ महासत्वायै नमः | ॐ महाशक्त्यै नमः |
| ॐ महारत्यै नमः | ॐ महाभोगायै नमः |
| ॐ महैश्वर्यायै नमः | ॐ महावीर्यायै नमः |
| ॐ महाबलायै नमः | ॐ महाबुद्ध्यै नमः |
| ॐ महासिद्ध्यै नमः | ॐ महायोगेश्वरेश्वर्यै नमः |
| ॐ महातन्त्रायै नमः | ॐ महामन्त्रायै नमः |
| ॐ महायन्त्रायै नमः | ॐ महासनायै नमः |
| ॐ महायाग-क्रमाराध्यायै नमः | ॐ महाभैरव-पूजितायै नमः |
| ॐ महेश्वर-महाकल्प-महाताण्डव-साक्षिण्यै नमः (233) | |
| ॐ महाकामेश-महिष्यै नमः (234) | ॐ महात्रिपुरसुन्दर्यै नमः (235) |

www.pradosham.com

| | |
|---|---|
| ॐ चतुष्षष्ट्युपचाराढ्यायै नम: | ॐ चतुष्षष्टिकलामय्यै नम: |
| ॐ महाचतु:षष्टिकोटि-योगिनी-गणसेवितायै नम: (238) | |
| ॐ मनुविद्यायै नम: (239) | ॐ चन्द्रविद्यायै नम: (240) |
| ॐ चन्द्रमण्डल-मध्यगायै नम: | ॐ चारुरूपायै नम: |
| ॐ चारुहासायै नम: | ॐ चारुचन्द्र-कलाधरायै नम: |
| ॐ चराचर-जगन्नाथायै नम: | ॐ चक्राराज-निकेतनायै नम: |
| ॐ पार्वत्यै नम: | ॐ पद्मनयनायै नम: |
| ॐ पद्मरागसमप्रभायै नम: | ॐ पञ्चप्रेतासनासीनायै नम: |
| ॐ पञ्चब्रह्मस्वरूपिण्यै नम: | ॐ चिन्मय्यै नम: |
| ॐ परमानन्दायै नम: | ॐ विज्ञान-घन-रूपिण्यै नम: |
| ॐ ध्यान-ध्यातृ-ध्येयरूपायै नम: | ॐ धर्माधर्मविवर्जितायै नम: |
| ॐ विश्वरूपायै नम: | ॐ जागरिण्यै नम: |
| ॐ स्वपन्त्यै नम: | ॐ तैजसात्मिकायै नम: |
| ॐ सुप्तायै नम: | ॐ प्राज्ञात्मिकायै नम: |
| ॐ तुर्यायै नम: | ॐ सर्वावस्थाविवर्जितायै नम: |
| ॐ सृष्टिकर्त्र्यै नम: | ॐ ब्रह्मरूपायै नम: |
| ॐ गोप्त्र्यै नम: | ॐ गोवोन्दरूपिण्यै नम: |
| ॐ संहारिण्यै नम: | ॐ रुद्ररूपायै नम: |
| ॐ तिरोधानकर्यै नम: | ॐ ईश्वर्यै नम: |
| ॐ सदाशिवायै नम: | ॐ अनुग्रहदायै नम: |
| ॐ पञ्चकृत्यपरायणायै नम: | ॐ भानुमण्डल-मध्यस्थायै नम: |
| ॐ भैरव्यै नम: | ॐ भगमालिन्यै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ पद्मासनायै नमः (279) | ॐ भगवत्यै नमः (280) |
| ॐ पद्मनाभ-सहोदार्यै नमः | |
| ॐ उन्मेश-निमिषोत्पन्न-विपन्नभुवनावल्यै नमः | |
| ॐ सहस्रशीर्षवदनायै नमः | ॐ सहस्राक्ष्यै नमः |
| ॐ सहस्रपदे नमः | ॐ आब्रह्म-कीटजनन्यै नमः |
| ॐ वर्णाश्रमविधायिन्यै नमः | ॐ निजाज्ञारूप-निगमायै नमः |
| ॐ पुण्यापुण्य-फलप्रदायै नमः | |
| ॐ श्रुति-सीमन्त-सिन्दूरी-कृत-पादाब्ज-धूलिकायै नमः | |
| ॐ सकलागम-सन्दोह-शुक्ति-सम्पुट-मौक्तिकायै नमः | |
| ॐ पुरुषार्थ-प्रदायै नमः | ॐ पूर्णायै नमः |
| ॐ भोगिन्यै नमः | ॐ भुवनेश्वर्यै नमः |
| ॐ अम्बिकायै नमः | ॐ अनादिनिधनायै नमः |
| ॐ हरिब्रह्मेन्द्र-सेवितायै नमः | ॐ नारायण्यै नमः |
| ॐ नादरूपायै नमः (300) | ॐ नामरूपविवर्जितायै नमः |
| ॐ ह्रीङ्कार्यै नमः | ॐ ह्रीम्मत्यै नमः |
| ॐ हृद्यायै नमः | ॐ हेयोपादेय-वर्जितायै नमः |
| ॐ राजराजार्चितायै नमः | ॐ राज्ञ्यै नमः |
| ॐ रम्यायै नमः | ॐ राजीवलोचनायै नमः |
| ॐ रञ्जन्यै नमः | ॐ रमण्यै नमः |
| ॐ रस्यायै नमः | ॐ रणत्किङ्किणि-मेखलायै नमः |
| ॐ रमायै नमः | ॐ राकेन्दु-वदनायै नमः |
| ॐ रतिरूपायै नमः | ॐ रतिप्रियायै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ रक्षाकर्यै नम: | ॐ राक्षसघ्न्यै नम: |
| ॐ रामायै नम: | ॐ रमणलम्पटायै नम: |
| ॐ काम्यायै नम: | ॐ कामकलारूपायै नम: |
| ॐ कदम्ब-कुसुम-प्रियायै नम: | ॐ कल्याण्यै नम: |
| ॐ जगती-कन्दायै नम: | ॐ करुणा-रस-सागरायै नम: |
| ॐ कलावत्यै नम: | ॐ कलालापायै नम: |
| ॐ कान्तायै नम: | ॐ कादम्बरी-प्रियायै नम: |
| ॐ वरदायै नम: | ॐ वामनयनायै नम: |
| ॐ वारुणी-मद-विह्वलायै नम: | ॐ विश्वाधिकायै नम: |
| ॐ वेदवेद्यायै नम: | ॐ विन्ध्याचलनिवासिन्यै नम: |
| ॐ विधात्र्यै नम: | ॐ वेदजनन्यै नम: |
| ॐ विष्णुमायायै नम: | ॐ विलासिन्यै नम: |
| ॐ क्षेत्रस्वरूपायै नम: | ॐ क्षेत्रेश्यै नम: |
| ॐ क्षेत्र-क्षेत्रज्ञ-पालिन्यै नम: | ॐ क्षयवृद्धि-विनिर्मुक्तायै नम: |
| ॐ क्षेत्रपालसमर्चितायै नम: | ॐ विजयायै नम: |
| ॐ विमलायै नम: | ॐ वन्द्यायै नम: |
| ॐ वन्दारुजन-वत्सलायै नम: | ॐ वाग्वादिन्यै नम: |
| ॐ वामकेश्यै नम: | ॐ वह्निमण्डल-वासिन्यै नम: |
| ॐ भक्तिमत्कल्पलतिकायै नम: | ॐ पशुपाश-विमोचिन्यै नम: |
| ॐ संहृताशेष-पाषण्डायै नम: | ॐ सदाचार-प्रवर्तिकायै नम: |
| ॐ तापत्रयाग्नि-सन्तप्त-समाह्लादन-चन्द्रिकायै नम: | |
| ॐ तरुण्यै नम: | ॐ तापासाराध्यायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ तनुमध्यायै नमः (361) | ॐ तमोऽपहायै नमः (362) |
| ॐ चित्यै नमः | ॐ तत्पद-लक्ष्यार्थायै नमः |
| ॐ चिदेक-रसरूपिण्यै नमः | |
| ॐ स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-सन्तत्यै नमः | |
| ॐ परायै नमः | ॐ प्रत्यक्चितीरूपायै नमः |
| ॐ पश्यन्त्यै नमः | ॐ परदेवतायै नमः |
| ॐ मध्यमायै नमः | ॐ वैखरीरूपायै नमः |
| ॐ भक्त-मानस-हंसिकायै नमः | ॐ कामेश्वर-प्राणनाड्यै नमः |
| ॐ कृतज्ञायै नमः | ॐ कामपूजितायै नमः |
| ॐ श्रृङ्गार-रस-सम्पूर्णायै नमः | ॐ जयायै नमः |
| ॐ जालन्धरस्थितायै नमः | ॐ ओड्याण-पीठ-निलयायै नमः |
| ॐ बिन्दु-मण्डलवासिन्यै नमः | ॐ रहोयाग-क्रमाराध्यायै नमः |
| ॐ  रहस्तर्पण-तर्पितायै नमः | ॐ सद्यःप्रसादिन्यै नमः |
| ॐ विश्वसाक्षिण्यै नमः | ॐ साक्षिवर्जितायै नमः |
| ॐ षडङ्गदेवतायुक्तायै नमः | ॐ षाड्गुण्य-परिपूरितायै नमः |
| ॐ नित्यक्लिन्नायै नमः | ॐ निरुपमायै नमः |
| ॐ निर्वाणसुखदायिन्यै नमः 390 | ॐ नित्या-षोडशिकारूपायै नमः |
| ॐ श्रीकण्ठार्धशरीरिण्यै नमः | ॐ प्रभावत्यै नमः |
| ॐ प्रभारूपायै नमः | ॐ प्रसिद्धायै नमः |
| ॐ परमेश्वर्यै नमः | ॐ मूलप्रकृत्यै नमः |
| ॐ अव्यक्तायै नमः | ॐ व्यक्ता-व्यक्त-स्वरूपिण्यै नमः |
| ॐ व्यापिन्यै नमः | ॐ विविधाकारायै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ विद्याऽविद्यास्वरूपिण्यै नमः (403) | |
| ॐ महाकामेश-नयन-कुमुदाह्लाद-कौमुद्यै नमः | |
| ॐ भक्तहार्द-तमोभेद-भानुमद्-भानुसन्तत्यै नमः | |
| ॐ शिवदूत्यै नमः | ॐ शिवाराध्यायै नमः |
| ॐ शिवमूर्त्यै नमः | ॐ शिवङ्कर्यै नमः |
| ॐ शिवप्रियायै नमः | ॐ शिवपरायै नमः |
| ॐ शिष्टेष्टायै नमः | ॐ शिष्टपूजितायै नमः |
| ॐ अप्रमेयायै नमः | ॐ स्वप्रकाशायायै नमः |
| ॐ मनोवाचामगोचरायै नमः | ॐ चिच्छक्त्यै नमः |
| ॐ चेतनारूपायै नमः | ॐ जडशक्त्यै नमः |
| ॐ जडात्मिकायै नमः | ॐ गायत्र्यै नमः |
| ॐ व्याहृत्यै नमः | ॐ सन्ध्यायै नमः |
| ॐ द्विजबृन्द-निषेवितायै नमः | ॐ तत्वासनायै नमः |
| ॐ तस्मै नमः | ॐ तुभ्यम् नमः |
| ॐ अयी नमः | ॐ पञ्चकोशान्तरस्थितायै नमः |
| ॐ निस्सीम-महिमायै नमः | ॐ नित्ययौवनायै नमः |
| ॐ मदशालिन्यै नमः | ॐ मदघूर्णित-रक्ताक्ष्यै नमः |
| ॐ मदपाटल-गण्डभुवे नमः | ॐ चन्दनद्रव-दिग्धाङ्ग्यै नमः |
| ॐ चाम्पेयकुसुमप्रियायै नमः | ॐ कुशलायै नमः |
| ॐ कोमलाकारायै नमः | ॐ कुरुकुल्लायै नमः |
| ॐ कुलेश्वर्यै नमः | ॐ कुलकुण्डालयायै नमः |
| ॐ कौलमार्ग-तत्पर-सेवितायै नमः | ॐ कुमार-गणनाथाम्बायै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ तुष्ट्यै नम: (444) | ॐ पुष्ट्यै नम: (445) |
| ॐ मत्यै नम: | ॐ धृत्यै नम: |
| ॐ शान्त्यै नम: | ॐ स्वस्तिमत्यै नम: |
| ॐ कान्त्यै नम: | ॐ नन्दिन्यै नम: |
| ॐ विघ्ननाशिन्यै नम: | ॐ तेजोवत्यै नम: |
| ॐ त्रिनयनायै नम: | ॐ लोलाक्षी-कामरूपिण्यै नम: |
| ॐ मालिन्यै नम: | ॐ हम्सिन्यै नम: |
| ॐ मात्रे नम: | ॐ मलयाचलवासिन्यै नम: |
| ॐ सुमुख्यै नम: | ॐ नलिन्यै नम: |
| ॐ सुभ्रुवे नम: | ॐ शोभनायै नम: |
| ॐ सुरनायिकायै नम: | ॐ कालकण्ठ्यै नम: |
| ॐ कान्तिमत्यै नम: | ॐ क्षोभिण्यै नम: |
| ॐ सूक्ष्मरूपिण्यै नम: | ॐ वज्रेश्वर्यै नम: |
| ॐ वामदेव्यै नम: | ॐ वयोऽवस्थाविवर्जितायै नम: |
| ॐ सिद्धेश्वर्यै नम: | ॐ सिद्धविद्यायै नम: |
| ॐ सिद्धमातायै नम: | ॐ यशस्विन्यै नम: |
| ॐ विशुद्धिचक्र-निलयायै नम: | ॐ आरक्तवर्णायै नम: |
| ॐ त्रिलोचनायै नम: | ॐ खट्वाङ्गादिप्रहरणायै नम: |
| ॐ वदनैक-समन्वितायै नम: | ॐ पायसान्न-प्रियायै नम: |
| ॐ त्वक्स्थायै नम: | ॐ पशुलोक-भयङ्कर्यै नम: |
| ॐ अमृतादिमहाशक्तिसंवृतायै नम: | ॐ डाकिनीश्वर्यै नम: |
| ॐ अनाहताब्ज-निलयायै नम: | ॐ श्यामाभायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ वदनद्वयायै नमः (488) | ॐ दंष्ट्रोजवलायै नमः (489) |
| ॐ अक्षमालादिधरायै नमः | ॐ रुधिर-संस्थितायै नमः |
| ॐ कालरात्र्यादिशक्त्यौघवृतायै नमः | ॐ स्निग्धौदन-प्रियायै नमः |
| ॐ महावीरेन्द्रवरदायै नमः | ॐ राकिण्यम्बा-स्वरूपिण्यै नमः |
| ॐ मणिपूराब्जलनिलयायै नमः | ॐ वदन-त्रय-सम्युतायै नमः |
| ॐ वज्रादिकायुधोपेतायै नमः | ॐ डामर्यादिभिरावृतायै नमः |
| ॐ रक्तवर्णायै नमः | ॐ माम्सनिष्ठायै नमः |
| ॐ गुडान्न-प्रीत-मानसायै नमः | ॐ समस्त-भक्त-सुखदायै नमः |
| ॐ लाकिन्यम्बायै स्वरूपिण्यै नमः | ॐ स्वाधिष्ठानाम्बुजगतायै नमः |
| ॐ चतुर्वक्त्र-मनोहरायै नमः | ॐ शूलाद्यायुध-सम्पन्नायै नमः |
| ॐ पीतवर्णायै नमः | ॐ अतिगर्वितायै नमः |
| ॐ मेदो-निष्ठायै नमः | ॐ मधुप्रीतायै नमः |
| ॐ बन्धिन्यादि-समन्वितायै नमः | ॐ दध्यान्नासक्त-हृदयायै नमः |
| ॐ काकिनीरूप-धारिण्यै नमः | ॐ मूलाधाराम्बुजारूढायै नमः |
| ॐ पञ्चवक्त्रायै नमः | ॐ अस्थिसंस्थितायै नमः |
| ॐ अङ्कुशादि-प्रहरणायै नमः | ॐ वरदादि-निषेवितायै नमः |
| ॐ मुद्गौदनासक्त-चित्तायै नमः | ॐ साकिन्यम्बा-स्वरूपिण्यै नमः |
| ॐ आज्ञाचक्राब्ज-निलयायै नमः | ॐ शुक्लवर्णायै नमः |
| ॐ षडाननायै नमः | ॐ मज्जा-सम्स्थायै नमः |
| ॐ हम्सवती-मुख्य-शक्ति-समन्वितायै नमः | |
| ॐ हरिद्रान्नैक-रसिकायै नमः | ॐ हाकिनी-रूप-धारिण्यै नमः |
| ॐ सहस्र-दल-पद्मस्थायै नमः | ॐ सर्व-वर्णोप-शोभितायै नमः |

| | |
|---|---|
| ॐ सर्वायुध-धरायै नम: | ॐ शुक्ल-सम्स्थितायै नम: |
| ॐ सर्वतोमूख्यै नम: | ॐ सर्वौदनप्रीतचित्तायै नम: |
| ॐ याकिन्यम्बास्वरूपिण्यै नम: | ॐ स्वाहायै नम: |
| ॐ स्वधायै नम: | ॐ अमत्यै नम: |
| ॐ मेधायै नम: | ॐ श्रुत्यै नम: |
| ॐ स्मृत्यै नम: | ॐ अनुत्तमायै नम: |
| ॐ पुण्यकीर्त्यै नम: | ॐ पुण्यलभ्यायै नम: |
| ॐ पुण्यश्रवण-कीर्तनायै नम: | ॐ पुलोमजार्चितायै नम: |
| ॐ बन्धमोचन्यै नम: | ॐ बर्बरालकायै नम: |
| ॐ विमर्शरूपिण्यै नम: | ॐ विद्यायै नम: |
| ॐ वियदादि-जगत्प्रसुवे नम: | ॐ सर्वव्याधि-प्रशमन्यै नम: |
| ॐ सर्वमृत्यु-निवारिण्यै नम: | ॐ अग्रगण्यायै नम: |
| ॐ अचिन्त्यरूपायै नम: | ॐ कलिकल्मश-नाशिन्यै नम: |
| ॐ कात्यायन्यै नम: | ॐ कालहन्त्र्यै नम: |
| ॐ कमलाक्ष-निषेवितायै नम: | ॐ ताम्बूल-पूरित-मुख्यै नम: |
| ॐ दाडिमी-कुसुम-प्रभायै नम: | ॐ मृगाक्ष्यै नम: |
| ॐ मोहिन्यै नम: | ॐ मुख्यायै नम: |
| ॐ मृडान्यै नम: | ॐ मित्ररूपिण्यै नम: |
| ॐ नित्य-तृप्तायै नम: | ॐ भक्तनिधये नम: |
| ॐ नियन्त्र्यै नम: | ॐ निखिलेश्वर्यै नम: |
| ॐ मैत्र्यादि-वासनालभ्यायै नम: | ॐ महा-प्रलय-साक्षिण्यै नम: |
| ॐ पराशक्त्यै नम: | ॐ परानिष्ठायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ प्रज्ञानघन-रूपिण्यै नम: | ॐ माध्वीपानालसायै नम: |
| ॐ मत्तायै नम: | ॐ मातृका-वर्ण-रूपिण्यै नम: |
| ॐ महाकैलासनिलयायै नम: | ॐ मृणालमृदुदोर्लतायै नम: |
| ॐ महनीयायै नम: | ॐ दयामूर्त्यै नम: |
| ॐ महासाम्राज्य-शालिन्यै नम: | ॐ आत्मविद्यायै नम: |
| ॐ महाविद्यायै नम: | ॐ श्रीविद्यायै नम: |
| ॐ कामसेवितायै नम: | ॐ श्रीषोडशाक्षरीविद्यायै नम: |
| ॐ त्रिकूटायै नम: | ॐ कामकोटिकायै नम: |
| ॐ कटाक्ष-किङ्करी-भूत-कमला कोटि-सेवितायै नम: | |
| ॐ शिर:स्थितायै नम: | ॐ चन्द्रनिभायै नम: |
| ॐ भालस्थायै नम: | ॐ इन्द्रधनु:प्रभायै नम: |
| ॐ हृदयस्थायै नम: | ॐ रविप्रख्यायै नम: |
| ॐ त्रिकोणान्तरदीपिकायै नम: | ॐ दाक्षायण्यै नम: |
| ॐ दैत्यहन्त्र्यै नम: | ॐ दक्षयज्ञविनाशिन्यै नम: |
| ॐ दरान्दोलित-दीर्घाक्ष्यै नम: | ॐ दरहासोज्वलन्मुख्यै नम: |
| ॐ गुरुमूर्त्यै नम: | ॐ गुणनिधये नम: |
| ॐ गोमातायै नम: | ॐ गुहजन्मभुवे नम: |
| ॐ देवेश्यै नम: | ॐ दण्डनीतिस्थायै नम: |
| ॐ दहराकाशरूपिण्यै नम: | |
| ॐ प्रतिपन्मुख्य-राकान्त-तिथि-मण्डल-पूजितायै नम: | |
| ॐ कलात्मिकायै नम: | ॐ कलानाथायायै नम: |
| ॐ काव्यालापविनोदिन्यै नम: | |

www.pradosham.com

| ॐ सचामर-रमा-वाणी-सव्य-दक्षिणसेवितायै नम: (615) | |
|---|---|
| ॐ आदिशक्त्यै नम: | ॐ अमेयायै नम: |
| ॐ आत्मायै नम: | ॐ परमायै नम: |
| ॐ पावनाकृत्यै नम: | ॐ अनेक-कोटि-ब्रह्माण्ड-जनन्यै नम: |
| ॐ दिव्यविग्रहायै नम: | ॐ क्लीङ्कार्यै नम: |
| ॐ केवलायै नम: | ॐ गुह्यायै नम: |
| ॐ कैवल्य-पद-दायिन्यै नम: | ॐ त्रिपुरायै नम: |
| ॐ त्रिजगद्वन्द्यायै नम: | ॐ त्रिमूर्त्यै नम: |
| ॐ त्रिदशेश्वर्यै नम: | ॐ त्र्यक्षर्यै नम: |
| ॐ दिव्यगन्धाढ्यायै नम: | ॐ सिन्दूर-तिलकाञ्चितायै नम: |
| ॐ उमायै नम: | ॐ शैलेन्द्रतनयायै नम: |
| ॐ गौर्यै नम: | ॐ गन्धर्वसेवितायै नम: |
| ॐ विश्वगर्भायै नम: | ॐ स्वर्णगर्भायै नम: |
| ॐ अवरदायै नम: | ॐ वागधीश्वर्यै नम: |
| ॐ ध्यानगम्यायै नम: | ॐ अपरिच्छेद्यायै नम: |
| ॐ ज्ञानदायै नम: | ॐ ज्ञानविग्रहायै नम: |
| ॐ सर्ववेदान्त-संवेद्यायै नम: | ॐ सत्यानन्द-स्वरूपिण्यै नम: |
| ॐ लोपामुद्रार्चितायै नम: | ॐ लीलाक्लृप्त-ब्रह्माण्डमण्डलायै नम: |
| ॐ अदृश्यायै नम: | ॐ दृश्यरहितायै नम: |
| ॐ विज्ञात्र्यै नम: | ॐ वेद्य-वर्जितायै नम: |
| ॐ योगिन्यै नम: | ॐ योगदायै नम: |
| ॐ योग्यायै नम: | ॐ योगानन्दायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ युगन्धरायै नम: (658) | |
| ॐ इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिण्यै नम: | |
| ॐ सर्वाधारायै नम: | ॐ सुप्रतिष्ठायै नम: |
| ॐ सदसद्रूपधारिण्यै नम: | ॐ अष्टमूर्त्यै नम: |
| ॐ अजाजेत्र्यै नम: | ॐ लोकयात्रा-विधायिन्यै नम: |
| ॐ एकाकिन्यै नम: | ॐ भूमरूपायै नम: |
| ॐ निर्द्वैतायै नम: | ॐ द्वैतवर्जितायै नम: |
| ॐ अन्नदायै नम: | ॐ वसुदायै नम: |
| ॐ वृद्धायै नम: | ॐ ब्रह्मात्मैक्य-स्वरूपिण्यै नम: |
| ॐ बृहत्यै नम: | ॐ ब्राह्मण्यै नम: |
| ॐ ब्राह्म्यै नम: | ॐ ब्रह्मानन्दायै नम: |
| ॐ बलिप्रियायै नम: | ॐ भाषारूपायै नम: |
| ॐ बृहत्सेनायै नम: | ॐ भावाभाव-विवर्जितायै नम: |
| ॐ सुखाराध्यायै नम: | ॐ शुभकर्यै नम: |
| ॐ शोभनासुलभागत्यै नम: | ॐ राजराजेश्वार्यै नम: |
| ॐ राज्यदायिन्यै नम: | ॐ राज्यवल्लभायै नम: |
| ॐ राजत्कृपायै नम: | ॐ राजपीठ-निवेशित-निजाश्रितायै नम: |
| ॐ राज्यलक्ष्म्यै नम: | ॐ कोशनाथायै नम: |
| ॐ चतुरङ्गबलेश्वर्यै नम: | ॐ साम्राज्यदायिन्यै नम: |
| ॐ सत्यसन्धायै नम: | ॐ सागरमेखलायै नम: |
| ॐ दीक्षितायै नम: | ॐ दैत्यशमन्यै नम: |
| ॐ सर्वलोकवशङ्कर्यै नम: | ॐ सर्वार्थदात्र्यै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ सावित्र्यै नमः (700) | ॐ सच्चिदानन्द-रूपिण्यै नमः (701) |
| ॐ देशकालापरिच्छिन्नायै नमः | ॐ सर्वगायै नमः |
| ॐ सर्वमोहिन्यै नमः | ॐ सरस्वत्यै नमः |
| ॐ शास्त्रमय्यै नमः | ॐ गुहाम्बायै नमः |
| ॐ गुह्यरूपिण्यै नमः | ॐ सर्वोपाधिविनिर्मुक्तायै नमः |
| ॐ सदाशिव-पतिव्रतायै नमः | ॐ सम्प्रदायेश्वर्यै नमः |
| ॐ साध्वे नमः | ॐ यै नमः |
| ॐ गुरुमण्डल-रूपिण्यै | ॐ कुलोत्तीर्णायै नमः |
| ॐ भगाराध्यायै नमः | ॐ मायायै नमः |
| ॐ मधुमत्यै नमः | ॐ मह्यै नमः |
| ॐ गणाम्बायै नमः | ॐ गुह्यकाराध्यायै नमः |
| ॐ कोमालाङ्ग्यै नमः | ॐ गुरुप्रियायै नमः |
| ॐ स्वतन्त्रायै नमः | ॐ सर्वतन्त्रेश्यै नमः |
| ॐ दक्षिणामूर्ति-रूपिण्यै नमः | ॐ सनकादि-समाराध्यायै नमः |
| ॐ शिवज्ञान-प्रदायिन्यै नमः | ॐ चित्कलायै नमः |
| ॐ आनन्दकलिकायै नमः | ॐ प्रेमरूपायै नमः |
| ॐ प्रियङ्कर्यै नमः | ॐ नामपारायण-प्रीतायै नमः |
| ॐ नन्दिविद्यायै नमः | ॐ नटेश्वर्यै नमः |
| ॐ मिथ्या-जगदधिष्ठानायै नमः | ॐ मुक्तिदायै नमः |
| ॐ मुक्तिरूपिण्यै नमः | ॐ लास्यप्रियायै नमः |
| ॐ लयकर्यै नमः | ॐ लज्जायै नमः |
| ॐ रम्भादि-वन्दितायै नमः | ॐ भवदाव-सुधावृष्ट्यै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ पापारण्य-दवानलायै नम: (744) | ॐ दौर्भाग्य-तूल-वातूलायै नम: (745) |
| ॐ जराध्वान्त-रविप्रभायै नम: | ॐ भाग्याब्धि-चन्द्रिकायै नम: |
| ॐ भक्त-चित्त-केकि-घनाघनायै नम: | ॐ रोगपर्वत-दम्भोल्यै नम: |
| ॐ मृत्युदारु-कुठारिकायै नम: | ॐ महेश्वर्यै नम: |
| ॐ महाकाल्यै नम: | ॐ महाग्रासायै नम: |
| ॐ महाशनायै नम: | ॐ अपर्णायै नम: |
| ॐ चण्डिकायै नम: | ॐ चण्ड-मुण्डासुर-निषूदिन्यै नम: |
| ॐ क्षराक्षरात्मिकायै नम: | ॐ सर्वलोकेश्यै नम: |
| ॐ विश्वधारिण्यै नम: | ॐत्रिवर्गदात्र्यै नम: |
| ॐ सुभगायै नम: | ॐ त्र्यम्बकायै नम: |
| ॐ त्रिगुणात्मिकायै नम: | ॐ स्वर्गापवर्गदायै नम: |
| ॐ शुद्धायै नम: | ॐ जपापुष्प-निभाकृत्यै नम: |
| ॐ ओजोवत्यै नम: | ॐ द्युतिधरायै नम: |
| ॐ यज्ञरूपायै नम: | ॐ प्रियव्रतायै नम: |
| ॐ दुराराध्यायै नम: | ॐ दुराधर्षायै नम: |
| ॐ पाटली-कुसुम-प्रियायै नम: | ॐ महत्यै नम: |
| ॐ मेरुनिलयायै नम: | ॐ मन्दार-कुसुम-प्रियायै नम: |
| ॐ वीराराध्यायै नम: | ॐ विराड्रूपायै नम: |
| ॐ विरजायै नम: | ॐ विश्वतोमुख्यै नम: |
| ॐ प्रत्यग्रूपायै नम: | ॐ पराकाशायै नम: |
| ॐ प्राणदायै नम: | ॐ प्राणरूपिण्यै नम: |
| ॐ मार्त्ताण्ड-भैरवाराध्यायै नम: | ॐ मन्त्रिणीन्यस्त-राज्यधुरे नम: |

www.pradosham.com

| | |
|---|---|
| ॐ त्रिपुरेश्यै नमः (788) | ॐ जयत्सेनायै नमः (789) |
| ॐ निस्त्रैगुण्यायै नमः | ॐ परापरायै नमः |
| ॐ सत्यज्ञानानन्द-रूपायै नमः | ॐ सामरस्य-परायणायै नमः |
| ॐ कपर्दिन्यै नमः | ॐ कलामालायै नमः |
| ॐ कामधुके नमः | ॐ कामरूपिण्यै नमः |
| ॐ कलानिधये नमः | ॐ काव्यकलायै नमः |
| ॐ रसज्ञायै नमः | ॐ रसशेवधये नमः |
| ॐ पुष्टायै नमः | ॐ पुरातनायै नमः |
| ॐ पूज्यायै नमः | ॐ पुष्करायै नमः |
| ॐ पुष्करेक्षणायै नमः | ॐ परञ्ज्योतिषे नमः |
| ॐ परन्धामायै नमः | ॐ परमाणुवे नमः |
| ॐ परात्परायै नमः | ॐ पाशहस्तायै नमः |
| ॐ पाशहन्त्र्यै नमः | ॐ परमन्त्र-विभेदिन्यै नमः |
| ॐ मूर्तायै नमः | ॐ अमूर्तायै नमः |
| ॐ अनित्यतृप्तायै नमः | ॐ मुनि-मानस-हंसिकायै नमः |
| ॐ सत्यव्रतायै नमः | ॐ सत्यरूपायै नमः |
| ॐ सर्वान्तर्यामिण्यै नमः | ॐ सत्यै नमः |
| ॐ ब्रह्माण्यै नमः | ॐ ब्रह्मै नमः |
| ॐ जनन्यै नमः | ॐ बहुरूपायै नमः |
| ॐ बुधार्च्चितायै नमः | ॐ प्रसवित्र्यै नमः |
| ॐ प्रचण्डायै नमः | ॐ आज्ञायै नमः |
| ॐ प्रतिष्ठायै नमः | ॐ प्रकटाकृत्यै नमः |

www.pradosham.com

| | |
|---|---|
| ॐ प्राणेश्वर्यै नम: (832) | ॐ प्राणदात्र्यै नम: (833) |
| ॐ पञ्चाशत्पीठ-रूपिण्यै नम: | ॐ विशृङ्खलायै नम: |
| ॐ विविक्तस्थायै नम: | ॐ वीरमातायै नम: |
| ॐ वियत्प्रसुवे नम: | ॐ मुकुन्दायै नम: |
| ॐ मुक्तिनिलयायै नम: | ॐ मूलविग्रहरूपिण्यै नम: |
| ॐ भावज्ञायै नम: | ॐ भवरोगघ्न्यै नम: |
| ॐ भवचक्र-प्रवर्तिन्यै नम: | ॐ छन्द:सारायै नम: |
| ॐ शास्त्रसारायै नम: | ॐ मन्त्रसारायै नम: |
| ॐ तलोदर्यै नम: | ॐ उदारकीर्त्यै नम: |
| ॐ उद्दाम-वैभवायै नम: | ॐ वर्णरूपिण्यै नम: |
| ॐ जन्म-मृत्यु-जरा-तप्तजन-विश्रान्तिदायिन्यै नम: | |
| ॐ सर्वोपनिषदुद्घुष्टायै नम: | ॐ शान्त्यतीत-कलात्मिकायै नम: |
| ॐ गम्भीरायै नम: | ॐ गगनान्तस्थायै नम: |
| ॐ गर्वितायै नम: | ॐ गानलोलुपायै नम: |
| ॐ कल्पना-रहितायै नम: | ॐ काष्ठायै नम: |
| ॐ अकान्तायै नम: | ॐ कान्तार्धविग्रहायै नम: |
| ॐ कार्यकारणनिर्मुक्तायै नम: | ॐ कामकेलि-तरङ्गितायै नम: |
| ॐ कनत्कनक-ताटङ्कायै नम: | ॐ लीला-विग्रहधारिण्यै नम: |
| ॐ अजायै नम: | ॐ क्षयविनिर्मुक्तायै नम: |
| ॐ मुग्धायै नम: | ॐ क्षिप्र-प्रसादिन्यै नम: |
| ॐ अन्तर्मुख-समाराध्यायै नम: | ॐ बहिर्मुख-सुदुर्लभायै नम: |
| ॐ त्रय्यै नम: | ॐ त्रिवर्ग-निलयायै नम: |

www.pradeshar.com

| | |
|---|---|
| ॐ त्रिस्थायै नम: (875) | ॐ त्रिपुरमालिन्यै नम: (876) |
| ॐ निरामयायै नम: | ॐ निरालम्बायै नम: |
| ॐ स्वात्मारामायै नम: | ॐ सुधासृत्यै नम: |
| ॐ संसार-पङ्क-निर्मग्न-समुद्धरण-पण्डितायै नम: | |
| ॐ यज्ञप्रियायै नम: | ॐ यज्ञकर्त्र्यै नम: |
| ॐ यजमानस्वरूपिण्यै नम: | ॐ धर्माधारायै नम: |
| ॐ धनाध्यक्षायै नम: | ॐ धनधान्यविवर्धिन्यै नम: |
| ॐ विप्रप्रियायै नम: | ॐ विप्ररूपायै नम: |
| ॐ विश्वभ्रमण-कारिण्यै नम: | ॐ विश्वग्रासायै नम: |
| ॐ विद्रुमाभायै नम: | ॐ वैष्णव्यै नम: |
| ॐ विष्णुरूपिण्यै नम: | ॐ अयोन्यै नम: |
| ॐ योनिनिलयायै नम: | ॐ कूटस्थायै नम: |
| ॐ कुलरूपिण्यै नम: | ॐ वीरगोष्ठीप्रियायै नम: |
| ॐ वीरायै नम: | ॐ नैष्कर्म्यायै नम: |
| ॐ नादरूपिण्यै नम: | ॐ विज्ञानकलनायै नम: |
| ॐ कल्यायै नम: | ॐ विदग्धायै नम: |
| ॐ बैन्दवासनायै नम: | ॐ तत्वाधिकायै नम: |
| ॐ तत्वमय्यै नम: | ॐ तत्वमर्थ-स्वरूपिण्यै नम: |
| ॐ सामगान-प्रियायै नम: | ॐ सोम्यायै नम: |
| ॐ सदाशिवकुटुम्बिन्यै नम: | ॐ सव्यापसव्य-मार्गस्थायै नम: |
| ॐ सर्वापद्विनिवारिण्यै नम: | ॐ स्वस्थायै नम: |
| ॐ स्वभावमधुरायै नम: | ॐ धीरायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ धीरसमर्चितायै नम: (918) | ॐ चैतन्यार्घ्य-समाराध्यायै नम: (919) |
| ॐ चैतन्य-कुसुम-प्रियायै नम: | ॐ सदोदितायै नम: |
| ॐ सदा-तुष्टायै नम: | ॐ तरुणादित्य-पाटलायै नम: |
| ॐ दक्षिणा-दक्षिणाराध्यायै नम: | ॐ दरस्मेरमुखाम्बुजायै नम: |
| ॐ कौलिनी केवलायै नम: | ॐ अनर्घ्य-कैवल्य-पददायिन्यै नम: |
| ॐ स्तोत्र-प्रियायै नम: | ॐ स्तुतिमत्यै नम: |
| ॐ श्रुति-संस्तुत-वैभवायै नम: | ॐ मनस्विन्यै नम: |
| ॐ मानवत्यै नम: | ॐ महेश्यै नम: |
| ॐ मङ्गलाकृत्यै नम: | ॐ विश्वमातायै नम: |
| ॐ जगद्धात्र्यै नम: | ॐ विसालाक्ष्यै नम: |
| ॐ विरागिण्यै नम: | ॐ प्रगल्भायै नम: |
| ॐ परमोदारायै नम: | ॐ परामोदायै नम: |
| ॐ मनोमय्यै नम: | ॐ व्योमकेश्यै नम: |
| ॐ विमानस्थायै नम: | ॐ वज्रिण्यै नम: |
| ॐ वामकेश्वर्यै नम: | ॐ पञ्चयज्ञप्रियायै नम: |
| ॐ पञ्चप्रेत-मञ्चाधि-शायिन्यै नम: | ॐ पञ्चम्यै नम: |
| ॐ पञ्चभूतेश्यै नम: | ॐ पञ्चसङ्ख्योपचारिण्यै नम: |
| ॐ शाश्वत्यै नम: | ॐ शाश्वतैश्वर्यायै नम: |
| ॐ शर्मदायै नम: | ॐ श्म्भुमोहिन्यै नम: |
| ॐ धरायै नम: | ॐ धरसुतायै नम: |
| ॐ धन्यायै नम: | ॐ धर्मिण्यै नम: |
| ॐ धर्मवर्धिण्यै नम: | ॐ लोकातीतायै नम: |

www.pradosham.com

| | |
|---|---|
| ॐ गुणातीतायै नमः (961) | ॐ सर्वातीतायै नमः (962) |
| ॐ शमात्मिकायै नमः | ॐ बन्धूक-कुसुम-प्रख्यायै नमः |
| ॐ बालायै नमः | ॐ लीलाविनोदिन्यै नमः |
| ॐ सुमङ्गल्यै नमः | ॐ सुखकर्यै नमः |
| ॐ सुवेषाढ्यायै नमः | ॐ सुवासिन्यै नमः |
| ॐ सुवासिन्यर्चन-प्रीतायै नमः | ॐ आशोभनायै नमः |
| ॐ शुद्धमानसायै नमः | ॐ बिन्दु-तर्पण-सन्तुष्टायै नमः |
| ॐ पूर्वजायै नमः | ॐ त्रिपुराम्बिकायै नमः |
| ॐ दशमुद्रा-समाराध्यायै नमः | ॐ त्रिपुराश्रीवशङ्कर्यै नमः |
| ॐ ज्ञानमुद्रायै नमः | ॐ ज्ञानगम्यायै नमः |
| ॐ ज्ञानज्ञेयस्वरूपिण्यै नमः | ॐ योनिमुद्रायै नमः |
| ॐ त्रिखण्डेश्यै नमः | ॐ त्रिगुणायै नमः |
| ॐ अम्बायै नमः | ॐ त्रिकोणगायै नमः |
| ॐ अनघायै नमः | ॐ अद्भुत-चारित्रायै नमः |
| ॐ वाञ्छितार्थऽप्रदायिन्यै नमः | ॐ अभ्यासातिशय-ज्ञातायै नमः |
| ॐ षडध्वातीत-रूपिण्यै नमः | ॐ अव्याज-करुणामूर्त्यै नमः |
| ॐ अज्ञान-ध्वान्त-दीपिकायै नमः | ॐ आबाल-गोप-विदितायै नमः |
| ॐ सर्वानुल्लङ्घ्य-शासनायै नमः | ॐ श्रीचक्रराज-निलयायै नमः |
| ॐ श्रीमत्रिपुरसुन्दर्यै नमः | ॐ श्रीशिवायै नमः |
| ॐ शिव-शक्त्यैक्य-रूपिण्यै नमः | ॐ ललिताम्बिकायै नमः (1000) |

- सम्पूर्णम् -

www.pradosham.com

# 83. श्री ललिता सहस्रनामम्

## श्री चक्र श्लोक:

**बिन्दु त्रिकोण वसु कोण दशारयुग्मं । मन्वस्र नागदल संयुत षोडशारम् ।।**
**वृत्तत्रयं च धरणी सदनत्रयं च । श्रीचक्र मेतदुदितं परदेवताया: ।।**

अस्य श्रीललितासहस्रनाम-स्तोत्र-माला महामन्त्रस्य । वशिन्यादिवाग्देवता ऋषयः । अनुष्टुप् छन्दः। श्रीललितामहात्रिपुरसुन्दरी देवता । श्रीमद्वाग्भवकूटेति बीजम्। मध्यकूटेति शक्तिः । शक्तिकूटेति कीलकम्। श्रीललितामहात्रिपुरसुन्दरी-प्रसादसिद्धिद्वारा चिन्तितफलावाप्त्यर्थे- जपेविनियोगः ।

करन्यासः

ऐम् अङ्गुष्टाभ्यां नमः । क्लीं तर्जनीभ्यां नमः । सौः मध्यमाभ्यां नमः । ऐं अनामिकाभ्यां नमः । क्लीं कनिष्ठिकाभ्यां नमः । सौ: करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः

ऐं हृदयाय नमः । क्लीं शिरसे स्वाहा । सौः शिखायै वषट् । ऐं कवच्हाय हुं । क्लीं नेत्रत्रयाय वौषट् । सौ: अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

॥ ध्यानम्॥

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्
तारा नायक शेखरां स्मितमुखीमापीन वक्षोरुहाम् ।
पाणिभ्यामलिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्न घटस्थ रक्तचरणां ध्यायेत्परामम्बिकाम् ॥

अरुणां करुणा तरङ्गिताक्षीं धृत पाशाङ्कुश पुष्प बाणचापाम् ।
अणिमादिभि रावृतां मयूखैरहमित्येव विभावयेभवानीम् ॥

ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम्।
सर्वालङ्कार युक्तां सतत मभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्त मूर्तिं सकल सुरनुतां सर्व सम्पत्प्रदात्रीम् ॥

सकुङ्कुम विलेपनामलिकचुम्बि कस्तूरिकां
समन्द हसितेक्षणां सशर चाप पाशाङ्कुशाम् ।
अशेषजन मोहिनीं अरुण माल्य भूषाम्बरां
जपाकुसुम भासुरां जपविधौ स्मरेदम्बिकाम् ॥

## लमित्यादि पञ्चपूजा

लं - प्रथिव्यात्मिकायै घन्दं समर्पयामि । हं – आकाशात्मिकायै पुष्पाणि समर्पयामि ।
यं – वाय्वात्मिकायै धूपं आक्रापयामि । रं – अग्न्यात्मिकायै दीपं दर्शयामि ।
वं – अमृतात्मिकायै अमृतं **महानैवेद्यं** निवेदयामि ।
सं – सर्वात्मिकायै सर्वोपचारान् समर्पयामि ॥

## ॥ अथ श्रीललितासहस्रनामस्तोत्रम् ॥

- ॐ-ऐम्-ह्रीम्-श्रीम् -

ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्-सिंहासनेश्वरी ।
चिदग्नि-कुण्ड -सम्भूता देवकार्य-समुद्यता ॥ १॥
उद्यद्भानु-सहस्राभा चतुर्बाहु-समन्विता ।
रागस्वरूप-पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥ २॥
मनोरूपेक्षु-कोदण्डा पञ्चतन्मात्र-सायका ।
निजारुण-प्रभापूर-मज्जद्ब्रह्माण्ड-मण्डला ॥ ३॥
चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्कचा ।
कुरुविन्दमणि -श्रेणी-कनत्कोटीर-मण्डिता ॥ ४॥
अष्टमीचन्द्र-विभ्राज-दलिकस्थल-शोभिता ।
मुखचन्द्र-कलङ्काभ-मृगनाभि-विशेषका ॥ ५॥
वदनस्मर-माङ्गल्य-गृहतोरण-चिल्लिका ।
वक्त्रलक्ष्मी-परीवाह-चलन्मीनाभ-लोचना ॥ ६॥

नवचम्पक-पुष्पाभ-नासादण्ड-विराजिता ।
ताराकान्ति-तिरस्कारि-नासाभरण-भासुरा ॥ ७॥
कदम्बमञ्जरी-क्लृप्त -कर्णपूर-मनोहरा ।
ताटङ्क-युगली -भूत-तपनोडुप -मण्डला ॥८॥
पद्मराग-शिलादर्श-परिभावि-कपोलभूः ।
नवविद्रुम-बिम्बश्री-न्यक्कारि-रदनच्छदा ॥९॥
शुद्ध-विद्याङ्कुराकार -द्विजपङ्क्ति-द्वयोज्ज्वला ।
कर्पूर-वीटिकामोद-समाकर्षद्दिगन्तरा ॥१०॥
निज-सल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छपी ।
मन्दस्मित-प्रभापूर-मज्जत्कामेश-मानसा ॥ ११॥
अनाकलित-सादृश्य-चुबुकश्री-विराजिता ।
कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरा ॥ १२॥
कनकाङ्गद-केयूर -कमनीय-भुजान्विता ।
रत्नग्रैवेय -चिन्ताक-लोल-मुक्ता-फलान्विता ॥ १३॥
कामेश्वर-प्रेमरत्न-मणि-प्रतिपण-स्तनी ।
नाभ्यालवाल-रोमालि-लता-फल-कुचद्वयी ॥ १४॥
लक्ष्यरोम-लताधारता-समुन्नेय-मध्यमा ।
स्तनभार-दलन्मध्य-पट्टबन्ध-वलित्रया ॥ १५॥
अरुणारुण-कौसुम्भ-वस्त्र-भास्वत्-कटीतटी ।
रत्न-किङ्किणिका-रम्य-रशना-दाम-भूषिता ॥ १६॥
कामेश-ज्ञात-सौभाग्य-मार्दवोरु -द्वयान्विता ।
माणिक्य-मुकुटाकार -जानुद्वय-विराजिता ॥ १७॥

इन्द्रगोप-परिक्षिप्त-स्मरतूणाभ-जङ्घिका ।
गूढगुल्फा कूर्मपृष्ठ -जयिष्णु-प्रपदान्विता ॥ १८॥
नख-दीधिति-संछन्न -नमज्जन-तमोगुणा ।
पदद्वय-प्रभाजाल-पराकृत -सरोरुहा ॥ १९॥
शिञ्जान-मणिमञ्जीर-मण्डित-श्री-पदाम्बुजा ।
मराली-मन्दगमना महालावण्य-शेवधिः ॥ २०॥
सर्वारुणाऽनवद्याङ्गी सर्वाभरण-भूषिता ।
शिव-कामेश्वराङ्कस्था शिवा स्वाधीन-वल्लभा ॥ २१॥
सुमेरु-मध्य-शृङ्गस्था श्रीमन्नगर-नायिका ।
चिन्तामणि-गृहान्तस्था पञ्च-ब्रह्मासन-स्थिता ॥ २२॥
महापद्माटवी-संस्था कदम्बवन-वासिनी ।
सुधासागर-मध्यस्था कामाक्षी कामदायिनी ॥ २३॥
देवर्षि -गण-संघात -स्तूयमानात्म-वैभवा ।
भण्डासुर-वधोद्युक्त-शक्तिसेना -समन्विता ॥ २४॥
सम्पत्करी-समारूढ-सिन्धुर-व्रज-सेविता ।
अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभिरावृता ॥ २५॥
चक्रराज-रथारूढ-सर्वायुध -परिष्कृता ।
गेयचक्र-रथारूढ-मन्त्रिणी-परिसेविता ॥ २६॥
किरिचक्र-रथारूढ-दण्डनाथा-पुरस्कृता ।
ज्वाला-मालिनिकाक्षिप्त-वह्निप्राकार-मध्यगा ॥ २७॥
भण्डसैन्य -वधोद्युक्त-शक्ति-विक्रम-हर्षिता ।
नित्या-पराक्रमाटोप-निरीक्षण-समुत्सुका ॥ २८॥

www.prapatti.com

भण्डपुत्र-वधोद्युक्त-बाला-विक्रम-नन्दिता ।
मन्त्रिण्यम्बा-विरचित-विषङ्ग-वध-तोषिता ॥ २९॥
विशुक्र-प्राणहरण-वाराही-वीर्य-नन्दिता ।
कामेश्वर-मुखालोक-कल्पित-श्रीगणेश्वरा ॥ ३०॥
महागणेश-निर्भिन्न-विघ्नयन्त्र-प्रहर्षिता ।
भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिणी ॥ ३१॥
कराङ्गलि -नखोत्पन्न-नारायण-दशाकृतिः ।
महा-पाशुपतास्त्राग्नि-निर्दग्धासुर -सैनिका ॥ ३२॥
कामेश्वरास्त्र-निर्दग्ध -सभण्डासुर-शून्यका ।
ब्रह्मोपेन्द्र-महेन्द्रादि -देव -संस्तुत -वैभवा ॥ ३३॥
हर-नेत्राग्नि-संदग्ध -काम-सञ्जीवनौषधिः ।
श्रीमद्वाग्भव-कूटैक -स्वरूप-मुख-पङ्कजा ॥ ३४॥
कण्ठाधः-कटि-पर्यन्त-मध्यकूट -स्वरूपिणी ।
शक्ति-कूटैकतापन्न -कट्यधोभाग-धारिणी ॥ ३५॥
मूल-मन्त्रात्मिका मूलकूटत्रय -कलेबरा ।
कुलामृतैक -रसिका कुलसंकेत -पालिनी ॥ ३६॥
कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचार-तत्परा ॥ ३७॥
मूलाधारैक-निलया ब्रह्मग्रन्थि-विभेदिनी ।
मणि-पूरान्तरुदिता विष्णुग्रन्थि -विभेदिनी ॥ ३८॥
आज्ञा-चक्रान्तरालस्था रुद्रग्रन्थि-विभेदिनी ।
सहस्त्राराम्बुजारूढा सुधा-साराभिवर्षिणी ॥ ३९॥
तडिल्लता-समरुचिः षट्चक्रोपरि-संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तु-तनीयसी ॥ ४०॥

www.prapasham.com

भवानी भावनागम्या भवारण्य-कुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्त-सौभाग्यदायिनी ॥ ४१॥
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ४२॥
शाङ्करी श्रीकरी साध्वी शरच्चन्द्र-निभानना ।
शातोदरी शान्तिमती निराधारा निरञ्जना ॥ ४३॥
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥ ४४॥
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ४५॥
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ४६॥
निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ॥ ४७॥
निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
निस्संशया संशयघ्नी निर्भवा भवनाशिनी ॥ ४८॥
निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥ ४९॥
निस्तुला नीलचिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ ५०॥
दुष्टदूरा दुराचार -शमनी दोषवर्जिता ।
सर्वज्ञा सान्द्रकरुणा समानाधिक-वर्जिता ॥ ५१॥

सर्वशक्तिमयी सर्व-मङ्गला सद्गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्वमन्त्र -स्वरूपिणी ॥ ५२॥
सर्व-यन्त्रात्मिका सर्व-तन्त्ररूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥ ५३॥
महारूपा महापूज्या महापातक-नाशिनी ।
महामाया महासत्त्वा महाशक्तिर्महारतिः ॥ ५४॥
महाभोगा महैश्वर्या महावीर्यामहाबला ।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥ ५५॥
महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायाग-क्रमाराध्या महाभैरव-पूजिता ॥ ५६॥
महेश्वर -महाकल्प-महाताण्डव-साक्षिणी ।
महाकामेश-महिषी महात्रिपुर-सुन्दरी ॥ ५७॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी ।
महाचतुः-षष्टिकोटि-योगिनी-गणसेविता ॥ ५८॥
मनुविद्या चन्द्रविद्या चन्द्रमण्डल-मध्यगा ।
चारुरूपा चारुहासा चारुचन्द्र-कलाधरा ॥ ५९॥
चराचर-जगन्नाथा चक्रराज-निकेतना ।
पार्वती पद्मनयना पद्मराग-समप्रभा ॥ ६०॥
पञ्च-प्रेतासनासीना पञ्चब्रह्म-स्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञान-घनरूपिणी ॥ ६१॥
ध्यान-ध्यातृ-ध्येयरूपा धर्माधर्म-विवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ६२॥
सुप्ता प्राज्ञात्मिका तुर्यासर्वावस्था-विवर्जिता ।
सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ॥ ६३॥

संहारिणी रुद्ररूपा तिरोधान-करीश्वरी ।
सदाशिवाऽनुग्रहदा पञ्चकृत्य -परायणा ॥ ६४॥
भानुमण्डल-मध्यस्था भैरवी भगमालिनी ।
पद्मासना भगवती पद्मनाभ-सहोदरी ॥ ६५॥
उन्मेष-निमिषोत्पन्न-विपन्न-भुवनावली ।
सहस्र-शीर्षवदना सहस्राक्षी सहस्रपात्॥ ६६॥
आब्रह्म-कीट-जननी वर्णाश्रम-विधायिनी ।
निजाज्ञारूप-निगमा पुण्यापुण्य-फलप्रदा ॥ ६७॥
श्रुति-सीमन्त-सिन्दूरी -कृत -पादाब्ज-धूलिका ।
सकलागम-सन्दोह-शुक्ति-सम्पुट-मौक्तिका ॥ ६८॥
पुरुषार्थप्रदा पूर्णाभोगिनी भुवनेश्वरी ।
अम्बिकाऽनादि-निधना हरिब्रह्मेन्द्र -सेविता ॥ ६९॥
नारायणी नादरूपा नामरूप-विवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेय -वर्जिता ॥ ७०॥
राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
रञ्जनी रमणी रस्या रणत्किङ्किणि-मेखला ॥ ७१॥
रमा राकेन्दुवदना रतिरूपा रतिप्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ॥ ७२॥
काम्या कामकलारूपा कदम्ब-कुसुम -प्रिया ।
कल्याणी जगतीकन्दा करुणा-रस-सागरा ॥ ७३॥
कलावती कलालापा कान्ता कादम्बरीप्रिया ।
वरदा वामनयना वारुणी-मद-विह्वला ॥ ७४॥
विश्वाधिका वेदवेद्या विन्ध्याचल-निवासिनी ।
विधात्री वेदजननी विष्णुमाया विलासिनी ॥ ७५॥

क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्र -क्षेत्रज्ञपालिनी ।
क्षयवृद्धि-विनिर्मुक्ता क्षेत्रपाल-समर्चिता ॥ ७६॥
विजया विमला वन्द्या वन्दारु-जन-वत्सला ।
वाग्वादिनी वामकेशी वह्निमण्डल-वासिनी ॥ ७७॥
भक्तिमत्-कल्पलतिका पशुपाश-विमोचिनी ।
संहृताशेष -पाषण्डा सदाचार-प्रवर्तिका ॥ ७८॥
तापत्रयाग्नि-सन्तप्त-समाह्लादन-चन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥ ७९॥

चितिस्तत्पद-लक्ष्यार्थाचिदेकरस-रूपिणी ।
स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-सन्ततिः ॥ ८०॥
परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्त-मानस-हंसिका ॥ ८१॥
कामेश्वर-प्राणनाडी कृतज्ञा कामपूजिता ।
शृङ्गार-रस-सम्पूर्णाजया जालन्धर-स्थिता ॥ ८२॥
ओड्याणपीठ-निलया बिन्दु-मण्डलवासिनी ।
रहोयाग-क्रमाराध्या रहस्तर्पण-तर्पिता ॥ ८३॥
सद्यःप्रसादिनी विश्व-साक्षिणी साक्षिवर्जिता ।
षडङ्गदेवता -युक्ता षाड्गुण्य-परिपूरिता ॥ ८४॥
नित्यक्लिन्ना निरुपमा निर्वाण-सुख-दायिनी ।
नित्या-षोडशिका-रूपा श्रीकण्ठार्ध-शरीरिणी ॥ ८५॥
प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्त-स्वरूपिणी ॥ ८६॥

व्यापिनी विविधाकारा विद्याविद्या-स्वरूपिणी ।
महाकामेश-नयन-कुमुदाह्लाद -कौमुदी ॥ ८७॥
भक्त-हार्द-तमोभेद-भानुमद्भानु-सन्ततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी ॥ ८८॥
शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
अप्रमेया स्वप्रकाशा मनोवाचामगोचरा ॥ ८९॥
चिच्छक्तिश्चेतनारूपा जडशक्तिर्जडात्मिका ।
गायत्री व्याहृतिः सन्ध्या द्विजबृन्द-निषेविता ॥ ९०॥
तत्त्वासना तत्त्वमयी पञ्च-कोशान्तर-स्थिता ।
निस्सीम-महिमा नित्य-यौवना मदशालिनी ॥ ९१॥
मदघूर्णित-रक्ताक्षी मदपाटल-गण्डभूः ।
चन्दन-द्रव-दिग्धाङ्गी चाम्पेय-कुसुम-प्रिया ॥ ९२॥
कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौल-मार्ग-तत्पर-सेविता ॥ ९३॥
कुमार -गणनाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्ननाशिनी ॥ ९४॥
तेजोवती त्रिनयना लोलाक्षी-कामरूपिणी ।
मालिनी हंसिनी माता मलयाचल-वासिनी ॥ ९५॥
सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ॥ ९६॥
वज्रेश्वरी वामदेवी वयोऽवस्था-विवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ॥ ९७॥

www.prapatti.com

विशुद्धिचक्र-निलयाऽऽरक्तवर्णात्रिलोचना ।
खट्वाङ्गादि-प्रहरणा वदनैक-समन्विता ॥ ९८॥
पायसान्नप्रिया त्वक्स्था पशुलोक-भयङ्करी ।
अमृतादि-महाशक्ति-संवृता डाकिनीश्वरी ॥ ९९॥
अनाहताब्ज-निलया श्यामाभा वदनद्वया ।
दंष्ट्रोज्ज्वलाऽक्ष -मालादि-धरा रुधिरसंस्थिता ॥ १००॥
कालरात्र्यादि-शक्त्यौघ-वृता स्निग्धौदनप्रिया ।
महावीरेन्द्र-वरदा राकिण्यम्बा-स्वरूपिणी ॥ १०१॥
मणिपूराब्ज-निलया वदनत्रय-संयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ॥ १०२॥
रक्तवर्णामांसनिष्ठा गुडान्न-प्रीत-मानसा ।
समस्तभक्त-सुखदा लाकिन्यम्बा-स्वरूपिणी ॥ १०३॥
स्वाधिष्ठानाम्बुज-गता चतुर्वक्त्र -मनोहरा ।
शूलाद्यायुध-सम्पन्ना पीतवर्णाऽतिगर्विता ॥ १०४॥
मेदोनिष्ठा मधुप्रीता बन्धिन्यादि-समन्विता ।
दध्यान्नासक्त-हृदया काकिनी-रूप-धारिणी ॥ १०५॥
मूलाधाराम्बुजारूढा पञ्च-वक्त्राऽस्थि-संस्थिता ।
अङ्कुशादि -प्रहरणा वरदादि-निषेविता ॥ १०६॥
मुद्गौदनासक्त-चित्ता साकिन्यम्बा-स्वरूपिणी ।
आज्ञा-चक्राब्ज-निलया शुक्लवर्णाषडानना ॥ १०७॥
मज्जासंस्था हंसवती-मुख्य-शक्ति-समन्विता ।
हरिद्रान्नैक-रसिका हाकिनी-रूप-धारिणी ॥ १०८॥

सहस्रदल-पद्मस्था सर्व-वर्णोप-शोभिता ।
सर्वायुधधरा शुक्ल-संस्थिता सर्वतोमुखी ॥ १०९॥
सर्वौदन-प्रीतचित्ता याकिन्यम्बा-स्वरूपिणी ।
स्वाहा स्वधाऽमतिर्मेधा श्रुतिः स्मृतिरनुत्तमा ॥ ११०॥
पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण-कीर्तना ।
पुलोमजार्चिता बन्ध-मोचनी बर्बरालका ॥ १११॥
विमर्शरूपिणी विद्या वियदादि-जगत्प्रसूः ।
सर्वव्याधि -प्रशमनी-सर्वमृत्युनिवारिणी ॥ ११२॥
अग्रगण्याऽचिन्त्यरूपा कलिकल्मष-नाशिनी ।
कात्यायनी कालहन्त्री कमलाक्ष-निषेविता ॥ ११३॥
ताम्बूल-पूरित-मुखी दाडिमी-कुसुम -प्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ॥ ११४॥
नित्यतृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ।
मैत्र्यादि-वासनालभ्या महाप्रलय-साक्षिणी ॥ ११५॥
परा शक्तिः परा निष्ठा प्रज्ञानघन-रूपिणी ।
माध्वीपानालसा मत्ता मातृका-वर्ण-रूपिणी ॥ ११६॥
महाकैलास-निलया मृणाल-मृदुदोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्य-शालिनी ॥ ११७॥
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरी-विद्या त्रिकूटा कामकोटिका ॥ ११८॥
कटाक्ष-किङ्करी-भूत-कमला-कोटि-सेविता ।
शिरःस्थिता चन्द्रनिभा भालस्थेन्द्र-धनुःप्रभा ॥ ११९॥

हृदयस्था रविप्रख्या त्रिकोणान्तर-दीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञ-विनाशिनी ॥ १२०॥
दरान्दोलित-दीर्घाक्षी दर-हासोज्ज्वलन्-मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥ १२१॥
देवेशी दण्डनीतिस्था दहराकाश-रूपिणी ।
प्रतिपन्मुख्य-राकान्त-तिथि-मण्डल-पूजिता ॥ १२२॥
कलात्मिका कलानाथा काव्यालाप-विनोदिनी ।
सचामर-रमा-वाणी-सव्य-दक्षिण-सेविता ॥ १२३॥
आदिशक्तिरमेयाऽऽत्मा परमा पावनाकृतिः ।
अनेककोटि-ब्रह्माण्ड-जननी दिव्यविग्रहा ॥ १२४॥
क्लींकारी केवला गुह्या कैवल्य-पददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ १२५॥
त्र्यक्षरी दिव्य-गन्धाढ्या सिन्दूर -तिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्व-सेविता ॥ १२६॥
विश्वगर्भास्वर्णगर्भाऽवरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ॥ १२७॥
सर्ववेदान्त -संवेद्या सत्यानन्द-स्वरूपिणी ।
लोपामुद्रार्चिता लीला-क्लृप्त -ब्रह्माण्ड-मण्डला ॥ १२८॥
अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्दा युगन्धरा ॥ १२९॥
इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी ॥ १३०॥

अष्टमूर्तिरजाजैत्री लोकयात्रा-विधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ॥ १३१॥
अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्य-स्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥ १३२॥
भाषारूपा बृहत्सेना भावाभाव-विवर्जिता ।
सुखाराध्या शुभकरी शोभना सुलभा गतिः ॥ १३३॥
राज-राजेश्वरी राज्य-दायिनी राज्य-वल्लभा ।
राजत्कृपा राजपीठ-निवेशित -निजाश्रिता ॥ १३४॥
राज्यलक्ष्मीः कोशनाथा चतुरङ्ग-बलेश्वरी ।
साम्राज्य-दायिनी सत्यसन्धा सागरमेखला ॥ १३५॥
दीक्षिता दैत्यशमनी सर्वलोक-वशङ्करी ।
सर्वार्थदात्री सावित्री सच्चिदानन्द-रूपिणी ॥ १३६॥
देश -कालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ॥ १३७॥
सर्वोपाधि-विनिर्मुक्ता सदाशिव-पतिव्रता ।
सम्प्रदायेश्वरी साध्वी गुरुमण्डल-रूपिणी ॥ १३८॥
कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ॥ १३९॥
स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्ति-रूपिणी ।
सनकादि-समाराध्या शिवज्ञान-प्रदायिनी ॥ १४०॥
चित्कलाऽऽनन्द-कलिका प्रेमरूपा प्रियङ्करी ।
नामपारायण-प्रीता नन्दिविद्या नटेश्वरी ॥ १४१॥

मिथ्या-जगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ॥ १४२॥
भवदा वसुधावृष्टिः पापारण्य-दवानला ।
दौर्भाग्य-तूलवातूला जराध्वान्त-रविप्रभा ॥ १४३॥
भाग्याब्धि-चन्द्रिका भक्त-चित्तकेकि-घनाघना ।
रोगपर्वत -दम्भोलिर्मृत्युदारु-कुठारिका ॥ १४४॥
महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णाचण्डिका चण्डमुण्डासुर-निषूदिनी ॥ १४५॥
क्षराक्षरात्मिका सर्व-लोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ॥ १४६॥
स्वर्गापवर्गदा शुद्धा जपापुष्प-निभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १४७॥
दुराराध्या दुराधर्षा पाटली-कुसुम -प्रिया ।
महती मेरुनिलया मन्दार-कुसुम-प्रिया ॥ १४८॥
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ १४९॥
मार्ताण्ड-भैरवाराध्या मन्त्रिणीन्यस्त-राज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ॥ १५०॥
सत्य-ज्ञानानन्द-रूपा सामरस्य-परायणा ।
कपर्दिनी कलामाला कामधुक् कामरूपिणी ॥ १५१॥
कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ १५२॥
परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता पाशहन्त्री परमन्त्र-विभेदिनी ॥ १५३॥

मूर्ताऽमूर्ताऽनित्यतृप्ता मुनिमानस-हंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥ १५४॥
ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ १५५॥
प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठ-रूपिणी ।
विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ॥ १५६॥
मुकुन्दा मुक्तिनिलया मूलविग्रह-रूपिणी ।
भावज्ञा भवरोगघ्नी भवचक्र-प्रवर्तिनी ॥ १५७॥
छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी ।
उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ॥ १५८॥
जन्ममृत्यु-जरातप्त-जनविश्रान्ति-दायिनी ।
सर्वोपनिष-दुद्धुष्टा शान्त्यतीत-कलात्मिका ॥ १५९॥
गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
कल्पना-रहिता काष्ठाऽकान्ता कान्तार्ध-विग्रहा ॥ १६०॥
कार्यकारण-निर्मुक्ता कामकेलि-तरङ्गिता ।
कनत्कनक ताटङ्का लीला-विग्रह-धारिणी ॥ १६१॥
अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्र-प्रसादिनी ।
अन्तर्मुख-समाराध्या बहिर्मुख-सुदुर्लभा ॥ १६२॥
त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।
निरामया निरालम्बा स्वात्मारामा सुधासृतिः ॥ १६३॥
संसारपङ्क-निर्मग्न-समुद्धरण-पण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमान-स्वरूपिणी ॥ १६४॥

धर्माधारा धनाध्यक्षा धनधान्य-विवर्धिनी ।
विप्रप्रिया विप्ररूपा विश्वभ्रमण-कारिणी ॥ १६५॥
विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ॥ १६६॥
वीरगोष्ठीप्रिया वीरा नैष्कर्म्यानादरूपिणी ।
विज्ञानकलना कल्या विदग्धा बैन्दवासना ॥ १६७॥
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थ-स्वरूपिणी ।
सामगानप्रिया सोम्या सदाशिव-कुटुम्बिनी ॥ १६८॥
सव्यापसव्य-मार्गस्था सर्वापद्विनिवारिणी ।
स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ॥ १६९॥
चैतन्यार्घ्य-समाराध्या चैतन्य-कुसुमप्रिया ।
सदोदिता सदातुष्टा तरुणादित्य-पाटला ॥ १७०॥
दक्षिणा-दक्षिणाराध्या दरस्मेर-मुखाम्बुजा ।
कौलिनी-केवलाऽनर्घ्य-कैवल्य-पददायिनी ॥ १७१॥
स्तोत्रप्रिया स्तुतिमती श्रुति-संस्तुत-वैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥ १७२॥
विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥ १७३॥
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्चयज्ञ-प्रिया पञ्च-प्रेत-मञ्चाधिशायिनी ॥ १७४॥
पञ्चमी पञ्चभूतेशी पञ्च-संख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्याशर्मदा शम्भुमोहिनी ॥ १७५॥

www.prapatti.com

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥ १७६॥
बन्धूक-कुसुमप्रख्या बाला लीलाविनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥ १७७॥
सुवासिन्यर्चन-प्रीताऽऽशोभना शुद्धमानसा ।
बिन्दु-तर्पण-सन्तुष्टा पूर्वजा त्रिपुराम्बिका ॥ १७८॥
दशमुद्रा-समाराध्या त्रिपुराश्रीवशङ्करी ।
ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेय-स्वरूपिणी ॥ १७९॥
योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
अनघाऽद्भुत -चारित्रा वाञ्छितार्थ-प्रदायिनी ॥ १८०॥
अभ्यासातिशय-ज्ञाता षडध्वातीत-रूपिणी ।
अव्याज-करुणा-मूर्तिरज्ञान-ध्वान्त-दीपिका ॥ १८१॥
आबाल-गोप-विदिता सर्वानुल्लङ्घ्य-शासना ।
श्रीचक्रराज-निलया श्रीमत्-त्रिपुरसुन्दरी ॥ १८२॥
श्रीशिवा शिव-शक्त्यैक्य-रूपिणी ललिताम्बिका ।
एवं श्रीललिता देव्या नाम्नां साहस्रकं जगुः ॥ ॥
इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीव अगस्त्य संवादे श्रीललिता सहस्रनाम स्तोत्रं सम्पूर्णम् ॥

<u>करन्यासः</u>

ऐम् अङ्गुष्टाभ्यां नमः । क्लीं तर्जनीभ्यां नमः । सौः मध्यमाभ्यां नमः । ऐं अनामिकाभ्यां नमः । क्लीं कनिष्ठिकाभ्यां नमः । सौ: करतलकरपृष्ठाभ्यां नमः ॥

**अङ्गन्यासः**

ऐं हृदयाय नमः । क्लीं शिरसे स्वाहा । सौः शिखायै वषट् । ऐं कवच्हाय हुं । क्लीं नेत्रत्रयाय वौषट् । सौ: अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्विमोक: ॥

## ॥ ध्यानम्॥

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्
तारा नायक शेखरां स्मितमुखीमापीन वक्षोरुहाम् ।
पाणिभ्यामलिपूर्ण रत्न चषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्न घटस्थ रक्तचरणां ध्यायेत्परामम्बिकाम् ॥

अरुणां करुणा तरङ्गिताक्षीं धृत पाशाङ्कुश पुष्प बाणचापाम् ।
अणिमादिभि रावृतां मयूखैरहमित्येव विभावयेभवानीम् ॥

ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मपत्रायताक्षीं
हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मां वराङ्गीम्।
सर्वालङ्कार युक्तां सतत मभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्त मूर्तिं सकल सुरनुतां सर्व सम्पत्प्रदात्रीम् ॥

सकुङ्कुम विलेपनामलिकचुम्बि कस्तूरिकां
समन्द हसितेक्षणां सशर चाप पाशाङ्कुशाम् ।
अशेषजन मोहिनीं अरुण माल्य भूषाम्बरां
जपाकुसुम भासुरां जपविधौ स्मरेदम्बिकाम् ॥

## लमित्यादि पञ्चपूजा

लं - प्रथिव्यात्मिकायै घन्दं समर्पयामि । हं – आकाशात्मिकायै पुष्पाणि समर्पयामि ।

यं – वाय्वात्मिकायै धूपं आक्रापयामि । रं – अग्न्यात्मिकायै दीपं दर्शयामि ।

वं – अमृतात्मिकायै अमृतं महानैवेद्यं निवेदयामि ।

सं – सर्वात्मिकायै सर्वोपचारान् समर्पयामि ॥

बिन्दु त्रिकोण वसु कोण दशारयुग्मं । मन्वस्र नागदल संयुत षोडशारम् ।।
वृत्तत्रयं च धरणी सदनत्रयं च । श्रीचक्र मेतदुदितं परदेवताया: ।।

<><><><><><><>

www.prapatti.com

# 84. श्रीविष्णुसहस्रनामस्त्रोत्रम्

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥३॥

देवीं सरस्वतीं व्यासं ततो जयमुदीरये ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ४॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ५॥

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ६॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ७॥

ॐ नमो विष्णवे प्रभविष्णवे ।

श्री वैशम्पायन उवाच ---
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ८॥

www.prdosham.com

.... युधिष्ठिर उवाच .....

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ ९॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥ १०॥

.... भीष्म उवाच ....

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन् नामसहस्रेण पुरुषः सततोत्थितः ॥ ११॥

तमेव चार्चयन्नित्यं  भक्त्या पुरुषमव्ययम् ।
ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च ॥ १२॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ १३॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ १४॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १५॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ १६॥

www.prapatham.com

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं दैवतानां च भूतानां योऽव्ययः पिता ॥ १७॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ १८॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १९॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ २०॥

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ॥
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥ २१॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ॥ २२॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ॥
अनेकरूप दैत्यान्तं नमामि पुरुषोत्तमं ॥ २३॥

## ....अधिक: पाठ: ....

केशव: पातु मे पदौ जङ्घे नारायणो मम ।

माधवो मे कटिं पातु गोविन्दो गुह्यमेव च ॥ २४॥

नाभिं विष्णुस्तु मे पातु जठरं मधुसूदन: ।

उर्रस्त्रिविक्रम: पातु हृदयं पातु वामन: ॥२५॥

www.pradosham.com

श्रीधर: पातु मे  कण्ठं हृषीकेशो मुखं मम ॥
पद्मनाभस्तु नयने शिरो दामोदरो मम ॥ २६॥

एवमेतानि नामानि जपकाले विशेषत: ।
विन्यसेदात्मरक्षार्थं सर्वमङ्गलसिद्धये ॥ २७॥

## ..... पूर्वन्यासः ....

ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ॥
श्री वेदव्यासो भगवान् ऋषिः ।
अनुष्टुप् छन्दः ।

श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।
अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः।
उद्भवः क्षोभणो देव इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् ।
शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् ।
त्रिसामा सामगः सामेति कवचम् । आनन्दं परब्रह्मेति योनिः ।
ऋतुः सुदर्शनः काल इति दिग्बन्धः ॥

श्रीविश्वरूप इति ध्यानम् । श्रीमहाविष्णुप्रीत्यर्थं सहस्रनामजपे विनियोगः ॥

। अथ ध्यानम् ।

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतेमौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूष वर्षैः
आनन्दी नः पुनीयादरिनलिनगदा शङ्खपाणिर्मुकुन्दः ॥ १॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्र सूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवन वपुषं विष्णुमीशं नमामि ॥ २॥

ॐ ॥ नमो भगवते वासुदेवाय ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ३॥

मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥ ४॥
नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ ५॥
सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्॥६॥
छायायां पारिजातस्य हेमसिंहासनोपरि
आसीनमम्बुदश्याम-मायताक्षमलङ्कृतम् ।
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसं
रुक्मिणी सत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ ७॥

www.rjdisham.com

। स्तोत्रम् ।

ॐ ॥ नमो नारायणाय । ॐ नमो भगवते वासुदेवाय । ॐ विश्वस्मै नम: ॥

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ ३॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४॥
स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८॥

www.pradosham.com

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १०॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११॥

वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वत स्थाणुर्वरारोहो महातपाः ॥ १३॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गोवेदवित् कविः ॥ १४॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९॥
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २०॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१॥
अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा॥२२॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४॥
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६॥

असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥ २७॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३०॥

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६॥

www.pradosham.com

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥ ३९॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४०॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२॥

रामो विरामो विरतो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६॥

www.prapatti.com

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५०॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्त्वतांपतिः ॥ ५४॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥५९॥

भगवान् भगहाऽऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६०॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥६२॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३॥

अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ६५॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।

विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥ ७०॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६॥

www.prapatham.com

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७॥

एको नैकः सवः कः किं यत् तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८०॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ८५॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९०॥

भारभृत् कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः ॥ ९२॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥ ९३॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५॥

www.prapatti.com

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः॥ ९६॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १००॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।

जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१॥

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४॥

यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः ।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ॥ १०५॥

आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६॥

शङ्खभृन्नन्दकी चक्री शाङ्र्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १०७॥

सर्वप्रहरणायुध ॐ नम इति ।

वनमाली गदी शाङ्गीं शङ्खी चक्री च नन्दकी ।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १०८॥

श्री वासुदेवोऽभिरक्षतु ॐ नम इति ।
इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥ २॥

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ ३॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ॥ ४॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ५॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ ६॥

www.prapasham.com

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ ९॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १०॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥ १२॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृत पुण्यानां भक्तानां पुरुषोत्तमे ॥ १३॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १४॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १५॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १६॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १७॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १८॥

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ १९॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २०॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २१॥

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ २२॥

न ते यान्ति पराभवम् ॐ नम इति ।

.... अर्जुन उवाच ....

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २३॥

.... श्रीभगवानुवाच ....

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।
सोहऽमेकेन श्लोकेन स्तुत एव न संशयः ॥ २४॥

स्तुत एव न संशय ॐ नम इति ।

www.prapatti.com

.... व्यास उवाच ....

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २५॥

श्री वासुदेव नमोऽस्तुत ॐ नम इति ।

.... पार्वत्युवाच ....

केनोपायेन लघुना विष्णोर्नामसहस्रकम् ।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥ २६॥

.... ईश्वर उवाच ....

श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं राम नाम वरानने ॥ २७॥
श्रीरामनाम वरानन ॐ नम इति ।

.... ब्रह्मोवाच ....

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥ २८॥

सहस्रकोटियुगधारिणे ॐ नम इति ।

.... सञ्जय उवाच ....

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ २९॥

.... श्रीभगवानुवाच ....

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ ३०॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ३१॥

आर्ताः विषण्णाः शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्तु ॥ ३२॥

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥३३॥

ॐ आपदामपहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

आर्तानामार्तिहन्तारं भीतानां भीतिनाशनम् । द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥

॥ हरिः ॐ तत्सत् ॥

www.pradosham.com

# 85. श्री हनुमन्नमस्क्रिया

गोष्पदी-कृत-वाराशिं मशकीकृत-राक्षसम् ।
रामायण-महामाला-रत्नं वन्देऽनिलात्मजम् ॥

अञ्जनानन्दनं वीरं जानकी-शोक-नाशनम् ।
कपीश-मक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकाग्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलि-राञ्जनेयम् ॥

आञ्जनेय-मतिपाटलाननं काञ्चनाद्रि-कमनीयविग्रहम् ।
पारिजात-तरु-मूलवासिनं भावयामि पवमान-नन्दनम् ॥

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृत-मस्तकाञ्जलिम् ।
बाष्पवारि-परिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥
मनोजवं मारुत-तुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानर-यूथ-मुख्यं शिरसा**न्न**मामि ॥
बुद्धिर्बलं यशो धैर्यं निर्भयत्वम् अरोगताम् ।
अजाड्यम् वाक् पटुत्त्वम्च हनुमत् स्मरणात् भवेत् ॥

**-- सीता लक्ष्मण भरत शत्रुघ्न अभयहस्त आञ्जनेय समेत श्री रामचन्द्रस्वामिणे नमः --**

**अनायासेन मरणं विनादैन्येन जीवनं । देहान्ते तव सायुज्यं देहि मे कृपया शम्भो त्वयि भक्तिम् अचञ्चलं ॥** **[An easy death, a life without hardhips, unwavering Faith and Devotion in You - Please provide me with - O my God Shambhu.**

<><><><>

# EXTRAS

## 1. अभिषेक क्रमम्

प्रथमम् गन्ध तैलञ्च द्वितीयम् पञ्चगव्यकम् । पञ्चामृतम् तृतीयंस्याद् घृतस्नानम् चतुर्थकम् ।।
पञ्चमम् पयसा स्नानम् दधिस्नानम्तु षष्ठकम् । सप्तमम् मधुनास्नानम् इक्षुसारमथाष्ठकम् ।।
नवमम् फलसारंस्याद् दशमम् नालिकेरजम् । एकादशम् गन्ध तोयम् द्वादशम् जलमच्युते ।।

| | |
|---|---|
| 01. Oil | 01. गन्ध तैलम् |
| 02. Panchagavyam | 02. पञ्चगव्यम् |
| 03. Panchamrutham | 03. पञ्चामृतम् |
| 04. Ghee | 04. घृतम् |
| 05. Milk | 05. पयसम् (क्षीरम्) |
| 06. Yoghurt | 06. दधि |
| 07. Honey | 07. मधु |
| 08. Sugarcane juice | 08. इक्षु सारम् |
| 09. Lemon or orange juice | 09. फल सारम् |
| 10. Tender Coconut water | 10. नालिकेरजम् |
| 11. Sandalwood paste | 11. गन्धतोयम् |

+ Vibuthi for Mrutyunjaya mantram

www.pradosham.com

# 2. पञ्चगव्यम्

## HOW TO MIX PANCHAGAVYAM WITH MANTRAS


We speak words that we should not speak, eat that is forbidden, touch everything that we should not touch. Sins derived through three elements namely Mind, body, thoughts can only be expiated by consuming Panchagavyam. Panchagavyam is an admixture of five holy elements taken from Cow and the potency of panchagavya medicine increases when accompanied by the power of Mantra.

It has been clearly codified in Dharmasastra what ratio each ingredient to be applied while mixing Panchagavyam. It is measured as "Phalam". 'One Phalam' is equivalent to approximately 3 (silver) one rupee coin weight. Following mantras are to be recited when mixing each ingredient with pure water or rose water or Ganga water.

| Measurement | Quantity | AavAhana Devatha |
|---|---|---|
| Gomoothram | 1 Phalam | Yagya Devatha |
| Gomeyam | Half-thumb size | VishNu |
| Milk | 7 Phalam | Soman |
| Curd | 3 Phalam | Brahma |
| Ghee | 1 Phalam | Vaayu |
| Kusha Udhakam *(Dharbai added with water)* | 1 Phalam | VaruNan |




Place a plantain leaf, raw rice and split 9 cubes as exhibited below :-




| | | |
|---|---|---|
| **Theertham (Pure Water)**<br>**Measure = 1 "Phalam"**<br>**9** | **CURD**<br>**Measure = 3 Phalam**<br>**2** | Rice Powder<br>**Measure = 2 Phalam**<br>**6** |
| Gomeyam<br>**Measure = ½ Thumb figure**<br>**5** | Cow Milk<br>**Measure = 7 Phalam**<br>**1** | Cow Ghee<br>**Measure = 1 phalam**<br>3 |
| Turmeric<br>**Measure = 2 phalam**<br>**8** | **GOMOOTHRAM**<br>**Measure = 1 Phalam**<br>**4** | **Amla Seeds**<br>**7** |

= PANCHAGAVYA INGREDIENTS

METHOD

First wash your legs, perform Achamaneeyam, wear Pavithram, do Praanaayaamam (get blessings from Elders) and proceed to sankalpam…….*Preethyartham shuddhi PuNyAham Vasishye and then recite PunyAhavachanam and sprinkle water from Punyaham water on PanjagavyaDravyam.*

(2) ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं --------- गोत्रोत्भवस्य--------शर्मनः मनो-वाक-कायै-रनुष्ठित अभ्यक्षभक्षण अस्पृष्य स्पर्षणादि जनित समस्तदोष निवृत्यर्थं पञ्चगव्य सम्मेळनं करिष्ये ॥

आवाहनं :-

***1. YAGYA DEVATHA AAVAHANAM ON GOMOOTHRAM…***

यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः । गो मूत्रे यज्ञदेवतां आवाहयामि ॥

2. ***VISHNU DEVATHA AAVAHANAM ON GOMEYAM….***

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। गोमेय विष्णुम् आवाहयामि ॥

3. ***SOMAN DEVATHA AAVAHANAM ON MILK….***

ॐ सोमो धेनुगं सोमो अर्वन्तमाशुम् । सोमो वीरं कर्मण्यं ददातु । सादन्यं विदथ्यगं सभेयम् । पितुः श्रवणं यो ददाशदस्मै । क्षीरे सोमम् आवाहयामि ॥

4. ***BRAHMA DEVATHA AAVAHANAM ON CURD….***

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः | सबुध्रिया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः | दध्नि भ्रह्माणम् आवाहयामि ॥

5. ***VAAYU DEVATHA AAVAHANAM ON GHEE….***

आनो नियुद्भिश्शतिनीभिरध्वरम् । सहस्रिणीभि रुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व। यूयं पातस्वस्तिभिस्सदा नः। घृते वायुम् आवाहयामि ॥

6. ***VARUNA DEVATHA AAVAHANAM ON DHARBAI (GRASS) WATER….***

इमं मे वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युरा चके ॥ तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमनो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशगं् स मा न आयुः प्र मोषीः ॥ शुद्धोदक वरुणं आवाहयामि ॥

**PANCHAGAVYA SAMMELANAM (PUTTING TOGETHER ALL INGREDIENTS)**

***(Please refer to the above table for exact measurement of Panchagavyam Ingredients)***

1. Gomoothram - with Gayathri Mantra
2. Gomeyam - with GandadvArAm Mantra
3. Milik - with AabhyAyasva Mantra
4. Curd - with DadhikrAvaNNo Mantra
5. Ghee - with Shukramasi Mantra
6. Kushodakam - with Devasya TvA mantra

1. ओं भूर्भुवःसुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्।

2. गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीगं् सर्वभूतानां तामिहोपह्वये श्रियम्।

3. आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम्| भवा वाजस्य संगथे॥

4. दधिक्राविण्णो अकार्षं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्रण आयूगं्षि तारिषत्॥

5. शुक्रमसि ज्योतिरसि तेजोऽसि ॥

6. देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥

***(After reciting the above Mantras and adding each ingredient in a separate vessel, take a Samith and mix by reciting Pranava Mantra)***

उदु त्यज्ञातवेदसन्देवं वहन्ति केतवः दृशे विश्वाय सूर्यम्॥

***(By reciting this Mantra, do Nivedanam by exhibiting to Sun God. Note: Consumption of Panchagavyam should be carried out, by reciting following Mantra, only after accepting Abisheka Theertham.)***

यत् त्वगस्थि गतं पापं देहे तिष्ठति मामके । प्राशनं पञ्चगव्यस्य दहतु अग्निरिवेन्धनम् ॥

<><><><>

www.pradosham.com

# 3. नैवेद्यम् - Nayvedyam

| MEANING OF SANSKRIT WORDS USED IN POOJA | | |
|---|---|---|
| अपूपं | அப்பம் | Appam |
| घृतं | நெய் | Ghee |
| आज्योपहारं | நெய் சாதம் | Food made of Ghee |
| इक्षु | கரும்பு | Sugarcane |
| उर्वारुकं | வெள்ளரிக்காய் | Cucumber |
| गुडोपहारं, गुलोपहारं, गुळोपहारं, गुळापूप: | வெல்லம் | Jaggery |
| गोक्षीरं | பசும்பால் | Cow milk |
| घृतगुळपायसं | நெய்ப்பாயஸம் | Ghee and Jaggery mixed Payasam |
| चणक: | கொண்டைக்கடலை | Chick Peas |
| चित्रान्नं | சித்ரான்னம் | Five cookced rice – Lemon, Coconut, Tamarind, Seasame, Jaggery Rice |
| जम्भीर फलान्नम् | எலுமிச்சை சாதம் | Lemon Rice |
| तक्रं | மோர் | Butter Milk |
| दधि | தயிர் | Yoghurt, Curd |
| तिन्तिडिकान्नम् | புளியோதரை | Tamarind Rice |
| नालिकेरान्नम् | தேங்காய்ச்சாதம் | Coconut rice |
| तिलान्नम् | எள்ளுச்சாதம் | Seasame rice |
| शर्करान्नम् | சர்கரைப்பொங்கல் | Sweet Rice |
| दध्यान्नम्, दध्योधनम् | தயிர் சாதம் | Yoghurt or curd rice |
| नवनीतम् | வெண்ணை | Butter |
| नालिकेर: | தேங்காய் | Coconut |
| नालिकेरखण्डद्वयं | ஒரு தேங்காயின் 2 பகுதிகள் | 2 halves of coconut |
| पानकं | பானகம் | Jaggery mixed water |
| पानीयम्, अमृतपानीयम् | சுத்தமான குடிநீர் | Pure drinking water |
| पृथुक: | அவல் | Flattened rice flakes |
| मधुरपिष्टकं | இனிப்பு மா | Sweet Flour |
| महानैवेद्यं | சமைத்த சாதம் | Pure Cooked Rice |
| माषापूपम् | வடை | Vada |
| मुद्गान्नम् | மிளகுதூவிய பொங்கல் | Salt and Peppered coocked rice |
| मोदकम् | கொழுக்கட்டை | Fried or steamed éclair |
| रसखण्डम् | கல்கண்டு | Sugar Crystal |

www.prdoshram.com

| | | |
|---|---|---|
| लड्डुकम् | லட்டு | A sweatmeat |
| लवणं | உப்பு | Table Salt |
| लाजः | பொரி | Puffed Rice |
| व्यञ्जनम् | கூட்டு | Side Dish |
| शर्करा | சீனி | Sugar |
| शाल्यदम् | சம்பா அரிசி | Red Rice |

## 4. फलाणि – FRUITS

| | | |
|---|---|---|
| कदली | கதலிப்பழம் | Banana |
| कपित्थ | காஷ்மீர பழம் | Wood Apple |
| खर्जूरम् | பேரீச்சம்பழம் | Dates |
| सूतः | மாம்பழம் | Mango |
| जम्भीरः | எலுமிச்சை | Lemon |
| जम्बु | நாவற்பழம் | Bell Fruit or Damson fruit |
| दाडिमी | மாதுளம் பழம் | Pomogrenade |
| द्राक्षा | திராட்சை | Grapes |
| नारङ्गः | சாத்துக்குடி | Orange |
| पनसः | பலாப்பழம் | Jack Fruit |
| पेरी | பேரிப்பழம் | Pears |
| बदरी | ஒருவகை பெர்ரி பழம் | Wild Berry |
| बीजापूरः | கொய்யாப்பழம் | Gauva |
| माउलिङ्ग | துரிஞ்சிப்பழம் | Boivin fruit |
| वेत्रः फलं | பெரப்பம் பழம் | A clan of Bear fruit |
| पिप्पलं | ஆப்பிள் | Apple |
| मधुकर्कटी | பப்பாளி | Papaya |
| कलिङ्गम् | தர்பூசணி | Watermolon |
| काजवम् | முந்திரிப்பழம் | Cashew Fruit |
| जम्बु फलम् | நாவல் பழம் | Jambu Fruit |
| अनानसम् | அண்ணாசி | Pineapple |

## 5. पुष्पाणि

| | | |
|---|---|---|
| चम्पकम् - Frangipani | नागपुष्पम् - Cobra Saffron | रजनीगन्धा – Tuberose |
| कमलम् – Lotus | द्रोन पुष्पम् - Commmon Leaucos | गन्धपुष्पम् - Marigold |
| पाटलपुष्पः - Rose | केतकी - Screwpine | यूथिका - White Jasine |
| शोपालिका - Coral Jasmine | स्तबकः - Bouquet | मालती - Jasmine |

www.pradosham.com

## 6. तिथि

| | | | |
|---|---|---|---|
| 01. प्रथमा | PrathamA | 08. अष्टमी | Ashtamee |
| 02. द्वितीया | DviteeyA | 09. नवमी | Navvamee |
| 03. तृतीया | ThruuteeyA | 10. दशमी | Dashamee |
| 04. चतुर्थी | Chathurthi | 11. एकादशी | EkAdashee |
| 05. पञ्चमी | Panchami | 12. द्वादशी | DwAdashee |
| 06. षष्ठि | Shashti | 13. त्रयोदशी | Thrayodashee |
| 07. सप्तमी | Sapthami | 14. चतुर्दशी | Chathurdashee |

15. पौर्णमी (Pournami) – (or) अमावास्या - (Amavasya)

From Amavasya-Prathama to Pournami is Shukal Paksha [Waxing Bright (**வளர்பிறை**)]
From Pournami-Prathama to Amavasya is Krishna Paksha [Waxing Dark (**தேய்பிறை**)]

## 7. वार: च मासा: - DAY & MONTH

| | | | |
|---|---|---|---|
| Sunday | भानुवासर: | 01. चैत्र - मेषं | 08. कार्तिक - वृश्चिक |
| Monday | इन्दुवासर: | 02. वैशाख - वृषभ | 09. मार्गशीर्ष - धनु: |
| Tuesday | भौम वासर: | 03. ज्येष्ठ - मिथुन | 10. पुष्य - मकर: |
| Wednesday | सौम्य वासर: | 04. आषाढ - कर्कट | 11. माघ - कुम्भ |
| Thursday | गुरु वासर: | 05. श्रावण - सिंह | 12. फल्गुन - मीन |
| Friday | भृगु वासर: | 06. भाद्रपद - कन्या | |
| Saturday | स्थिर वासर: | 07. अश्विन - तुला | |

## 8. ऋतु: - SEASONS

| | | | |
|---|---|---|---|
| वसन्त ऋतु | मेषं - वृषभ | Chithirai – Vaikasi | (April 14 to June 15) |
| ग्रीष्म ऋतु | मिथुन ಬ कर्कट | Aani – Adi | (June 16 to August 15) |
| वर्ष ऋतु | सिंह - कन्या | Aavani – Purattasi | (August 16 to October 15) |
| शरत् ऋतु | तुला - वृश्चिक | Aippasi – Karthigai | (October 16 to December 15) |
| हेमन्त ऋतु | धनुर् - मकर: | Maarkazhi – Thai | (December 15 to February 14) |
| शिशिर ऋतु | कुम्भ - मीन | Maasi – Panguni | (February 15 to April 13) |

Note: * Beginning of the month might vary a day + or – from the date mentioned.* This is only applicable for Tamil, Malayalam months, Kannada and Telugu please apply based on beginning of each month which will be approximately 15-20 days earlier. Please refer to respective Panchang.

TELUGU Months: Chaithhramu, Vaisaakamu, Jyeshtta, Aashaadhamu, Sraavanamu, Bhaadhrapadam, Aasveejamu, Kaarthikamu, Maargaseershamu, Pushyami, Phaalgunamu.

www.pradosham.com

# 9. नक्षत्राणि – NAME OF (27) STARS

The Moon revolves around the earth approximately 27 days. Moon traces a path around the sky during this period. The enlightened Seers of ancient time divided these into 27 units and named each unit name of Star, Group or Constellation. These are known as Nakshatras. These are also considered brides of Chandra – the Moon God.

These were divided into 12 units, each was named Rasi – 27 divded by 12 = 2.25. Each Rasi covers two and a quarter of Nakshatras (please see the table below with Rasis).

The Moon transits through any one of the 27 Nakshatras at any given time and 12 Rasis corresponding to your Nakshatras. The Nakshatra in which Moon was noticed when you were born is the Janma Nakshatra – also seen as birth star. Similarly, the Rasi in which Moon was located when you were born is known as your Janma Rasi or Bith Rasi. Please see below the 27 stars, followed by Rasis in chart.

| | | | |
|---|---|---|---|
| 01. अश्विनी | Ashvinee | 15. स्वाती | Swathee |
| 02. अपभरणी | Abhabharanee | 16. विशाखा | VishAkhA |
| 03. कृत्तिका | Kruthika | 17. अनूराधा | AnUrAdhA |
| 04. रोहिणी | Rohinee | 18. ज्येष्ठा | JyeshTA |
| 05. मृगशीर्षं | Mrugasheersham | 19. मूला | MoolA |
| 06. आर्द्रा | Aardhraa | 20. पूर्वाषाढा | PoorvashAdhA |
| 07. पुनर्वसू | Punarvasu | 21. उत्तराषाढा | UththarAshAdhA |
| 08. पुष्य | Pushya | 22. श्रवणं | ShravaNam |
| 09. आश्लेषा | AashleshA | 23. श्रविष्ठा | ShrAviShTA |
| 10. मघा | MaghA | 24. शतभिषक् | Shatabhishak |
| 11. पूर्वफल्गुनी | Poorvaphalgunee | 25. पूर्वप्रोष्ठपदा | PoorvaproshTapadA |
| 12. उत्तरफल्गुनी | Uththaraphalgunee | 26. उत्तरप्रोष्ठपदा | UththaraproshTapadA |
| 13. हस्तं | Hastham | 27. रेवती | Revathee |
| 14. चित्रा | Chithra | | |

| NAKSHTATRAS (TAMIL) – **நக்ஷத்திரங்களின் வரிசை** | | | | | |
|---|---|---|---|---|---|
| அஸ்வினீ | பரணீ | கார்த்திகை | ரோஹிணீ | மிருகஷீர்ஷம் | திருவாதிரை |
| புனர்பூசம் | பூசம் | ஆயில்யம் | மகம் | பூரம் | உத்திரம் |
| ஹஸ்தம் | சித்திரை | சுவாதி | விசாகம் | அனுஷம் | கேட்டை |
| மூலம் | பூராடம் | உத்திராடம் | திருவோணம் | அவிட்டம் | சதயம் |
| பூரட்டாதி | உத்திரட்டாதி | ரேவதீ | | | |

www.pradosham.com

# 10. नक्षत्राणि – रासि चक्रं – NAME OF (27) STARS

**நக்ஷத்திரங்களின் வரிசை ராசியிடன் சேர்த்து**

| | | | |
|---|---|---|---|
| 01-02 अश्विनी & अपभरणी | அஸ்விநீ & பரணீ | Ashvinee + Aphabharanee | Mesha |
| 03. कृत्तिका | கார்த்திகை | KruthikA (I Paadam) | Mesha |
| 03. कृत्तिका | கார்த்திகை | KruthikA II, III, IV Paadam) | Vrushabha |
| 04. रोहिणी | ரோஹிணீ | RohhiNee | Vrushabha |
| 05. मृगशीर्षं | மிருகஷீர்ஷம் | Mrugasheersham (I, II Paadam) | Vrushabha |
| 05. मृगशीर्षं | மிருகஷீர்ஷம் | Mrugasheersham (III, IV Paadam) | Mithuna |
| 06. आर्द्रा | திருவாதிரை | AardhrA | Mithuna |
| 07. पुनर्वसू | புனர்பூசம் | Punarvasoo (I, II, III Paadam) | Mithuna |
| 07. पुनर्वसू | புனர்பூசம் | Punarvasoo (IV Paadam) | Kataka |
| 08-09. पुष्य & आश्लेषा | பூசம் & ஆயில்யம் | Pushya & AashleshA | Kataka |
| 10. मघा | மகம் | MaghA | Simha |
| 11. पूर्वफल्गुनी | பூரம் | Poorvaphalguni | Simha |
| 12. उत्तरफल्गुनी | உத்திரம் | Uththaraphalguni (I Paadam) | Simha |
| 12. उत्तरफल्गुनी | உத்திரம் | Uththaraphalguni (II,III, IV Paadam) | Kanya |
| 13. हस्तं | ஹஸ்தம் | Hastham | Kanya |
| 14. चित्रा | சித்திரை | ChithrA (I, II Paadam) | Kanya |
| 14. चित्रा | சித்திரை | ChithrA (III, IV Paadam) | Thula |
| 15. स्वाती | சுவாதி | Swathee | Thula |
| 16. विशाखा | விசாகம் | VishakhA (I, II, III Paadam) | Thula |
| 16. विशाखा | விசாகம் | VishakhA (IV Paadam) | Vruschika |
| 17-18. अनूराधा & ज्येष्ठा | அனுஷம் & கேட்டை | AnoorAdhA & JyEshttA | Vruschika |
| 19-20. मूला & पूर्वाषाढा | மூலம் & பூராடம் | Moola & PoorvashAdA | Dhanur |
| 21. उत्तराषाढा | உத்திராடம் | UththrAShAdA (I Paadam) | Dhanur |
| 21. उत्तराषाढा | உத்திராடம் | UththrAShAdA (II, III, IV Paadam) | Makara |
| 22. श्रवणं | திருவோணம் | Shravanam | Makara |
| 23. श्रविष्ठी | திருவோணம் | ShrAvishtA (I, II Paadam) | Makara |
| 23. श्रविष्ठा | அவிட்டம் | ShrAvishtA (III, IV Paadam) | Kumbha |
| 24. शतभिषक् | சதயம் | Shatabhishak | Kumbha |
| 25. पूर्वप्रोष्ठपदा | பூரட்டாதி | PoorvaproshtapadA (I, II, III Paadam) | Kumbha |
| 25. पूर्वप्रोष्ठपदा | பூரட்டாதி | PoorvaproshtapadA (IV Paadam) | Meena |
| 26-27. उत्तरप्रोष्ठपदा & रेवती | உத்திரட்டாதி & ரேவதீ | UththraprosHTapadA & Revathee | Meena |

www.prdosham.com

SHRI ABHAYAHASTHA AANJANEYAR

KRISHANPURAM - KADAYANALLUR - THENKASI TALUK
TIRUNELVELI DISTRICT - TAMILNADU



www.pradosham.com